275

॥ श्रीः ॥

द्वितीयः भागः

॥ पाणिनितन्त्रक्रोडपत्राणि ॥

प्राचीनैर्नवीनैश्च विद्वद्भिर्विरचितानि

'अभिनवभट्टबाणशब्दतर्कालंकारविद्याभूषण'

बिरुदभाजा

वात्स्यचक्रवर्तिना

रायम्पेट्टै कृष्णमाचार्येण

संपाद्य संशोध्य

तञ्जानगरस्थ

श्रीकृष्णविलासमुद्रालये

मुद्रयित्वा प्रकाशितानि ॥

१९१०.

मूल्यम् एका रूपिका.

विषयसूचिका

—x—

* सुरपुरं वेङ्कटाचार्यकृतः।

॥ श्रीः ॥

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ॥

अत्र अधातुरित्यादौ पर्युदासः, लाघवात् । अप्रत्ययपदमावर्तते । तेन धातुभिन्नं प्रत्ययभिन्नं प्रत्ययान्तभिन्नं चार्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यादिति सूत्रार्थः ॥

न चावृत्त्या प्रत्ययप्रत्ययान्तोभयपर्युदासे न मानमिति वाच्यम्, 'सात्पदाद्योः' इति सूत्रे सातिग्रहणस्य, उत्तरसूत्रे तद्धितग्रहणस्य चोभयपर्युदासे मानत्वात् । अन्यथा अग्निसादित्यादौ प्रत्ययपर्युदासाभावेन सातिप्रत्ययस्यापि प्रातिपदिकत्वेन पदादित्वादेव षत्वनिषेधसिद्ध्या तद्वैयर्थ्यं स्पष्टमेव । एवं प्रत्ययान्तपर्युदासाभावे औपगवादौ एतत्सूत्रेणैव सिद्ध्या तद्वैयर्थ्यं स्पष्टमेव ॥

न च उशब्दात्सातिप्रत्यये तस्य बहुचि कृते एकादेशे बहूसात् इति रूपमिष्यते । अत्र पूर्वान्तवद्भावेन एकादेशविशिष्टस्य बहुच्त्वात् 'बहुच्पूर्वस्य न' इति वार्तिकेन बहुवाचावित्यत्रेव प्रत्ययलक्षणप्रतिषेधेन सादित्यस्यापदत्वात्तत्र षत्वनिषेधार्थं सातिग्रहणं चरितार्थमिति वाच्यम्, प्रत्यासत्त्या बहुच्प्रत्ययप्रवृत्तिप्रयोजकीभूतसुप्प्रयोज्यपदत्वे कर्तव्ये प्रत्ययलक्षणप्रतिषेधेऽपि सात्प्रत्ययप्रकृतिकसुब्निमित्तकपदत्वस्य सुवचत्वेन तद्वैयर्थ्यस्य सूपपादत्वात् । किं च प्रत्ययपर्युदासाभावे बहुवाचावित्यादौ बहुचोऽपि प्रातिपदिकत्वात् सुपि तयोः सुप्सुपेति समासे 'उत्तरपदत्वे चापदादिविधौ—' इति निषेधेनैव कुत्वव्यावृत्त्या 'बहुच्पूर्वस्य न' वचनस्यैव प्रत्ययपर्युदासे ज्ञापकत्वसंभवः ॥

प्रत्ययपर्युदासफलं तु हरिषु करोषीत्यादौ सुप्तिपोः प्रातिपदिकत्वे औत्सर्गिकैकवचनस्य कथंचित्सामान्ये नपुंसकमिति नपुंसकत्वमाश्रित्य लुक्यपि 'सात्पदाद्योः' इति षत्वनिषेधाभावः । प्रत्ययावयवनिबन्धनषत्वं तु भविष्यतीत्यादौ चरितार्थम् ॥

न च प्रत्ययपर्युदासाभावेऽपि 'सात्पदाद्योः' इति सूत्रे सातिग्रहणस्य श्रूयमाणप्रकृतिकप्रत्ययरूपपदस्य षत्वनिषेधश्चेत्, सातेरेवेति नियमार्थत्वान्न दोषः । श्रूयमाणप्रकृतिकेति विशेषणात् 'व्यतिसे' इति सिद्धमिति वाच्यम्, आदेशानपहृतप्रकृतिकप्रत्ययस्य चेत् सातेरेवेति विपरीतनियमापत्त्या इशब्दात् उशब्दाच्च सातिप्रत्यये तस्य हरिगुरुशब्दाभ्यां समासे 'हरीसात्, गुरूसात्' इत्यत्रापि षत्वापत्तेः; नियमस्वीकारापेक्षया सौत्रप्रत्ययपदस्य प्रत्ययपरत्वकल्पनाया एव लघुत्वादिति दिक् ॥

नन्वेवमपि प्रत्ययपर्युदासो विफलः, दधिसेचावित्यत्र 'गतिकारकोपपदानाम्—' इति कृदन्तेन समासे कृते तत्र षत्वनिषेधार्थं पदात् आदिरिति पञ्चमासमासस्यावश्यकत्वेन तेनैव सर्वत्र निर्वाहे पदस्यादिरिति षष्ठीसमासाश्रयणे फलाभावेन हरिष्वित्यादौ सोः पदत्वेऽपि षत्वनिषेधाप्राप्तेः;

न च पञ्चमीसमासाश्रयणे 'स्वादिषु—' इति पदत्वमादाय पदात् परत्वात् हरिष्वित्यादौ निषेधापत्तिरिति वाच्यम्, 'सात्पदाद्योः' इति सूत्रे सातिग्रहणेन स्वादौ पदमिति या पदसंज्ञा तामाश्रित्य षत्वनिषेधाप्रवृत्तेर्ज्ञापनात् ॥

न च प्रत्ययपर्युदासस्य हरिष्वित्यादौ षत्वनिषेधव्यावृत्तिरूपफलासंभवेऽपि 'आं हरिषु देवदत्त' इत्यादौ 'आम एकान्तरमामन्त्रित-

अर्थवदधातुरप्रत्ययः ३ प्रातिपदिकम्

मनन्तिके' इति एकान्तरत्वप्रयुक्तामन्त्रितनिघातनिषेधसिद्धिरेव फलमिति ब्रूमः । प्रत्ययपर्युदासे हि सोः पदत्वाभावेन पदद्वयान्तरितत्वाभावात्तत्सिद्धिरिति वाच्यम्, सत्यपि प्रत्ययपर्युदासे 'स्वादिषु—' इति प्रकृतिभागस्य 'सुप्तिङन्तम्—' इति प्रत्ययान्तस्य च पदत्वेन पदद्वयव्यवधानसत्त्वादेकान्तरितत्वाभावेन त्वन्मतेऽपि तत्प्रवृत्तेर्दुर्वचत्वात्। यदि तु 'आं पचसि पचसि देवदत्त' इत्याष्टमिकद्विर्वचने समासव्यवधाने च निघातनिषेधप्रवृत्तये व्यवधायकस्य एकपदत्वे निषेधप्रवृत्तिरित्येवार्थः, न तु तस्य अनेकपदत्वे अप्रवृत्तिरिति ब्रूषे; तर्हि ममापि हरिष्वित्यादौ समुदायगतं पदत्वमादाय निर्वाह इति चेत्, न; बहुसेचावित्यादौ 'बहुच्पूर्वस्य चापदादिविधौ' इति वार्तिकेनापि अपदादिविधावेव प्रत्ययलक्षणप्रतिषेधेन तत्र सेच् इत्यस्य पदत्वेन तत्र षत्वनिषेधसिद्धये पदस्यादिरिति षष्ठीसमासस्यावश्यकत्वेन हरिष्वित्यादौ षष्ठीसमासपक्षे षत्वनिषेधापत्त्या प्रत्ययपर्युदासस्यावश्यकत्वात् । किं च पदादादिरिति पञ्चमीसमासाश्रयणे राजपुरुषेष्वित्यादौ अन्तर्वर्तिनीं विभक्तिमाश्रित्य पुरुषशब्दस्य पदत्वात् पदादादित्वात् षत्वनिषेधापत्तिः ॥

न च पञ्चमीसमासानाश्रयणे दधिसेचावित्यादौ निषेधानापत्तिरिति वाच्यम्, तत्र 'गतिकारकोपपदानाम्—' इत्यस्यानित्यत्वेन सुबन्तेन समासाङ्गीकारेणादोषात् ॥

नन्वेवं सातिग्रहणेन प्रत्ययपर्युदासेऽपि प्रत्ययान्तपर्युदासे न मानम्;

न चोत्तरसूत्रे तद्धितग्रहणमेव मानमिति वाच्यम्, तस्य इः

इयान्' इत्यादौ चारितार्थ्यसंभवात् ॥

न चोत्तरसूत्रे अर्थवद्ग्रहणानुवृत्तिसामर्थ्यात् एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धार्थस्य ग्रहणात् 'इः, इयान्' इत्यादौ अवयवद्वयाभावेन अवयवशक्तिसहकृतसमुदायशक्त्या विशेषणविशेष्यभावापन्नविशिष्टार्थोपस्थितिजनकत्वरूपस्य तस्यासंभवान्न चारितार्थ्यसंभव इति वाच्यम्, यत्किंचित्पदजन्यपृथगुपस्थितिविषयार्थकत्वेन लोके दृष्टानां विशिष्टार्थविषयकैकशक्त्या एकोपस्थितिजनकत्वस्यैव एकार्थीभावपदवाच्यत्वेन औपगव इत्यादौ उपगोरपत्यमिति यत्किंचित्पदजन्यपृथगुपस्थितिविषयार्थकत्वेन समुदायैकार्थीभाववत् अस्यापत्यमिति यत्किंचित्पदजन्यपृथगुपस्थितिविषयार्थकत्वेन लोके दृष्टानां विशिष्टार्थविषयकैकशक्त्या एकोपस्थितिजनकत्वस्य केवलप्रत्यये इः इत्यादावपि संभवेन तथाश्रयणेऽपि चारितार्थ्यसंभवादिति चेत्, न; अस्यामवस्थायां प्रत्ययान्तपर्युदासाभावेन पूर्वसूत्रेण अ अस् इ इत्यत्र सुब्लुगर्थं कृतायाः संज्ञाया "एकदेशविकृतन्यायेन तत्राप्यानयनसंभवेन तद्वैयर्थ्यस्य सूपपादत्वात् ॥

नन्वर्धविकारे "एकदेशविकृतन्यायाप्रवृत्त्या प्रातिपदिकत्वं दुर्वचम्;

न चानुमानिकस्थान्यादेशभावस्वीकारेण तत्र स्थानिवद्भावेन तत्त्वं सुलभम्, 'यस्येति च' इति सूत्रोपात्तस्याकारस्यार्थवतः प्रकृते संभवेन अनर्थकविषयकस्य तत्कल्पनस्यानवकाशात् । किंच 'एरुः' इत्यत्रेव अत्र अकारस्य अदन्तपरत्वेऽपि इकारस्य निमित्तत्वेन उच्चारणप्रसङ्गरूपषष्ठ्यर्थान्वयासंभवेन तस्य स्थानिकोटौ निवेशासंभवादिति चेत्, न; 'सतीर्थ्य' इत्यादौ 'तीर्थे ये' इत्यनेन यादौ प्रत्यये विवक्षिते तीर्थशब्दे परतः समानस्य सादेशे कृते स्थानिवत्त्वेन सशब्दस्य समान-

अर्थवदधातुरप्रत्ययः प्रातिपदिकम्

शब्दत्वेन सतीर्थशब्दे समानतीर्थशब्दत्वस्यार्थसमाजग्रस्तत्वेऽपि तत्र प्रातिपदिकत्वस्य त्वदुक्तरीत्या दुर्वचत्वेन यत्प्रत्ययानापत्त्या पूर्वमेव यत्प्रत्ययेन यकारादौ प्रत्यये पर इत्यर्थे सतिशिष्टत्वाभावेन यत्स्वरानापत्त्या त्वदुक्तनियमानाश्रयणेन इग्घटितस्य अज्घटितशब्दे परे यण्घटिततादृशशब्दस्वरूपस्यादेशत्वाङ्गीकारेण समुदायवृत्तिसमासत्वादिधर्मस्याप्यानयनवत् प्रातिपदिकत्वस्याप्यानयनसंभव इत्याशयात् ॥

नन्वप्रत्ययपदस्यावृत्तावपि नञैकार्थीभावापन्नस्य प्रत्ययपदस्य "प्रत्ययग्रहण"परिभाषोपस्थिततदाद्यंशे निष्कृष्यान्वयासंभवेन तदन्तविधिर्दुर्लभः ;

न च 'अ प्रत्ययात्' इत्यादौ अन्यत्र तदन्ते गृहीतशक्तिकस्य प्रत्ययपदस्यात्र निर्देश इति वाच्यम्, सामान्यरूपेण विशेषरूपेण वा प्रत्ययबोधकशब्दत्वं न तदन्तबोधकतावच्छेदकम्; किंतु विशेषणत्वमेव तदन्तबोधकतावच्छेदकम् । तथा च प्रकृते बोधकतावच्छेदकीभूतविशेषणत्वासंभवेन 'अ प्रत्ययात्' इत्यादौ विद्यमानस्य प्रत्ययपदस्य निर्देशेऽपि तदन्तपरत्वस्य दुर्वचत्वादिति चेत्, न; 'हल्ङ्याब्भ्यः—' इत्यादौ दीर्घपदस्य तात्पर्यग्राहकत्वेन ङ्याप्पदस्यैव दीर्घङ्याबन्तपरत्ववत् "प्रत्ययग्रहण"परिभाषोपस्थिततदाद्यंशस्याप्यत्र तात्पर्यग्राहकत्वेन प्रत्ययपदस्य स्वप्रकृत्याद्यवयवकस्वचरमावयवकसमुदाये लक्षणया तेनैव नञर्थस्याप्यन्वयेन प्रत्ययान्ताभिन्नमित्यर्थस्यापि सुलभत्वात् । एतेन अप्रत्ययपदस्यैव तदादिविशेषणत्वेन आरोपितो यः प्रत्ययः तदन्तं यदर्थवच्छब्दस्वरूपमित्यर्थान्न दोष इत्यपास्तम्; तथा सति समुदायेन नञर्थस्यानन्वयेन प्रत्ययभिन्नान्तामित्यर्थापत्त्या हरिणि-

त्यादौ दोषापत्तेः । तथा च प्रत्ययभिन्नं प्रत्ययान्तभिन्नमिति पूर्वोक्तः सूत्रार्थः संपन्नः ॥

डित्यादीन्यव्युत्पन्नानीहोदाहरणानि । यत्तु–अव्युत्पत्तिपक्षस्य इदमेव ज्ञापकमिति,' तन्न; 'बहुपटव' इत्याद्यर्थं सूत्रस्यावश्यकत्वेन ज्ञापकत्वासंभवात् ॥

न च 'बहुच्पूर्वं प्रातिपदिकम्' इति न्यासेन तत्सिद्धिः, तथा सति बहुपटवस्तिष्ठन्तीति वाक्यस्यापि प्रातिपदिकत्वापत्तेः; समासग्रहणस्य नियमार्थत्वानापत्त्या मूलकेनोपदंशमित्यादौ कृदन्तत्वेन प्रातिपदिकत्वापत्तेश्च ॥

अत्र–अधातुग्रहणाभावे 'अहन्' इत्यादौ धातुसंज्ञासमकालमेव ततः परं वा यथोद्देशपक्षे प्रातिपदिकत्वापत्तिः । सति तु तस्मिन् सामर्थ्यात् 'प्रकल्प्य—' इति न्यायेन पूर्वं तस्याप्रवृत्त्या न दोषः ॥

न च सत्यपि प्रातिपदिकत्वे धात्वर्थक्रियायां संख्याकारकयोरभावेन धात्वधिकारीयैर्लादिभिर्विशेषविहितत्वेन सुपो बाधेन च न दोष इति वाच्यम्, अहन्नित्यादौ नलोपापत्तेः ॥

नन्वधातुरिति निषेधो व्यर्थः, कार्यकालपक्षे प्रत्ययान्तपर्युदासेनैव निषेधसिद्धेः;

न च राजेत्यादिसिद्धये कार्यकालपक्षे प्रातिपदिकसंज्ञायां प्रत्ययलक्षणाप्रवृत्तेः 'न ङिसंबुद्ध्योः' इत्यत्र संबुद्धिग्रहणेन ज्ञापितत्वात् दोष एवेति वाच्यम्, हे सोमयाजिन् हे पयस्विन्नित्यादौ उत्तरसूत्रप्राप्तप्रातिपदिकत्वनिमित्तकनलोपवारणाय तस्य चारितार्थ्येन त्वदुक्त-

ज्ञापकत्वासंभवात् ॥

न चोत्तरसूत्रे 'दिदृक्षू दाक्षी' इत्यादौ प्रातिपदिकत्वव्यावृत्तये अप्रत्ययग्रहणानुवृत्तेः शब्दरत्ने उक्तत्वेन प्रत्ययान्तभिन्नस्यैव कृदन्तस्य तद्धितान्तस्य च ग्रहणान्न ज्ञापकतोच्छेद इति वाच्यम्, तथा सति कृदन्तस्य तद्धितान्तस्य च प्रत्ययान्तभिन्नत्वासंभवेन तस्यासंभवदुक्तिकत्वापत्तेः ॥

न च कृत्तद्धितभिन्नप्रत्ययान्तभिन्नं यत् कृत्तद्धितान्तमित्यर्थान्नासंभव इति वाच्यम्, तथा सति कारयाञ्चकारेत्यादौ आमन्ते प्रातिपदिकत्वानापत्तेः ॥

न च प्रत्यासत्त्या कृदन्ततद्धितान्तान्यतरप्रकृतिकप्रत्ययान्तभिन्नमित्यर्थादामन्ते न दोष इति वाच्यम्, एवं सति 'गार्ग्यायण' इत्यादौ तद्धितान्तप्रकृतिकप्रत्ययान्तत्वेन प्रातिपदिकत्वानापत्तेः ॥

न च कृदन्ततद्धितान्तान्यतरप्रकृतिकः यः कृत्तद्धितभिन्नः प्रत्ययः तदन्तभिन्नमित्यर्थात् 'गार्ग्यायण' इत्यादौ न दोष इति वाच्यम्, 'कृत्तद्धित—' इति सूत्रे अप्रत्ययग्रहणानुवृत्तिव्यावर्त्यभूते 'दिदृक्षू दाक्षी' इत्यादौ एकादेशस्य पूर्वान्तवत्त्वेन कृत्त्वात् तद्धितत्वात् परादिवद्भावेन तस्य सुप्त्वेऽपि कृत्तद्धितभिन्नत्वासंभवेन कृत्तद्धितान्तप्रकृतिककृत्तद्धितभिन्नप्रत्ययान्तत्वविरहेणातिव्याप्तेस्तादवस्थ्यात् ॥

न च यादृशकृत्तद्धितान्तत्वनिमित्तकप्रातिपदिकसंज्ञा चिकीर्षिता, तादृशकृत्तद्धितान्तप्रकृतिकप्रत्ययान्तभिन्नं यत् इत्येवार्थः; न तु प्रत्यये कृद्भिन्नत्वस्यापि निवेशः । तथा च 'गार्ग्यायण' इत्यादौ

फगन्तत्वनिमित्तकप्रातिपदिकसंज्ञा चिकीर्षितेति तदन्तप्रकृतिकप्रत्ययान्त-भिन्नत्वात् प्रातिपदिकत्वं तत्र सिद्धम् । 'दिदृक्षू, दाक्षी' इत्यादौ तु यादृ-शकृत्तद्धितान्तत्वमुपजीव्य प्रातिपदिकसंज्ञा चिकीर्षिता, तत्प्रकृतिक-प्रत्ययान्तत्वान्नातिव्याप्तिरिति वाच्यम्, शब्दरत्नोक्ते उत्तरसूत्रे अप्र-त्ययग्रहणानुवृत्तिव्यावर्त्यभूते 'दिदृक्षू, दाक्षी' इत्यादौ उभयत आश्रयणे अन्तादिवद्भावप्रतिषेधेन 'सप्तम्यधिकरणे च' इति निर्देशमूलकेन 'विभक्त्येकादेशो नान्तवत्' इति ज्ञापकेन वा प्रातिपदिकत्वव्यावृ-त्त्या अप्रत्ययग्रहणानुवृत्तेरनावश्यकत्वेन हे सोमयाजिन्, हे पयस्विन्नि-त्यादौ उत्तरसूत्रेण प्रातिपदिकत्वस्य सुस्थतया तत्र निषेधार्थं संबुद्धिग्रह-णस्यावश्यकत्वेन तस्य प्रातिपदिकसंज्ञायां प्रत्ययलक्षणाप्रवृत्तिज्ञापकत्वा-संभवादिति चेत्; न; प्राचीनमते "अन्तादिवत्सूत्रस्य" स्थानिवत्सूत्रेण गतार्थतया तद्विषये स्थानिवद्भावस्यैव वक्तव्यतया तेन कृत्त्वतद्धितत्व-योरतिदेशेन दिदृक्षू, दाक्षी इत्यादौ कृदन्तत्वेन तद्धितान्तत्वेन च प्राप्त-स्य प्रातिपदिकत्वस्य व्यावृत्तये अप्रत्ययग्रहणानुवृत्तेरावश्यकत्वात् । 'सप्तम्यधिकरणे च' इति निर्देशेन 'विभक्त्येकादेशो नान्तवत्' इत्यपूर्ववचनज्ञापनापेक्षया अप्रत्ययग्रहणानुवृत्तावेव तस्य ज्ञापकत्वौचि-त्यात् । अत एव समासग्रहणस्य नियमार्थत्वं भाष्योक्तं संगच्छते । अन्यथा सुराजित्यादौ कार्यकालपक्षे प्रत्ययान्तत्वेन प्रातिपदिकसंज्ञाया अप्राप्तौ तत्र प्रातिपदिकत्वार्थं समासग्रहणस्यावश्यकत्वेन नियमार्थत्वा-संभवेन भाष्यासंगतिः ॥

किंच, अधातुग्रहणाभावे धातोः प्रातिपदिकत्वे 'प्रातिपदिका-द्धात्वर्थे—' इति 'सर्वप्रातिपदिकेभ्यः—' इति च णिच्क्विपोरा-

पत्तिः। अपि च स्वार्थिकतद्धितानां सर्वतोऽन्तरङ्गत्वेन धातोरपि प्रवृत्त्यापत्तिः। किंच धात्वर्थप्रतियोगिकसंबन्धविवक्षायां पाकस्य कृतिरित्यादाविव षष्ठ्यापत्तिः। तथा पक्तुमिच्छतीत्यादाविव असाध्यभावस्यापि इषिकर्मत्वेन पाकमिच्छतीत्यर्थे पचधातोरपि द्वितीयापत्तिः॥

एतेन-अधातुग्रहणं व्यर्थम्, 'नलोपोऽतिङः' इति न्यासेनैव अहन्नित्यादौ निर्वाहादित्यपास्तम्; तथा न्यासे रामानित्यादौ नलोपापत्तेः नत्वविधेर्विसर्गनिवृत्त्या चरितार्थत्वात्। किंच सर्वस्मिन्नित्यादौ नलोपापत्तिः॥

न च नकारोच्चारणं व्यर्थमिति वाच्यम्, सर्वस्मिंश्चर इत्यादौ 'तत्पुरुषे कृति—' इति अलुकि नलोपे संज्ञाविधौ नलोपस्यासिद्धत्वेन इकारस्य 'संयोगे गुरु' इति गुरुसंज्ञायाम् 'गुरोरनृतः—' इति प्लुतसंपादनेन चारितार्थ्यात्॥

यदि तु 'इकोऽचि—' इति सूत्रे अज्ग्रहणस्य वारिपुचर इत्यादावुक्तरीत्या प्लुतवारणाय चारितार्थ्येन तस्य वैयर्थ्याभावेन तस्य 'न लुमताङ्गस्य' इति निषेधानित्यत्वज्ञापनपरभाष्यप्रामाण्येन, अत्रैव सूत्रे प्रत्ययान्तपर्युदासप्रत्याख्यानपरभाष्यप्रामाण्येन चेदृशानामनभिधानमेवेति विभाव्यते, तदा 'नलोपोऽतिङः' इति न्यासेऽपि दोषाभावेन अधातुग्रहणस्य पूर्वोक्तमेव फलमिति बोध्यमिति दिक्॥

प्रत्ययान्तपर्युदासाभावे हरिपु करोषीत्यादौ प्रातिपदिकसंज्ञायामौत्सर्गिकैकवचनापत्तिः। यदि च सत्येव गमके औत्सर्गिकैकवचनमित्याग्रहः, तदा काण्डे कुड्ये इत्यादौ 'ह्रस्वो नपुंसके—' इति ह्र-

स्वापत्तिर्दोषः ॥

न च सिद्धान्ते उदवोढामिति भाष्यप्रामाण्येन विकारकृतलक्ष्यभेदानाश्रयणात् 'लक्ष्ये लक्षणस्य—' इति न्यायेन नात्र ह्रस्वप्राप्तिरिति वाच्यम्, यस्य पूर्वमुद्देश्यता तन्मात्रविकारस्यैव लक्ष्यभेदानियामकत्वात् ॥

न चैवम् ऊखतुरित्यादावप्युक्तन्यायाप्रवृत्त्यापत्तिरिति वाच्यम्, तत्र द्वित्वस्य द्विःप्रयोगरूपत्वेन उत्तरखण्डेऽपि तत्त्वप्रत्यभिज्ञया सवर्णदीर्घस्य तन्मात्रस्थानिकविकारत्वेन तस्य लक्ष्यभेदानियामकत्वात्। अत एव राम इत्यत्र द्वित्वनिष्पन्नविसर्गस्य पुनर्न द्वित्वम्, प्रतीषिषतीत्यादौ द्वित्वानिष्पन्नेऽपि सन्त्वप्रत्यभिज्ञया 'सन्यतः' इति इत्वं च सिध्यति॥

यदि तु न चैतयोरर्थयोर्लिङ्गसंख्याभ्यां योगोऽस्तीति 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति सूत्रस्थभाष्यप्रामाण्येन विभक्त्यन्तस्य कारकशक्तिप्रधानतया क्लीबवदर्थवाचकत्वाभावान्न ह्रस्वापत्तिः;

न च काण्डे तिष्ठत इत्यादौ प्रथमायाः प्रातिपदिकार्थानुवादकत्वेन समुदायस्य क्लीबवदर्थवाचित्वं संभवतीति वाच्यम्, प्रथमाया अपि 'अभिहिते प्रथमा' इति न्यासानुरोधेन अन्याभिहितकारकशक्तिवाचितया तत्रापि कारकशक्तेरेव प्राधान्यात् विभक्त्यर्थस्य पूर्ववल्लिङ्गसंख्याभ्यां योगाभावेनादोषात् ॥

तस्मात् काण्डे इत्यादौ न दोष इति विभाव्यते, तदा हरिष्वित्यादौ 'सुपो धातु—' इति लुगापत्तिरेव दोषो बोध्यः। सुब्विधिसामर्थ्यं तु न, अलुक्समासे तस्य चारितार्थ्यात् ॥

ननु सिद्धान्ते 'काण्डे' इत्यादौ पूर्वान्तवद्भावेन प्रातिपदिकत्वात् परादिवद्भावेन सुप्त्वात् प्राप्तलुग्वारणाय 'सुपो धातु–' इति सूत्रे धातुसाहचर्येण प्रातिपदिकविषयेऽपि स्वप्रकृतीतरसमभिव्याहृतस्यैव सुपो ग्रहणस्यावश्यकतया हरिष्वित्यादौ तादृशसमभिव्याहाराभावेन न दोषः;

न च हरिषु तिष्ठतीत्यादौ स्वप्रकृतीतरस्य तिष्ठतीत्यस्य समभिव्याहारेण लुगापत्तिरिति वाच्यम्, अत्र प्रकृतीतरस्य सुब्लुक्प्रयोजकधर्मावच्छिन्नघटकस्यैव ग्रहणेनादोषात् ॥

न चैवमपि हरिष्वित्यादौ प्रकृत्यवयवमादाय दोषः, प्रकृतीतरेत्यनेन प्रकृतित्वाश्रयेतरस्यैव ग्रहणेन प्रकृत्यवयवस्यापि प्रकृतित्वाश्रयत्वेनादोषात् ॥

न चैवमपि 'काण्डेऽश्व' इत्यादौ एकादेशस्य पूर्वान्तवद्भावेन सुप्त्वात् परादिवत्त्वेन प्रातिपदिकावयत्वात् तादृशस्वप्रकृतीतरश्वशब्दसमभिव्याहाराच्च एकारस्य लुगापत्तिरिति वाच्यम्, अत्र लुक्प्रयोजकधर्मावच्छिन्नस्य लुक्प्रतियोगिसुबन्तावयवकस्यैव ग्रहणेन प्रकृते एश्व इत्यस्य तादृशसुबन्तावयवकत्वाभावेनादोषात् ॥

न चैवमपि अशब्दप्रकृतिकसप्तम्यन्तस्य ए इत्यस्य अश्वशब्देन सह पूर्वरूपेण एश्व इत्यत्र लुक्प्रयोजकधर्मावच्छिन्नस्य एश्वशब्दस्य लुक्प्रतियोगिसुबन्तावयवकत्वेन लुगापत्तिरिति वाच्यम्, समासग्रहणकृतनियमेन उपदेशप्राप्तस्यैव अतिदेशप्राप्तस्यापि प्रातिपदिकत्वस्य वारणसंभवात् ॥

किंच धातुसाहचर्येण अनतिदिष्टप्रातिपदिकस्यैव ग्रहणेन न दोषः। अत्र समभिव्याहृतत्वं तद्घटितसमुदायघटकत्वरूपम्। तेन राजपुरुष इत्यादौ पुरुषशब्दोत्तरसुपि नाव्याप्तिः। 'बहुपटव' इत्यादौ तु तादृशसमुदायावयवीभूतस्य स्वप्रकृतित्वाश्रयेतरस्य बहुपटु इत्यस्य समभिव्याहारान्नदोषः। एवं च लुक्प्रतियोगिसुबन्तावयवकस्य अनतिदिष्टलुक्प्रयोजकधर्मावच्छिन्नसमुदायस्यावयवो यो लुक्प्रतियोगिसुप्प्रकृतित्वाश्रयेतरस्तत्समभिव्याहृतस्य सुपो लुगित्यर्थः। तथा च हरिष्वित्यादौ तादृशसमभिव्याहाराभावान्न दोष इति चेत्, न; पञ्चमीसमासप्रकरणस्थशब्दरत्नोक्तरीत्या उक्तसाहचर्यस्य गुरुभूतत्वेन क्लिष्टतया तदपेक्षया लाघवेन प्रत्ययान्तपर्युदासस्यैव न्याय्यत्वादिति दिक्॥

अर्थवद्ग्रहणाभावे धनं वनमित्यादौ प्रतिवर्णं संज्ञायां नलोपाद्यापत्तिः॥

ननु धात्वादिपर्युदासेन त्रितयनिरूपितसादृश्यस्य लाघवादेकरूपेणैव ग्रहीतुमौचित्येन अर्थवत्त्वेनैव सादृश्यग्रहणादिष्टसिद्धौ सूत्रे अर्थवद्ग्रहणं व्यर्थम्;

न च "नञिवयुक्त"न्यायानित्यत्वज्ञापनार्थं तत्, तदनित्यत्वे भाष्यसंमतदृढतरफलाभावात्; सत्त्वे वा 'अकर्तरि च कारके संज्ञायाम्' इत्यत्र कारकग्रहणादेव तदनित्यत्वज्ञापनसंभवेन अर्थवद्ग्रहणस्य तदर्थत्वायोगादिति चेत्, न; उत्तरसूत्रे प्रशस्तार्थबोधनद्वारा तदन्तविधिसिद्धये अर्थवद्ग्रहणानुवृत्तेरावश्यकतया इह करणस्य स्पष्टार्थत्वात्॥

न च तदनुवृत्तावपि कथं तत्र तदन्तलाभ इति शङ्क्यम्, कृत्त-

द्धितयोरर्थवत्त्वाव्यभिचारेण तद्विशेषणसामर्थ्यात् मतुपः प्राशस्त्यद्योतकत्वेन तल्लाभसंभवात् । अर्थे प्राशस्त्यं च लौकिकपारमार्थिकार्थप्रत्यासन्नत्वरूपम् । ईदृशार्थवत्त्वं च कृदन्ततद्धितान्तयोरेव, न तु केवलकृत्तद्धितयोरिति सामर्थ्यात् 'संज्ञाविधौ—' इति निषेधं बाधित्वा "प्रत्ययग्रहणपरिभाषया तदन्तयोर्ग्रहणम् । अत एव 'सुप्तिङन्तम्—' इति सूत्रे "कृत्तद्धितेति सूत्रे अन्तग्रहणं कर्तव्यम् । न कर्तव्यम् । अर्थवदिति वर्तते । कृत्तद्धितान्तं चैवार्थवत् न केवलाः कृतस्तद्धिता वा अर्थवन्तः" इति भाष्यमुपादाय शास्त्रीयार्थग्रहणे अर्थवद्ग्रहणानुवृत्तिवैयर्थ्येन लौकिकार्थग्रहणे तदन्ते असंभवेन केवलेषु प्रत्ययेषु प्रकृतिषु च अर्थवत्त्वस्य शास्त्रकृत्कल्पितत्वेन अभिव्यक्त्या तदन्तेषु तस्य लौकिकार्थाव्यवहितसमीपवृत्तित्वेनाभिव्यक्ततरत्वम् । विभक्त्यन्तेषु तु लौकिकार्थस्य पूर्णतया अभिव्यक्ततमत्वमित्याशयेन 'लौकिकार्थप्रत्यासन्नोऽभिव्यक्ततरो योऽर्थः प्रत्ययान्तेषु लक्ष्यते, स आश्रीयते' इति कैयटेन व्याख्यातम् । एतदेवाभिप्रेत्य 'एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वं प्रशंसामूलम्' इति दीक्षितादिभिरुक्तम् । अत्र प्रसिद्धत्वं नाम उपस्थितिविषयत्वम् । एकार्थीभावेनेति तृतीयार्थः प्रयोज्यत्वम् । एवं च एकार्थीभावप्रयोज्योपस्थितिविषयत्वमर्थे प्रशस्तत्वम् । तादृशार्थवत्त्वं च कृत्तद्धितान्तेषु एकार्थीभावप्रयोज्यस्वविषयकोपस्थितिजनकत्वसंबन्धेन । तथा च एकार्थीभावप्रयोज्यार्थविषयकोपस्थितिजनकत्वं प्रशस्तार्थवत्त्वमिति फलितम् ॥

न च अ इव आचरिता इता इः दूरम् इयान् इत्यादौ केवलकृत्तद्धितयोरपि उक्तार्थवत्त्वसंभवेन कथं तदन्तविधिसंपादकत्वं तस्येति वाच्यम्, अस्यामवस्थायां कृत्तद्धितांशे तदन्तविध्यभावेन अ अम् इ,

इदम् सु इयत् इत्यत्र प्रातिपदिकसंज्ञाया एवाभावेन सुब्लुगल्लोपयोरप्रवृत्त्या तादृशरूपस्यैवाप्रसिद्धत्वेन तत्र चारितार्थ्यस्य दुर्वचत्वात् । इदं च पूर्वसूत्रे प्रत्ययान्तपर्युदासमभ्युपेत्य । वस्तुतस्तु अस्यामवस्थायां पूर्वसूत्रे प्रत्ययान्तपर्युदासाभावेन अ अस् इ इत्यत्र सुब्लुगर्थं कृतायाः संज्ञाया "एकदेशविकृत"न्यायेन इशब्देऽप्यानेतुं शक्यत्वेन तदन्तग्रहणस्य औपगवाद्यर्थताया एव वक्तव्यतया तत्सामर्थ्यात्तदन्तविधिः ॥

यद्यपि कृदंशे अ इवाचरिता इता इत्यादौ चारितार्थ्यं सुवचम्, तथापि तद्धितसाहचर्येण श्रूयमाणप्रकृतिककृत एव ग्रहणेन सिद्धान्ते एकाज्भ्य आचारक्विपोऽनभिधानेन च तस्य तदन्तविधिज्ञापकत्वसंभव इति प्राञ्चः ॥

नव्यास्तु 'सुप्तिङ्—' इति सूत्रस्थोक्तभाष्यप्रामाण्येन प्रत्ययपर्युदासाकरणलाघवानुरोधेन पूर्वोत्तरसूत्रयोरैकरूप्यानुरोधेन च अर्थवद्ग्रहणसामर्थ्येन एतत्संज्ञाफलभूतविभक्तीतरसमभिव्याहारानपेक्षया लोके अर्थविषयकबोधजनकत्वरूपमर्थवत्त्वं गृह्यते । अत्र एतत्पदं प्रातिपदिकशब्दपरम् । विभक्तीतरपदं विभक्तित्वावच्छिन्नप्रतियोगिताकभेदवत्परम् । समभिव्याहारश्च पौर्वापर्यरूपः संबन्धः । तदपेक्षा च तदभावप्रयोज्याभावप्रतियोगित्वम् । अनपेक्षत्वं च तादृशप्रतियोगित्वाभावः । तृतीयार्थो वैशिष्ट्यम् । तथा च एतत्संज्ञासाध्यविभक्तित्वावच्छिन्नप्रतियोगिताकभेदवन्निरूपितपौर्वापर्यरूपसंबन्धाभावप्रयोज्याभावप्रतियोगित्वाभावविशिष्टबोधजनकत्वमिति फलितम् । तथा च डित्थो राम औपगवो राजपुरुष इत्यादौ एतत्संज्ञा प्रातिपदिकसंज्ञा तत्फलभूता या विभक्तिः सुब्विभक्तिः तदितरत् घटादिपदं तत्समभिव्याहाराभावप्रयोज्याभावप्रतियोगि-

त्वाभावविशिष्टं यत् स्वनिष्ठं बोधजनकत्वं तदाश्रयत्वाल्लक्षणसमन्वयः। अत्र वृत्त्या अर्थबोधजनकत्वं विवक्षणीयम्, अन्यथा अनुकरणेषु सादृश्यादिना बोधजनकत्वमादाय अभेदपक्षेऽपि प्रातिपदिकसंज्ञापत्तिः। वृत्त्या अर्थबोधकत्वमात्रोक्तौ प्रत्ययेष्वतिव्याप्तिः; अत इतरसमभिव्याहारानपेक्षयेति। राम इत्यादौ केवलप्रकृतेः सुप्प्रत्ययसमभिव्याहारमन्तरा लोके अर्थबोधाजनकत्वात् अव्याप्तिवारणाय-विभक्तीति। 'दधि मधु' इत्यादेः संग्रहाय नञ्द्वयम्। अत्र प्रमाणं तु धातुप्रत्ययान्तयोः पर्युदास एव। अन्यथा 'अहन्, काण्डे' इत्यादौ एतत्संज्ञासाध्यविभक्त्यपेक्षाया अभावेन तदप्राप्त्या तद्वैयर्थ्यं स्पष्टमेव। फलभूतेत्यन्तं विशेषणं तु ऊर्णुनुवतुरित्यत्र प्रातिपदिकत्वेन 'लघावन्ते' इति स्वरव्यावृत्तये॥

न चाधातुरिति निषेधः शङ्क्यः, द्वित्वस्थले द्विरुक्तसमुदायस्य भ्वादिपठितानुपूर्व्यवच्छिन्नत्वाभावेन भ्वादित्वस्य दुरुपपादतया धातुत्वासंभवात्॥

न च जजागारेत्यादौ आद्यैकाज्द्वित्वविषये "तन्मध्यपतित"न्यायेन विशिष्टे तद्बुद्ध्या धातुत्वक्रियावाचकत्वादिवत् अन्त्यद्वित्वविषये ऊर्णुनुवतुरित्यादावपि पपाचेत्यादौ उत्तरखण्डे धातुत्ववत् अत्र नुशब्दे धात्ववयवत्वबुद्धेर्निराबाधतया आगमरूपावयवसंनिधाने तद्विशिष्ट एव धातुत्वादिबुद्धिवत् अत्रापि विशिष्टे धातुत्वादिबुद्धेरुवङादिप्रवृत्त्यर्थमावश्यकत्वेन तेनैव अधातुरिति निषेधप्रवृत्त्या न दोष इति वाच्यम्, एवमपि देवदत्तः पचतीत्यादौ विभक्तिप्राग्भागस्य प्रातिपदिकत्वव्यावृत्तये तस्यावश्यकत्वात्॥

न च प्रथमान्तार्थस्य आख्यातार्थ एवान्वयेन तिपः प्राग्वर्ति-

समुदायस्यानर्थकत्वादेव न दोष इति वाच्यम्, एवमपि देवदत्तेन पच्यत इत्यादौ तृतीयान्तार्थस्य धात्वर्थ एवान्वयेन विकरणानां कर्तृकर्मादि-द्योतकत्वेन विभक्तिप्राग्भूतसमुदाये दोषापत्तेः ॥

न च समासकृतनियमेन निस्तारः, उत्तरखण्डस्यापि स्वातन्त्र्येण प्रयोगार्हस्यैव तत्र ग्रहणेन तन्नियमाप्रवृत्तेः ॥

न च एतत्संज्ञाफलभूतेत्यपहाय सुबितरेत्येवोच्यतां लाघवात् । तथा चात्र न दोष इति वाच्यम्, राज्ञः पुरुष इत्यादौ सुप्रत्ययप्राग्व-र्तिनो राज्ञः पुरुषेति समुदायस्य प्रातिपदिकत्वापत्तेः । एतत्संज्ञेत्युक्तौ तु एतत्पदस्य चिकीर्षितेत्यर्थकत्वेन पुरुषशब्दप्रकृतिकस्य सोः पुरुष-शब्दप्रवृत्तसंज्ञाफलभूतत्वेऽपि चिकीर्षितसमुदायसंज्ञाफलभूतत्वाभावेन सो-स्तदितरत्वात् तत्समभिव्याहारापेक्षया अर्थबोधकत्वान्न दोषः ॥

न चैवं सत्येतत्संज्ञाज्ञानमन्तरेण विभक्तौ तत्फलभूतत्वज्ञानासंभ-वेन एतत्संज्ञाफलभूतेत्यादिघटितार्थवत्त्वज्ञानमन्तरा एतत्संज्ञाज्ञानासंभवा-दन्योन्याश्रय इति वाच्यम्, प्रातिपदिकात्स्वादयो भवन्तीति सामान्य-बोधमात्रेण विभक्तौ बुद्धिस्थसंकेतफलभूतत्वज्ञानस्य सुलभत्वेन घटादि-शब्देषु तद्भिन्नत्वबुद्धेः संभवेन तत्समभिव्याहारानपेक्षया रामेत्यादि-प्रकृतेरर्थबोधकत्वस्य सुलभत्वेन अन्योन्याश्रयवारणसंभवात् ॥

ननु बोधजनकत्वमित्यत्र बोधपदेन किं पदार्थोपस्थितिर्विवक्षिता, उत शाब्दबोधः? नाद्यः, प्रत्ययेनापि स्वार्थोपस्थितौ प्रकृतिसमभिव्या-हाररूपाकाङ्क्षाज्ञानस्य कारणत्वाभावेन प्रत्ययेष्वतिव्याप्तिवारणासंभ-वात् । नापि द्वितीयः, केवलेन प्रथमान्तपदेन क्रियावाचकपदासम-भिव्याहृतेन शाब्दबोधानुदयाल्लक्षणस्यासंभवापत्तेः;

न च प्रत्ययस्य द्योतकत्वेन वाचकसमभिव्याहारमन्तरा द्योतकत्वासंभवः, तथा सति वृत्त्या अर्थबोधकत्वाभावादेव तदप्राप्त्या ईदृशार्थवत्त्वपरिष्कारवैयर्थ्यापातादिति चेत्, न; अन्वयव्यतिरेकाभ्यां स्वार्थोपस्थितिं प्रति स्वप्रयोगप्रयोजकस्य कारणत्वेन प्रत्ययार्थोपस्थितौ प्रकृतेः प्रकृत्यर्थोपस्थितौ प्रत्ययस्य च कारणत्वेन प्रत्ययेष्वातिव्याप्तेरभावेन अत्रत्यबोधपदेन पदार्थोपस्थितेरेव ग्रहणात् ॥

न च प्रत्ययेष्विव कृदाद्यन्तेष्वपि 'प्राग्विभक्तेस्तदन्तस्य तथैवार्थो न विद्यते' इति हर्युक्तेर्बोधकत्वासंभवादसंभव एवेति वाच्यम्, लोके अनुभवतीत्यादौ धातोरनुभवार्थकत्वेऽपि अनुसमभिव्याहाराभावे तदर्थाप्रतिपत्तिवत् सुपां द्योतकत्वेन तत्समभिव्याहारमन्तरा प्रकृतेरर्थबोधकत्वासंभवेऽपि द्योतकसुप्समभिव्याहारे लोके स्वार्थबोधकत्वे बाधकाभावात् । 'प्राग्विभक्तेः—' इत्यादिहरिग्रन्थस्य तु द्योतकसमभिव्याहाराभावे अर्थवत्त्वं नास्तीत्यर्थ इति न तद्विरोधः। एतदेव द्योतयितुं 'लोके' इति । एवं च श्रोतृसमवेतबोधजनकत्वं लोकेऽर्थबोधजनकत्वमिति फलितमित्याहुरिति दिक् ॥

अत्रोच्यते —

वृत्त्या अर्थबोधजनकत्वमर्थवत्त्वमिति प्राचीनोक्तमेव युक्तम्, न तु एतत्संज्ञेत्यादि, गौरवान्मानाभावात्फलाभावाद्भाष्यविरोधाच्च। तथाहि— वृत्त्या अर्थबोधकत्वमर्थवत्त्वम् । वृत्तिश्च क्वचिदेकार्थीभावरूपा, क्वचित्केवलबोधकतारूपा । अत एव "पूर्वसूत्रेण सिद्धे समासग्रहणं नियमार्थमिति भाष्यं संगच्छते । उत्तरसूत्रे अर्थवत्पदानुवृत्तिसामर्थ्यात् एकार्थीभावरूपैव सेति न पारिभाषिकार्थवत्त्वपरिकल्पनप्रयुक्तं गौरवं प्राची-

नमते । त्वन्मते तु पारिभाषिकार्थवत्त्वाश्रयणात् गौरवम् । किंच न त्वदुक्तार्थे दृढतरं मानम्; नापि फलम् ॥

न च प्रत्ययेष्वतिव्याप्तिवारणाय तथाश्रयणमावश्यकमिति वाच्यम्, किंचिन्निष्ठविषयतानिरूपितविषयताशालिपदार्थोपस्थितिजनकत्वरूपार्थवत्त्वाभावेन हरिष्वित्यादौ प्रत्ययेन पृथक् स्वार्थोपस्थितौ स्वप्रकृतिसमभिव्याहारस्य कारणत्वकल्पने मानाभावेन त्वदुक्तार्थवत्त्वस्यापि तत्र संभवेन त्वन्मतेऽपि तत्र प्रातिपदिकसंज्ञाव्यावृत्तये प्रत्ययपर्युदासस्यावश्यकत्वात् । किंच नव्यमते 'पुंयोगात्—' इति सूत्रस्थभाष्यविरोधः । तत्र हि 'गतिकारकोपपदानाम्—' इति परिभाषाया अभावे कुम्भोपपदात् कृधातोरण्प्रत्यये स्वार्थद्रव्यलिङ्गसंख्याकारकप्रयुक्तकार्याणां क्रमिकत्वेन सुपः पूर्वं ङीपि ततः सुपि ततः समासे तस्यापत्येन योगे अनुपसर्जनस्त्रीप्रत्यये तदादिनियमाभावेन समुदायस्यापि स्त्रीप्रत्ययान्तत्वेन 'स्त्रीभ्यो ढक्' इति ढकः, अवयवात् 'द्व्यचः' इति ढकश्च प्राप्तौ परत्वादन्तरङ्गत्वाच्च अवयवादेव ढकि समुदायस्य वृद्धिस्वरयोरनापत्त्या कौम्भकारेयासिद्धिरित्युक्तम् । तथा 'अनुपसर्जनात्' इति सूत्रेऽपि भाष्ये द्वितीयतदन्तविध्यभावे उक्तरीत्या तदसिद्धिरित्युक्तम् । नव्यमते कारेत्यस्य निरुक्तार्थवत्त्वाभावेनाप्रातिपदिकत्वात् ततो ङीप्सुपोरप्राप्त्या अवयवात् ङीप्ढकोरापादनपरभाष्यासंगतिः । मम तु 'गतिकारक—' इति परिभाषया कृदन्तेन समासानङ्गीकारे नियमेन पूर्वसूत्रेणापि समुदायस्याप्रातिपदिकत्वात् अवयवादेव ङीबिति तदापादनं युक्तमिति प्रथमा ॥

अथ नव्याः— यत्तु— पूर्वसूत्रे वृत्त्या अर्थबोधजनकत्वमर्थवत्त्वम् । वृत्तिश्च एकार्थीभावरूपा केवलबोधकतारूपा च । उत्तर-

सूत्रे अर्थवद्ग्रहणानुवृत्तिसामर्थ्यादेकार्थीभावरूपैवेति, तदयुक्तम्; पूर्वोत्तरसूत्रयोर्वैरूप्यापत्त्या शब्दाधिकाराश्रयणापत्तेः। प्रत्ययेषु दोषवारणाय प्रत्ययपर्युदासाश्रयणे गौरवापत्तेश्च। न च पूर्वोक्तरीत्या त्वन्मतेऽपि प्रत्ययपर्युदास आवश्यक इति वाच्यम्, प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमेन प्रकृत्यर्थनिष्ठविषयतानिरूपितविषयताशाल्युपस्थितिजनकत्वात् तथोपस्थितये प्रकृतिसमभिव्याहारज्ञानस्य कारणतया इतरसमभिव्याहारानपेक्षया अर्थबोधकत्वाभावेन प्रत्ययेष्वतिव्याप्तेर्वारणसंभवात्। यदपि— 'पुंयोगात्—' इति सूत्रभाष्यविरोध इति, तदपि न; त्वन्मतेऽपि 'कृद्ग्रहणे गति—' इति परिभाषया गतिकारकसमभिव्याहारे विशिष्टस्यैव कृदन्तत्वेन केवलस्य कारेत्यस्य कृदन्तत्वाभावेन उत्तरसूत्रेण तावन्मात्रस्य प्रातिपदिकत्वाप्राप्त्या पूर्वसूत्रेणापि प्रत्ययान्तपर्युदासात्तदप्राप्त्या ततो ङीपोऽसंभवेन तदापादनपरभाष्यस्यैकदेश्युक्तित्वादिति द्वितीया ॥

अथ प्राञ्चः— यदुक्तम्— पूर्वोत्तरसूत्रयोर्वैरूप्याच्छब्दाधिकाराश्रयणापत्तिरिति, तन्न; 'बहुगण—' इति सूत्रे स्वरूपपरस्य संख्यापदस्य उत्तरसूत्रे "ष्णान्ता" इत्यादौ संख्याबोधकत्वात् वैरूप्येण शब्दाधिकारवत् पूर्ववाक्याबोधितार्थबोधकत्वाभावेनात्र शब्दाधिकारासंभवात्। यदपि— प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति नियमेन प्रत्ययेषु न दोष इति, तदपि न; तेन नियमेन प्रकृत्यर्थान्वितप्रत्ययार्थस्यैव अन्यत्रान्वयः। अन्यस्यापि प्रकृत्यर्थान्वित एव प्रत्ययार्थे अन्वयः, न तु प्रकृत्यर्थानन्वितकेवलप्रत्ययार्थे इत्येव बोध्यते; न तु केवलेन प्रत्ययेन स्वार्थोपस्थितिरेव नेति। अतः प्रत्ययेषु दोषवारणाय प्रत्ययपर्युदासस्तवाप्यावश्यकः। यदपि— गतिकारकसमभिव्या-

हारे "कृद्ग्रहण" परिभाषया विशिष्टस्यैव कृदन्तत्वेन अवयवस्य कृदन्तत्वाभावात् उत्तरसूत्रेण प्रातिपदिकत्वाप्राप्त्या प्रत्ययान्तत्वात् पूर्वसूत्रेणापि कारेत्यस्य प्रातिपदिकत्वाप्राप्त्या तद्भाष्यासंगतिस्त्वन्मतेऽपीति, तदप्यसत्; "कृद्ग्रहण" परिभाषायाम् "अपि" शब्देन गतिकारकसमभिव्याहारे विशिष्टस्येव केवलस्यापि कृदन्तत्वबोधनेन उत्तरसूत्रेण कारेत्यस्य प्रातिपदिकत्वसंभवेन मन्मते भाष्यासंगतेरभावात्। किंच पारिभाषिकार्थवत्त्वस्य प्रातिपदिकसंज्ञाप्रयोजकत्वकल्पने गङ्गेत्यादौ विभक्तिभिन्नस्त्रीप्रत्ययसमभिव्याहारमन्तरेण अबोधकत्वात् टाप्प्रकृतिभागस्य प्रातिपदिकसंज्ञानापत्तिरिति तृतीया ॥

अथ नव्याः— यदुक्तम्— संख्यापद इवार्थवत्पदे पूर्वसूत्राबोधितार्थबोधकत्वाभावेन शब्दाधिकारो नेति, तन्न; उत्तरसूत्रे अर्थवद्ग्रहणानुवृत्तिसामर्थ्येन मतुपः प्राशस्त्यद्योतकतया पूर्वोक्तप्रशस्तार्थकस्यैव ग्रहणेन पूर्वोत्तरसूत्रयोरन्यूनानतिरिक्तार्थबोधकत्वाभावेन वैरूप्याच्छब्दाधिकारस्य दुर्वारत्वात्। यदपि— पारिभाषिकार्थवत्त्वाश्रयणेऽपि प्रत्ययपर्युदास आवश्यक इति, तदपि न; 'इङ् अध्ययने' इत्यनेन अध्ययनरूपार्थे इङ्धातोः शक्तिग्रहेऽपि केवलस्येङो लोके अप्रयोगेण तावन्मात्रादर्थोपस्थितेरदर्शनेन अधिसमभिव्याहृतादेव अर्थबोधदर्शनेन अन्वयव्यतिरेकाभ्यामधिसमभिव्याहारस्य अर्थबोधे कारणत्ववत् अत्रापि प्रत्ययमात्रस्य प्रयोगाभावेन लोके प्रकृतिसमभिव्याहृतादेव अर्थबोधदर्शनेन तेनार्थोपस्थितौ प्रकृतिसमभिव्याहारस्य कारणत्वेन पारिभाषिकार्थवत्त्वासंभवात् प्रत्ययपर्युदासस्यानावश्यकत्वात्। यदपि— "कृद्ग्रहण" परिभाषायाम् "अपि" शब्देन केवलस्यापि कृदन्तत्वबोधनान्न दोष इति, तदपि न; अपिशब्देन गतिकारकसमभिव्याहारेऽपि केवलस्य ग्रहणे

सांकुटिनमित्यत्र 'गतिकारक—' इति परिभाषया कृदन्तेन समासे "कृद्ग्रहणपरिभाषया विशिष्टादेवाणि न दोष इति भाष्यासंगत्यापत्तेः। त्वन्मते केवलस्य कुटिन्नित्यस्यापि इनुणन्तत्वानपायेन ततोऽपि कदाचित् अणि संकौटिनमित्यस्याप्यापत्त्या दोषस्य दुर्वारत्वात्। मन्मते 'अपि' शब्दात्तदसमभिव्याहारे केवलस्य ग्रहणेन प्रकृते केवलस्येनुणन्तत्वाभावेन न दोषः। तथा च कारेत्यस्याकृदन्तत्वेन अप्रातिपदिकत्वात् ततो ङीप्ढकोरापादनपरं भाष्यमेकदेशिन एवेति न तद्विरोधः कार्यकरः। यदपि— गङ्गेत्यादावव्याप्तिरिति, तदपि न; एतत्संज्ञेत्यादिलक्षणे विभक्तिपदस्य प्रत्ययमात्रोपलक्षणत्वेनादोषात्। किंच प्राचीनमते 'पञ्चनावप्रिय' इत्यत्र पञ्चनावेत्यस्यापि तद्धितान्तत्वेन प्रातिपदिकत्वापत्त्या टित्त्वात् ङीपि तदसिद्धिः स्यादिति चतुर्थी ॥

अथ प्राञ्चः—यदुक्तम्—पूर्वोत्तरसूत्रयोर्वैरूप्यापत्तिरिति, तन्न; उत्तरसूत्रे सामान्यतोऽर्थवतो ग्रहणे तदनुवृत्तिवैयर्थ्यापत्त्यानुपपत्तिप्रतिसंधानेन तस्मिन् संकोचकल्पनेऽपि पूर्वसूत्रे तथा संकोचकल्पने मानाभावः; अन्यथा "असंजात"न्यायविरोधापत्तेः। अतोऽनुवृत्तिसामर्थ्येन मतुपा प्राशस्त्यविज्ञानेन तत्र पारिभाषिकार्थवत्त्वकल्पनेऽपि पूर्वसूत्रे तथा कल्पने मानाभावेन पूर्वोत्तरसूत्रयोर्वैरूप्यस्य तवापि तुल्यत्वात्। अत एव प्रत्ययेषु दोषवारणाय प्रत्ययपर्युदासस्तव मतेऽप्यावश्यकः। यदपि—उक्तपरिभाषाभ्यां सांकुटिनमिति साधनपरभाष्यप्रामाण्येन गतिकारकसमभिव्याहारे विशिष्टस्यैव कृदन्तत्वमिति, तदपि न; तथा सति देवदत्तेन कृतमित्यत्रापि "कृद्ग्रहण"परिभाषया समुदायस्यैव कृदन्तत्वेन अवयवस्य कृतमित्यस्य अकृदन्तत्वादुत्तरसूत्रेण प्रत्ययान्तत्वात्पूर्वसूत्रेणापि प्रातिपदिकत्वानापत्तेः। यदपि—"कृद्ग्रहण"परिभाषया-

"मपिशब्देन केवलस्यापि समुच्चयपक्षे संकौटिनमित्यस्याप्यापत्त्या पाक्षिकानिष्टापत्तिर्दुर्वारेति, तदपि चिन्त्यम्; तत्र हि सांकुटिनमित्यत्र समुदायस्य समासनिमित्तकप्रातिपदिकत्वसिद्धये "गतिकारक" परिभाषामुपन्यस्य, पुनस्तत्रैव समुदायस्येनुणन्तत्वसिद्धये "कृद्ग्रहण" परिभाषामुपन्यस्य, एवं तर्ह्यत एव कृदन्तत्वात् प्रातिपदिकसंज्ञापि सिध्यतीति पूर्वस्य वैयर्थ्यमाशङ्क्य 'कृत्तद्धित—' इति सूत्रेऽप्येतत्परिभाषाप्रवृत्तौ मूलकेनोपदंशमित्यादौ लुक् स्यात्। तथा प्रकरणमित्यादौ समुदायस्यैव कृदन्तत्वेन प्रातिपदिकत्वात् समासाभावात् समासावयवीभूतोत्तरपदनिमित्तकस्वरो न स्यादित्युक्त्वा, द्वे ह्यत्रापि प्रातिपदिकसंज्ञे समुदायकृदन्तत्वनिमित्तिका अवयवकृदन्तत्वनिमित्तिका च। तत्र मूलकेनोपदंशमित्यादौ समुदायकृदन्तत्वनिमित्तिका समासकृतनियमेन सुपरिहरा। अवयवकृदन्तत्वनिमित्तकप्रातिपदिकत्वमादाय अवयवात्सुपि समासे प्रकरणमित्यादौ स्वरोऽपि सिध्यतीति पूर्वोक्तदोषे वारिते, ततः— 'गतिकारकोपपदानाम्' इति परिभाषारम्भवादिना तुल्यन्यायात् सांकुटिनम्, व्यावक्रोशी, कुम्भकारीत्यादावपि अवयवस्य कृदन्तत्वात् प्रातिपदिकत्वेन अणञ्ङीपां सुपः प्रागन्तरङ्गत्वेन प्रवृत्त्यापत्त्या उत्तरपदे वृद्ध्याद्यापत्तिः। अत उत्तरपदे प्रातिपदिकसंज्ञाप्रयोज्यप्रत्ययोत्पत्तेः प्रागेव कृदन्तेन समास इत्यर्थकेन 'गतिकारक—' इति वचनेन प्रत्ययोत्पत्तेः प्रागेव समासे तु न दोष इति निगमितम्। समासोत्तरं तु वृत्तावेकार्थीभावेन अवयवार्थस्य पृथगनुपस्थित्या तन्मात्रगतस्यार्थस्य प्रत्ययेन प्रतिपिपादयिषायाः कर्तुमशक्यत्वेन नावयवात् तदापत्तिरिति न तद्भाष्यविरोधः। यदपि—पञ्चनावप्रिय इत्यादौ पञ्चनावेत्यस्य तद्धितान्तत्वेन प्रातिपदिकसंज्ञापत्त्या ततो ङीबापत्तिरिति, तदपि न, त्रयाणां पदा-

नामैकार्थीभावे द्वयोः पदयोर्निष्कृष्य स्वार्थमात्रविषयकाखण्डोपस्थितिजनकत्वरूपैकार्थीभावस्य वक्तुमशक्यतया 'राजपुरुष' इत्यादौ अवयव इव पञ्चनावेत्यत्रापि अपृथगुपस्थितिजनकत्वरूपैकार्थीभावाभावेन प्रातिपदिकत्वापत्तेरसंभवात् । एतदेवाभिप्रेत्य 'यस्य प्रातिपदिकसंज्ञा चिकीर्षिता तन्मात्रवृत्त्येकार्थीभावस्तत्संज्ञाप्रयोजकः' इति शब्दरत्ने उक्तम् । प्रकृते बहुव्रीहिप्रयुक्तसमुदायैकार्थीभावेनैवावयवयोरपि नान्तरीयकतया समाससंभवेन अत्रैकार्थीभावस्य पञ्चनावेत्येतन्मात्रवृत्तित्वाभावात् । यदपि—एतत्संज्ञेत्यादिलक्षणे विभक्तिपदस्य प्रत्ययमात्रपरत्वात् गङ्गेत्यादौ न दोष इति, तदपि न; विभक्तिपदस्य प्रत्ययपरत्वे पक्त्रिमं सांकुटिनमित्यादौ क्त्रिप्रत्ययान्तेनुणन्तनिष्ठकृदन्तत्वनिमित्तकचिकीर्षितप्रातिपदिकसंज्ञाफलभूतमप्प्रत्ययाणप्रत्ययेतरमबणन्तानिष्ठताद्धितान्तत्वनिमित्तकप्रातिपदिकसंज्ञाफलभूतसमुदायोत्तरवृत्तिसुबपेक्षत्वेन प्रातिपदिकत्वानापत्तेः । तस्मात् प्राचोक्तमेव युक्तमिति पञ्चमी ॥

अथ नव्याः— यदुक्तम्—अर्थवद्ग्रहणानुवृत्तिसामर्थ्यादुत्तरसूत्रे तथा कल्पनेऽपि पूर्वत्र तथाकल्पने मानाभाव इति, तन्न; पूर्वसूत्रेऽपि धात्वादिपर्युदासेनैव निरर्थकव्यावृत्त्या फलान्तरासंभवेन प्रत्ययपर्युदासाकरणलाघवानुरोधेन च सामर्थ्यात्तत्रापि तथा कल्पने बाधकाभावात् । अत एव 'सात्पदाद्योः' इति सूत्रे सातिग्रहणं चरितार्थम् । यदपि—"कृद्ग्रहणपरिभाषायामपिशब्देन केवलस्याग्रहणे देवदत्तेन कृतमित्यादौ कृतमित्यस्य प्रातिपदिकत्वानापत्तिरिति, तदपि न; 'कृत्तद्धित—' इति सूत्रेण "कृद्ग्रहणपरिभाषया समुदायस्य कृदन्तत्वात् प्राप्तप्रातिपदिकत्वस्य समासग्रहणकृतनियमेन परत्वात् बाधेन तत्र "कृद्ग्रहणपरिभाषोपस्थितौ फलाभावात्तया तत्र "प्रत्ययग्रहणपरिभाषया बाधासं-

भवात् “प्रत्ययग्रहणपरिभाषया कृतशब्दस्य कृदन्तत्वेन प्रातिपदिकत्वे बाधकाभावात् । परिभाषायामपिशब्दोच्चारणं तु गतिकारकासमभिव्याहारे केवलस्य ग्रहणार्थम्; अन्यथा व्यावक्रोशीत्यादौ ‘कर्मव्यतिहारे णच् स्त्रियाम्’ इति णचि ‘णचः स्त्रियाम्’ इत्यञि स्त्रीप्रत्यये तदादिनियमनिषेधेन तत्र “प्रत्ययग्रहणपरिभाषया अप्राप्त्या अस्यास्तत्र चारितार्थ्येन कृद्ग्रहणविषये अनया“प्रत्ययग्रहणपरिभाषायाः परत्वात् बाध एव स्यात् । यदपि—समासोत्तरं वृत्तावेकार्थीभावेन अवयवार्थस्य पृथगनुपस्थित्या तन्मात्रगतस्यार्थस्य प्रत्ययेन प्रतिपिपादयिषायाः कर्तुमशक्यत्वेन अवयवान्न तदापत्तिरिति, तदपि न; “प्रत्ययग्रहणपरिभाषायाः परमगार्ग्यायण इत्युदाहरणपरभाष्यप्रामाण्येन ‘अनुपसर्जनात्’ इति सूत्रे कारीशब्दात् ढगापादनपरभाष्यप्रामाण्येन च निष्कृष्यैकार्थीभावाभावेऽपि वृत्तेः स्वीकारेण अपिशब्देन केवलस्यापि समुच्चये सांकुटिनमित्यादौ अवयवादणापत्तेर्दुर्वारत्वात् । यदपि—यस्य प्रातिपदिकसंज्ञा चिकीर्षिता तन्मात्रवृत्तिरेवैकार्थीभावस्तत्प्रातिपदिकसंज्ञाप्रयोजक इत्यङ्गीकारात् पञ्चनावप्रिय इत्यत्र न दोष इति, तदपि न; एकार्थीभावस्य शास्त्रैकसमधिगम्यतया बहुव्रीहाविव तत्पुरुषेऽपि तत्कल्पनाया दुर्वारत्वेन दोषस्य दुर्वारत्वात् । अन्यथा समुदायवृत्त्येकार्थीभावस्यैव अवयववृत्तिप्रयोजकत्वाङ्गीकारे चित्राजरद्गुरित्यादावपि ‘पूर्वकालैक—’ इति समासापत्त्या जरच्छब्दस्यैव पूर्वनिपातापत्तिः। उत्तरयोः समासे टजापत्तिश्च, चित्रशब्दस्य पुंवद्भावापत्तिश्च । अत एव ‘द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्’ इति वार्तिकारम्भः संगच्छते । अन्यथा समुदाये एकार्थीभावे सति अवयवयोर्व्यपेक्षाया असंभवेन अवयवयोरपि तदावश्यकतया तत्र महाविभाषया व्यपेक्षाया

बोधयितुमशक्यतया तत्पुरुषे नित्यत्वस्य स्वयमेव सिद्धतया तद्वैयर्थ्यं स्पष्टमेव । यदपि—पक्त्रिमं सांकुटिनमित्यादौ अव्याप्तिरिति, तदपि न; एतत्संज्ञेत्यनेन करिष्यमाणसंज्ञाया एव ग्रहणेन क्त्रिप्रत्ययान्तमन्तयोरिनुणन्ताणन्तयोश्च संज्ञायाः कृदन्तत्वेन तद्धितान्तत्वेन च करिष्यमाणतया समुदायोत्तरवृत्तिसुपः करिष्यमाणसंज्ञाफलभूतविभक्तिभिन्नत्वाभावेनादोषादिति षष्ठी ॥

अथ प्राञ्चः—यदुक्तम्—"कृद्ग्रहण"परिभाषायामपिशब्देन गतिकारकसमभिव्याहारे केवलस्य न ग्रहणमिति, तदसत्; तथा सति प्रकृतमित्यत्रापि केवलस्य क्तान्तत्वानापत्त्या धर्मिग्राहकमानविरोधापत्तेः । यदपि — 'कृत्तद्धित—' इति सूत्रे "कृद्ग्रहण"परिभाषोपस्थितौ फलाभावात्तया "प्रत्ययग्रहण"परिभाषाया बाधासंभावात् देवदत्तेन कृतमित्यादौ न दोष इति, तदपि न; त्वन्मते दत्त इत्यत्र पदसंज्ञाबाधनार्थमेव भसंज्ञाप्रवृत्तिवत् "प्रत्ययग्रहण"परिभाषाबाधनार्थमेव "कृद्ग्रहण"परिभाषाप्रवृत्तेरपि सुवचत्वात् । मम तु अपिशब्देन "प्रत्ययग्रहण"परिभाषायाः समुच्चयेन तेन तद्बाधासंभवात् 'कृत्तद्धित—' इति सूत्रे परिभाषाप्रवृत्तौ फलाभावात् नास्याः प्रवृत्तिरिति सिद्धान्तः । अत एव 'कृत्तद्धित—' इति सूत्रे "कृद्ग्रहण"परिभाषाप्रवृत्तौ मूलकेनोपदंशं प्रकरणमित्यादौ लुगापत्तिस्वरानापत्तिरूपं पूर्वोक्तदोषमाशङ्क्य, आद्यस्य समासग्रहणकृतनियमेन सुपरिहरत्वात् अपिशब्देन "प्रत्ययग्रहण"परिभाषायाः समुच्चयात् द्वितीयोऽपि दोषो नेत्याशयेन, "द्वे ह्यत्र प्रातिपदिकसंज्ञे समुदायस्य अवयवस्य च । तत्रावयवस्य या प्रातिपदिकसंज्ञा तदाश्रयः स्वरो भविष्यतीति नैष दोष" इत्युक्त्वा, तदग्रे तदभ्युपेत्य तुल्यन्यायात् सांकुटिनमित्यत्राप्यवयवकृदन्तत्वनिमित्तकप्रातिपदिकत्वमादाय अन्तरङ्गत्वात्सुपः

पूर्वमणापत्तिरूपं दोषमुपन्यस्य, तद्वारणाय उत्तरपदे प्रातिपदिकसंज्ञाप्रयोज्यप्रत्ययोत्पत्तेः प्रागेव समास इत्यर्थकं 'गतिकारकोपपदानाम्—' इति वचनमभ्युपेत्य तद्दोषपरिहारो भाष्योक्तः संगच्छते। अन्यथा अवयवस्य कृदन्तत्वाभावेन प्रकरणमित्यत्रैव स्वरासिद्ध्या अत्र स्वरसंपादनस्यैव परिभाषाफलत्वसंभवेन परिभाषाफलत्वेन सांकुटिनमित्येतत्पर्यन्तानुधावनस्य 'द्वे ह्यत्र प्रातिपदिकसंज्ञे' इति भाष्यस्य चासांगत्यापत्तेः। किंच, अत्रैव अवयवस्य अकृदन्तत्वेन 'गतिकारक—' इति परिभाषया त्वन्मते समाधानपरभाष्यासंगतिः। यदपि—गतिकारकासमभिव्याहारे कृद्ग्रहणेषु "प्रत्ययग्रहणपरिभाषाबाधाभावाय अपिग्रहणमिति, तदपि न; गतिकारकासमभिव्याहार इव तत्समभिव्याहारेऽपि "प्रत्ययग्रहणपरिभाषाया अबाधनार्थमपिग्रहणमित्यपि वक्तुं शक्यत्वात्। यदपि—परमगार्ग्यायण इत्यादौ "प्रत्ययग्रहणपरिभाषया यञन्तात् फक्साधनपरभाष्यप्रामाण्येन निष्कृष्यैकार्थीभावाभावेऽपि वृत्तिर्भवतीति, तदपि न; 'शिवभागवत' इत्यत्रैव युगपद्वृत्तिद्वयविवक्षायां "प्रत्ययग्रहणपरिभाषाया अभावे अवयवादिव समुदायादपि फगापत्त्या पारमगार्ग्यायण इत्यप्यापद्येत। सत्यां तु परिभाषायां समुदायस्य यञन्तत्वाभावात् अवयवादेव फगिति न दोष इति तदाशयात्। निष्कृष्यैकार्थीभावाभावेऽपि वृत्त्यङ्गीकारे त्वन्मते गार्ग्यो व्याघ्र इव गार्ग्यव्याघ्रः तस्यापत्यमित्यर्थे परमगार्ग्यायण इत्यत्रोत्तरपदादिव पूर्वपदादपि फगापत्तिः। किंच 'येन विधिः' इति सूत्रे 'प्रत्ययविधौ तदन्तप्रतिषेधः' इत्यस्य सौत्रनाडिरित्युदाहरणपरभाष्यासंगतिः। त्वदुक्तरीत्या तदन्तविधिप्रतिषेधेऽपि अवयवात् फको दुर्वारत्वात्। 'अनुपसर्जनात्' इति सूत्रे कारीशब्दात् ढगापादनपरं भाष्यं तु त्वन्मते ङीबापादनपरभाष्यवदेकदेशिन

एवेति न तद्विरोधः। यदपि—पञ्चनावप्रिय इत्यादौ समासविधायकशास्त्रप्रामाण्यात् पञ्चनावेत्यत्रापि एकार्थीभावकल्पनात् प्रातिपदिकसंज्ञापत्तिरिति, तदपि न; त्रयाणामेकार्थीभावे द्वयोर्व्यपेक्षाया वक्तुमशक्यतया तद्विकल्पस्य महाविभाषया बोधयितुमशक्यत्वात् सत्येकार्थीभावे समासनित्यत्वस्य न्यायसिद्धतया समुदायैकार्थीभावमादायैव तत्पुरुषसमासस्य सिद्धतया तत्रातिरिक्तैकार्थीभावकल्पने मानाभावात्। यदपि— चित्राजरद्गुरित्यादौ दोषोद्भावनम्, तदपि न; 'विशेषणं विशेष्येण—' इति सूत्रे बहुलग्रहणेन अतिप्रसङ्गस्य वारयितुं शक्यत्वादिति सप्तमी ॥

अथ नव्याः— यदुक्तम्— परिभाषायामपिशब्देन केवलस्य ग्रहणाभावे धर्मिग्राहकमानविरोध इति, तन्न; 'गतिरनन्तरः' इत्यत्र गतेः पूर्वपदस्य क्तान्ते उत्तरपदे कार्यविधानसामर्थ्येन तत्समवधानेऽपि केवलस्य क्तान्तत्वेन ग्रहणेनादोषात्। यदपि— दत इत्यादौ पदसंज्ञाबाधनार्थमेव भसंज्ञाप्रवृत्तिवत् देवदत्तेन कृतमित्यादौ अवयवस्य कृदन्तत्वबाधनार्थमेव परिभाषाप्रवृत्तिः स्यादिति, तदपि न; कृद्ग्रहणेषु सर्वत्र गतिकारकपूर्वस्य तदादेरित्यस्य चोपस्थितया संकुटिन्नित्यस्य चेनुणन्तत्वेन समुदायादिवावयवादपि अण्प्रत्ययस्य प्राप्तौ अनवकाशेन गतिकारकवाक्येन तदादिवाक्यबाधेऽपि देवदत्तेन कृतमित्यादौ समासकृतानियमेन 'गतिकारक—' इति वाक्यस्य अप्रवृत्त्या तदादिवाक्येन कृतमित्यस्य प्रातिपदिकत्वे बाधकाभावात्। तदपि— प्रकरणमित्यत्रैव स्वरसंपादनस्य परिभाषाफलत्वसंभवेन सांकुटिनमित्येतत्पर्यन्तानुधावनासंगतिरिति, तदपि न; समासग्रहणकृतनियमेन समुदायस्य प्रातिपदिकत्वाभावेन अवयवकृदन्तत्वनिमित्तकप्रातिपदिकत्व-

मादाय अवयवात्सुपि समासे प्रकरणमित्यादौ स्वरसिद्धेर्भाष्य एव स्पष्टत्वेनादोषात् । प्रत्युत सांकुटिनमित्यत्र समासोत्तरमवयवात् भवन्मत एवाणापत्तिः । सिद्धान्ते तु 'अणिनुणः' इत्यत्रोपप्लुतेन गतिकारकपूर्ववाक्येन "कृद्ग्रहण"परिभाषया कृदन्तेन समासात् पूर्वं समुदायस्याप्रातिपदिकत्वात् तदप्राप्त्या बाधासंभवेऽपि समासोत्तरं समुदायस्यापि प्रातिपदिकत्वेन तेन वाक्येन तस्य बाधान्न दोषः । यदपि— 'शिवभागवत' इत्यत्रेव परमगार्ग्यायण इत्यत्रापि निष्कृष्यैकार्थीभावद्वयकल्पनान्न दोष इति, तदपि न; 'सविशेषणानाम्—' इति निषेधबाधेन वृत्तिद्वयं परिकल्प्य उक्तभाष्यप्रामाण्यात् गमकत्वात्साधुत्वकल्पनापेक्षया निष्कृष्यैकार्थीभावाभावेऽपि वृत्तिकल्पनस्यैवोचितत्वात् । यदपि— गार्ग्यव्याघ्र इत्यादौ पूर्वपदादपि फगापत्तिरिति, तदपि न; 'अभिधानलक्षणाः कृत्तद्धितसमासाः' इति भाष्योक्त्या आदित्यं पश्यतीत्यादावण इवात्राप्यनभिधानादेव फकोऽप्रवृत्तेः । अत एव सौत्रनाडिरित्यादावपि नावयवात् फगादिकमिति न दोषः । यदपि— 'पञ्चनावप्रिय' इत्यादौ समुदायैकार्थीभावमादायैव समासस्य सिद्धतया अतिरिक्तैकार्थीभावकल्पने मानाभावान्न दोष इति, तदपि न; क्वचित् 'न निर्धारणे' इति समासनिषेधेन क्वचित्तन्नित्यत्वबोधकेन नित्यग्रहणेन क्वचिद्विकल्पबोधकविभाषाधिकारेण च समासनिषेधनित्यत्वविकल्पबोधनद्वारा तत्प्रयोजकीभूतापृथगुपस्थितिजनकत्वरूपैकार्थीभावाभावादिकल्पनवत् त्वन्मते निष्कृष्यैकार्थीभावस्यैव वृत्तिनिमित्तत्वाङ्गीकारेणात्राप्युपस्थितया "समर्थ"परिभाषया तावन्मात्रेऽपि शास्त्रप्रामाण्यात्तत्कल्पनस्य दुर्वारत्वात् पञ्चनावेत्यादौ दोषापत्तेः । अत एव शेखरे पूर्वसूत्रे प्रत्ययान्तपर्युदासप्रत्याख्यानपक्षे पञ्चनावेत्यादौ

दोष आपादितः; अन्यथा तावन्मात्रे पृथक्छक्तेरसंभवेन शक्त्या अर्थबोधकत्वाभावादेव तत्र तदप्राप्त्या तदसंगतिः । न च कल्प्यमानस्यैकार्थीभावस्य विभाषाधिकारेण पाक्षिकत्वबोधनात् पक्षे तत्पुरुषाभावे पञ्चगोधन इत्यपि स्यादिति वाच्यम्, महाविभाषाया लोकसिद्धपृथगुपस्थितिजनकत्वापृथगुपस्थितिजनकत्वरूपव्यपेक्षैकार्थीभावानुवादकत्वेन प्रकृते द्वयोर्वृत्त्यभावेऽपि त्रयाणामेकार्थीभावेन द्वयोः पृथगुपस्थित्यसंभवेन व्यपेक्षाया असंभवात् नित्यसमासस्थल इवात्रापि महाविभाषाया अप्रवृत्त्या तत्पुरुषसंज्ञाया अर्थान्नित्यत्वसिद्धेः । ननु 'खट्वारूढो जाल्म' इत्यादौ वृत्त्यर्थबोधकस्य वाक्यस्यासंभवान्नित्यत्वस्य न्यायसिद्धत्वेऽपि प्रकृते बहुव्रीह्यर्थबोधकस्य तद्घटकतत्पुरुषार्थबोधकस्य च वाक्यस्य संभवेनेदृशविषये विभाषाधिकारबाधेन एकार्थीभावनित्यत्वकल्पने मानाभाव इति चेत्, न; उत्तरपदपरत्वाभाववतः समासानुद्देश्यस्य पूर्वशालेत्यस्य पृथगुपस्थितिजनकत्वरूपव्यपेक्षावत्त्वेऽपि उत्तरपदपरकस्य तस्य व्यपेक्षाया असंभवेन तत्र विभाषाधिकाराप्रवृत्त्या समासनित्यत्वस्य स्वत एव सिद्धत्वात्। एवं च राजपुरुषस्य धनं राजपुरुषधनमित्यादाववयवैकार्थीभावस्य समुदायनिष्ठैकार्थीभावप्रयोज्योपस्थितौ प्रयोजकत्ववत् अत्राप्यवयवैकार्थीभावस्य समुदायवृत्त्या अर्थोपस्थितौ सहकारित्वेन एकार्थीभावेनार्थबोधजनकत्वरूपार्थवत्त्वस्य पञ्चनावेत्यत्र सत्त्वात् प्रातिपदिकत्वात् ङीबापत्तिः । तस्मादेतत्संज्ञेत्याद्येव युक्तमित्यष्टमी ॥

अथ प्राञ्चः— यदुक्तम्— 'पञ्चनावप्रिय' इत्यादौ पञ्चनावेत्यस्य प्रातिपदिकत्वेन ततो ङीबापत्तिरिति, तन्न; शब्दरत्नोक्तरीत्या एकार्थीभावेनार्थबोधकत्वमित्यत्र एकार्थीभावस्य तन्मात्रवृत्तेरेव ग्रहणे-

नात्र दोषवारणसंभवात् । न च तत्पुरुषसंज्ञार्थं कल्पितस्यैकार्थीभावस्य तन्मात्रवृत्तित्वेन दोषस्तदवस्थ एवेति वाच्यम्, अत्र तन्मात्रवृत्तित्वं न तावत्तदितरावृत्तित्वे सति तद्वृत्तित्वरूपम् । किंतु तदितरवृत्त्येकार्थी-भावासमानाधिकरणत्वरूपम् । तथा च प्रकृते कल्पितैकार्थीभावस्य तदितरवृत्त्येकार्थीभावसमानाधिकरणत्वान्न तन्मात्रवृत्तित्वमिति न दोषः । अत एव शब्दरत्नशेखरयोर्न विरोध इति नवमी ॥

अथ नव्याः— यदुक्तम्— पञ्चनावप्रिय इत्यादौ प्रातिपदि-कसंज्ञावारणाय तन्मात्रवृत्तिरेव एकार्थीभावो गृह्यते । तन्मात्रवृत्तित्वं च तदितरवृत्त्येकार्थीभावासमानाधिकरणत्वरूपमित्यादि, तन्न; यस्य प्रातिपदिकसंज्ञा चिकीर्षिता तदितरवृत्त्येकार्थीभावासमानाधिकरणतद्वृ-त्त्येकार्थीभावेन अर्थबोधजनकत्वरूपपारिभाषिकार्थवत्त्वस्य उत्तरसूत्रे त्व-न्मतेऽप्यावश्यकत्वेन गौरवस्य तुल्यत्वात् । किंच त्वन्मते पूर्वोत्तरसूत्र-योर्वैरूप्यं प्रत्ययेष्वतिव्याप्तिश्चातिरिच्यते । किंच उत्तरसूत्रे तद्धित-ग्रहणस्य नियमार्थत्वाश्रयणेन 'ह्रस्वो नपुंसके यत्तस्य' इति न्यासेन वा काण्डे इत्यादौ ह्रस्ववारणेन फलाभावात् भाष्योक्तप्रत्ययान्तपर्युदास-प्रत्याख्यानपक्षे पञ्चनावेत्यादौ पूर्वसूत्रेण प्रातिपदिकत्वस्य दुर्वारतया उत्तरसूत्रे त्वदुक्तपारिभाषिकार्थवत्त्वस्य उक्तभाष्यविरोधैकफलकतया 'भक्षितेऽपि लशुने—' इति न्यायविषयत्वापत्तिः । मम तु पूर्वोत्तरसू-त्रयोः पारिभाषिकार्थवत्त्वस्यैवाश्रयणेन पूर्वसूत्रेणापि पञ्चनावेत्येकदेशस्य न प्राप्तिः । नापि प्रत्ययेष्वतिव्याप्तिरिति न कश्चिद्दोष इति दशमी ॥

अथ प्राञ्चः— पूर्वोत्तरसूत्रयोरैकरूप्याय पारिभाषिकार्थवत्त्वा-श्रयणे पञ्चनावेत्यत्र पूर्वेण प्रातिपदिकत्वाप्राप्त्या तत्र समासग्रहणस्य विध्यर्थत्वसंभवेन नियमार्थत्वाश्रयणपरभाष्यासंगतिः । मम तु पारिभाषि-

कार्यवत्त्वानाश्रयणेन पूर्वसूत्रेण उत्तरसूत्रेण वा प्रातिपदिकसंज्ञायाः सि-
द्धतया समासग्रहणस्य नियमार्थत्वं संगच्छते । किंच 'गोस्त्रियोः—'
इति सूत्रस्थभाष्यविरोधः— तत्र हि गोकुलं राजकुमारीपुत्र इत्यत्र ह्रस्वा-
पत्तिमुद्भाव्य, तद्दोषवारणायारब्धस्य 'पूर्वपदस्य प्रतिषेधो गोसमास-
निवृत्त्यर्थः' इति वार्तिकस्य प्रत्याख्यानावसरे पञ्च कुमार्यः प्रिया
यस्य पञ्चकुमारीप्रिय इत्यादाववान्तरतत्पुरुषरूपप्रातिपदिकस्य अपूर्व-
पदत्वादुक्तवार्तिकेन अगतार्थतामाशङ्क्य, तत्र दोषवारणायावश्याश्रय-
णीयया 'अप्रधानमुपसर्जनमिति संबन्धिशब्दावेतौ । तत्र संबन्धादेत-
द्गन्तव्यम् । यं प्रति यदप्रधानम्, तस्य चेत्सोऽन्त्यो भवति' इत्येवं-
रूपया प्रत्यासत्त्यैव गोकुलं राजकुमारीपुत्र इत्यत्र दोषवारणं कृतम् ।
त्वदुक्तरीत्या अवान्तरतत्पुरुषात्मकसमुदायस्य प्रातिपदिकत्वाभावेन श-
ङ्कासमाधानयोरसंगतिः । न चैवं सति पञ्चनावप्रिय इत्यादौ पञ्चनावे-
त्यस्य प्रातिपदिकत्वे 'अदन्तोत्तरपदो द्विगुः स्त्रियामिष्टः' इति स्त्री-
त्वेन द्विगुलक्षणस्य टिड्ढलक्षणस्य वा ङीपो दुर्वारत्वापत्तिरिति वाच्यम्,
'अदन्तोत्तरपदः—' इत्यस्य 'स नपुंसकम्' इत्येतदपवादत्वेन तस्यापि
समाहारद्विगावेव प्रवृत्त्यात्र स्त्रीत्वाभावात् । न च 'परवल्लिङ्गम्—'
इति नौशब्दगतस्वारसिकस्त्रीत्वमादाय ङीप् स्यादिति वाच्यम्, तस्य
'द्विगुप्राप्तापन्न—' इति निषेधेन परवल्लिङ्गताया अप्रवृत्तेः । एवं च
त्वन्मते पञ्चनावेत्यस्य प्रातिपदिकत्वानापत्त्या पूर्वोक्तभाष्यद्वयविरोधाप-
त्तिरिति पारिभाषिकार्थवत्त्वाश्रयणमयुक्तमित्येकादशी ॥

अथ नव्याः— यदुक्तम्— पारिभाषिकार्थवत्त्वाश्रयणे पञ्च-
नावप्रिय इत्यत्र पञ्चनावेत्यस्य प्रातिपदिकसंज्ञासंपादकतया समासग्रहण-
स्य चारितार्थ्येन तस्य नियमार्थत्वपरभाष्यासंगतिरिति, तदतिस्थूलम्; त्व-

न्मतेऽपि असूर्यंपश्या इत्यसमर्थसमासे विध्यर्थत्वव्यावृत्तये अर्थवद्ग्रहणसं-बन्धस्यावश्यकतया तत एव पञ्चनावेत्यत्रापि तदप्राप्त्या तस्य नियामकतायाः सुलभत्वात्। यदपि — 'गोस्त्रियोः —' इति सूत्रस्थभाष्यविरोधोद्भावनम्, तदपि न; प्रत्यासत्त्यनङ्गीकारे उपसर्जनस्त्रीप्रत्ययान्तान्तसमासरूपप्रातिपदिकस्यैव ग्रहणमिति नियमाभावेन कुमारशब्दनिष्ठप्रातिपदिकत्वस्य "लिङ्गविशिष्ट"परिभाषया कुमारीत्यत्रातिदेशेन तस्य प्रातिपदिकत्वेनोपसर्जनत्वेन च व्यपदेशिवद्भावेन स्त्रीप्रत्ययान्तान्तत्वाच्च ह्रस्वापत्तिरिति भाष्याशयात्। न चासहाय एव व्यपदेशिवद्भावेन प्रकृते व्यपदेशिवद्भावासंभवेन भाष्यासंगतिरेवेति वाच्यम्, समुदाये स्त्रीप्रत्ययान्तान्तत्वसंभवेऽपि प्रातिपदिके स्त्रीप्रत्ययान्तान्तत्वासंभवेन असहायत्वस्य संभवात्। अत एव देवदत्त आभ्यामित्यादौ समुदाये अकारान्तत्वसत्त्वेऽपि अङ्गे अकारान्तत्वासिद्धया व्यपदेशिवद्भाव इति सिद्धान्तः संगच्छते। व्यपदेशिवद्भावानाश्रयणे तु अङ्गस्याकारान्तत्वाभावेन दीर्घानापत्तिः। यदपि— 'परवल्लिङ्गम्—' इति प्राप्तस्य 'द्विगुप्राप्तापन्न—' इति निषेधान्न दोष इति, तदपि न; 'द्विगुप्राप्त—' इति वार्तिके द्विगुग्रहणस्य भाष्ये अदर्शनेन 'परवल्लिङ्गम्—' इति सूत्रे 'द्वन्द्वैकदेशिनोरिति वक्ष्यामि' इति भाष्येण तस्यैकदेशिसमासमात्रविषयकत्वेन द्विगौ तदप्राप्त्या वार्तिके द्विगुग्रहणस्यानावश्यकत्वेन त्वदुक्तेरसंभवात्, प्रकृते तु नौशब्दार्थस्य प्राधान्यात् तद्गतं स्वारसिकं स्त्रीत्वमादाय टिड्ढाणञिति ङीपो दुर्वारत्वादिति द्वादशी ॥

अथ प्राञ्चः— एवमपि 'सुप्तिङन्तम्—' इति सूत्रस्थभाष्यविरोधः— तत्र हि अन्तग्रहणस्य 'संज्ञाविधौ—' इति परिभाषाज्ञापकत्वमुक्त्वा, एवं तर्हि 'कृत्तद्धित—' इति सूत्रे अन्तग्रहणं कर्तव्य-

मिति वार्तिके आरब्धे तस्यार्थवद्ग्रहणानुवृत्त्या प्रत्याख्यानं कृतम् । पञ्चनावेत्येकदेशस्य वार्तिकरीत्या तद्धितान्तत्वात्प्रातिपदिकत्वम्, प्रत्याख्यानपक्षे तु अर्थवत्त्वाभावात्प्रातिपदिकत्वं नेति त्वन्मते फलभेदः प्रसज्यते । मम तु तावन्मात्रस्याप्यर्थवत्त्वात् प्रत्याख्यानपक्षेऽपि प्रातिपदिकत्वं सुलभमिति न फलभेदः । किंच 'बहुव्रीहेरूधसः' इति सूत्रस्थभाष्यविरोधः— तत्र हि कुण्डोध्नीत्यत्र "लिङ्गविशिष्टपरिभाषया प्रातिपदिकत्वव्याप्यबहुव्रीहित्वसमासत्वादेरतिदेशेन कपमाशङ्क्य नद्यन्तानां यो बहुव्रीहिरिति समाहितम् । त्वदुक्तरीत्या पञ्चनावेत्यवान्तरतत्पुरुषस्य प्रातिपदिकत्वाभावेन समासत्वस्य तद्व्याप्यत्वासंभवेन "लिङ्गविशिष्टपरिभाषया तदापादनासंगतिः । न च पञ्चनावेत्यस्य प्रातिपदिकत्वे उक्तरीत्या स्त्रीत्वेन ङीबापत्तिरिति वाच्यम्, सत्यपि स्त्रीत्वे बहुकुरुचरेत्यत्रेवात्रापि टिदन्तस्योपसर्जनत्वेन अनुपसर्जनाधिकारेण अनुपसर्जनीभूतार्थवाचको यः टित् तदन्तादेव ङीपो विधानेनात्र ङीपोऽप्राप्तेः । किंच 'अनुपसर्जनात्' इत्येतस्य गृह्यमाणविशेषणत्वेन अनुपसर्जनीभूतार्थवाचको यः टित् तदन्तादेव ङीपः प्रवृत्त्या समासान्तानामनर्थकत्वेन अनुपसर्जनीभूतार्थवाचकत्वाभावात् ङीबापादनस्यैवासंभवः । तस्मात्प्राचीनमते न कश्चिद्दोष इति त्रयोदशी ॥

अथ नव्याः— यदुक्तम्— 'सुप्तिङन्तम्—' इति सूत्रस्थभाष्यविरोध इति, तन्न; तत्रान्तग्रहणस्य 'संज्ञाविधौ—' इति परिभाषाज्ञापकत्वमुक्त्वा "यद्येतत् ज्ञाप्यते 'सनाद्यन्ता धातवः' इत्यत्र अन्तग्रहणं कर्तव्यम् । 'कृत्तद्धित—' इति सूत्रे चान्तग्रहणं कर्तव्यम् । इदं तृतीयं ज्ञापनार्थमन्तग्रहणं कर्तव्यम्" इति पूर्वपक्षिणा शङ्किते 'द्वे तावत् क्रियेते न्यास एव । यदुच्यते कृत्तद्धितेत्यत्रान्तग्रहणं कर्तव्यमिति, न

कर्तव्यम् । अर्थवदिति वर्तते । कृत्तद्धितान्तं चैवार्थवत् । न च केवलाः कृतस्तद्धिता वार्थवन्तः' इति समाहितम् । तत्र शङ्कावाक्यस्य यद्येतत्पदघटितत्वेन "अन्तग्रहणं कर्तव्य"मित्यस्य वार्तिकत्वाभावेन तस्य केवलपूर्वपक्षयुक्तित्वेन तद्विरोधापादनासंभवात् । यदपि—'बहुव्रीहेरूधसः' इति सूत्रभाष्यविरोधोद्भावनम्, तदपि सुपरिहरम्; तदभाववदवृत्तित्वस्येव तदनधिकरणावृत्तित्वस्य तद्वद्भिन्नावृत्तित्वस्य वा तद्व्याप्यत्वरूपत्वेन पञ्चनावेत्येतन्निष्ठसमासत्वस्य तद्वद्भिन्नवृत्तित्वाभावेन तद्व्याप्यत्वानपायात् । न च पञ्चनावेत्यवयवे प्रातिपदिकत्वाभाववत् प्रातिपदिकत्ववद्भेदोऽपि संभवतीति तद्वृत्तित्वात्समासत्वस्य कथं तद्वद्भिन्नावृत्तित्वरूपं तद्व्याप्यत्वमिति वाच्यम्, अभावस्याव्याप्यवृत्तित्वेऽपि भेदस्य व्याप्यवृत्तित्वेन मूलावच्छेदेन कपिसंयोगाभाववति वृक्षे कपिसंयोगिभेदस्येव प्रातिपदिकावयवे प्रातिपदिकभेदस्याप्यसत्त्वात् । एवं च प्रातिपदिकत्ववद्भिन्नावृत्तित्वरूपतद्व्याप्यत्वस्य सुलभतया न पूर्वोक्तदोषावकाशः । किंच 'गोस्त्रियोः—' इति सूत्रस्थभाष्यप्रामाण्येन समासान्तानां समाससंबन्ध्यलौकिकविग्रहवाक्य एव प्रवृत्त्या कुण्डोध्नीत्यत्र ङीबन्तस्य बहुव्रीहिसंबन्ध्यलौकिकविग्रहवाक्यत्वासंभवेन तत्र 'नद्यृतश्च' इति कपोऽप्राप्त्या तदापादनपरभाष्यस्यैकदेश्युक्तित्वान्न दोषः । यदपि—पञ्चनावेत्यत्र टित उपसर्जनत्वेन अनुपसर्जनाधिकारेण तत्र ङीपो न प्राप्तिरिति, तदपि न; अतिराजकुमारिरित्यत्र प्रत्यासत्तिन्यायाश्रयणेन ह्रस्वप्रवृत्तिवत् अत्रापि प्रत्यासत्त्या यस्मात् टिदन्तात् ङीप् विधीयते तदर्थं प्रति टितोऽनुपसर्जनत्वेन ङीपः प्राप्तेः सुवचत्वात् । किंच संनिपातपरिभाषादिना यथाकथंचित् ङीपो वारणेऽपि टापो दुर्वारत्वापत्तिः । तस्मात्प्राचोक्तमयुक्तमेवेति चतुर्दशी ॥

अथ प्राञ्चः—यदुक्तम्—तदभाववदवृत्तित्वस्यैव तदनधिकरणावृत्तित्वस्य तद्वद्भिन्नावृत्तित्वस्य वा तद्व्याप्यत्वरूपत्वेन पञ्चनावेत्येतन्निष्ठसमासत्वस्य तद्वद्भिन्नवृत्तित्वाभावेन प्रातिपदिकत्वव्याप्यत्वमक्षतम्। अभावस्य व्याप्यवृत्तित्वाभावेऽपि भेदस्य व्याप्यवृत्तितया मूलावच्छेदेन कपिसंयोगाभाववति वृक्षे कपिसंयोगिभेदस्यैव प्रातिपदिकावयवे पञ्चनावेत्यस्मिन् प्रातिपदिकभेदस्याप्यभावादिति, तन्न; प्रातिपदिकत्वस्य वर्णसमुदाये पर्याप्तेरङ्गीकारेण प्रत्येकवृत्तिधर्मावच्छेदेन व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदस्य 'एको न द्वौ' इति प्रतीतिसाक्षिकतया प्रकृतेऽपि पञ्चनावेत्यस्मिन् प्रातिपदिकभेदस्य सुलभतया तद्व्याप्यत्वस्य समासत्वे असंभवात्। न चैवं प्रत्येकं द्वित्वाद्यभावाभाववत् एकदेशे प्रातिपदिकत्वाभावाभावोऽपि सुलभ इति वाच्यम्, येन संबन्धेन प्रातिपदिकत्वादिकं शास्त्रप्रवृत्तिनियामकम्, तेनैव संबन्धेन तद्व्याप्यत्वादिकं गृह्यते, उपस्थितत्वात्। तथा च पर्याप्तिसंबन्धेनैव तन्नियामकत्वेन तेन संबन्धेन तदभाववति पञ्चनावेत्यस्मिन् समासत्वस्य सत्त्वेन तस्मिन् प्रातिपदिकत्वव्याप्यत्वासंभवात्। यदपि— 'गोस्त्रियोः—' इति सूत्रस्थभाष्यप्रामाण्येन पूर्वोक्तरीत्या कुण्डोध्नीत्यत्र कबापादनपरम् 'बहुव्रीहेरूधसः' इति सूत्रस्थं भाष्यमेकदेश्युक्तिरिति न तद्विरोधो दोषावह इति, तदपि न; तद्भाष्यस्यैकदेश्युक्तित्वेऽपि समासत्वाभावानुपपादनेन नद्यन्तानां यो बहुव्रीहिरित्येव समाधानोपपादनेन च समासत्वसद्भाव एव भाष्यतात्पर्यावगमात्। यदपि—पञ्चनावेत्यत्र टिदन्तस्य तदर्थं प्रत्यनुपसर्जनत्वेन ङीपो यथाकथंचित्तद्वारणेऽपि टापः प्रसक्तिर्दुर्वारैवेति, तदपि न; 'लिङ्गमशिष्यम्—' इति भाष्येण प्रकृते नपुंसकत्वस्य पुंस्त्वस्य वाभ्युपगमेनोभयोरप्रसङ्गात्। तथा च नव्योक्तमयुक्तमेवेति पञ्चदशी ॥

अथ नव्याः — यदुक्तम् — समासत्वस्य प्रातिपदिकत्वव्याप्यत्वाभावेन "लिङ्गविशिष्ट"परिभाषया तदनतिदेशेन 'गोस्त्रियोः—' इति सूत्रस्थभाष्यविरोध इति, तन्न; तत्परिभाषया प्रातिपदिकत्वव्याप्यस्येव तत्समानाधिकरणस्यापि धर्मस्य अतिदेशाङ्गीकारेणादोषात् । अत एव गोमतीत्यादौ उगित्त्वातिदेशेन नुममाशङ्क्य, तद्वारणाय 'विभक्तौ लिङ्गविशिष्टाग्रहणम्' इति तदुत्तरपरिभाषाङ्गीकारेण स वारितो भाष्ये। तथा च पारिभाषिकार्थवत्त्वस्वीकारे न कोऽपि भाष्यविरोध इति षोडशी ॥

अथ प्राञ्चः— यदुक्तम् — प्रातिपदिकत्वव्याप्यस्य तत्समानाधिकरणस्य च धर्मस्य "लिङ्गविशिष्ट"परिभाषया अतिदेशः । अत एव गोमतीत्यादौ उगित्त्वलक्षणनुमो वारणाय परिभाषान्तरमेव भाष्यकृता अवतारितमिति, तन्न; उगित्त्वस्य प्रातिपदिकत्वव्याप्यत्वाभावेऽपि नुम्विधौ उद्देश्यतावच्छेदकीभूतस्योगित्प्रातिपदिकत्वस्य उगिदन्तप्रातिपदिकत्वस्य वा विशेषरूपस्य सामान्यरूपप्रातिपदिकत्वव्याप्यत्वेन तदतिदेशप्राप्तनुम्वारणाय 'विभक्तौ—' इति परिभाषोपन्यासस्यावश्यकतया तेन भाष्येण तया परिभाषया प्रातिपदिकत्वसमानाधिकरणस्यापि धर्मस्यातिदेश इत्यर्थस्यालाभात् । तथा सति तटीत्यादौ अदन्तत्वादीनामतिदेशापत्त्या बहुवैयाकुलीप्रसङ्गश्च । किंच प्रातिपदिकत्वव्याप्यधर्मस्यैवातिदेश इति नव्यग्रन्थ एव स्पष्टमभिहितम् । तस्मात् पूर्वसूत्रे वृत्त्या अर्थबोधकत्वमर्थवत्त्वम्, उत्तरसूत्रे तु एकार्थीभावेन अर्थबोधकत्वं तदित्येव युक्तम्; न तु त्वदुक्तं पारिभाषिकार्थवत्त्वमिति प्राहुरिति सप्तदशी ॥

॥श्रीः॥

कृत्तद्धितसमासाश्च ॥

अत्र समासग्रहणं राजपुरुषादौ समाससंज्ञार्थम्; "अर्थवत्सूत्रेणैव तत्सिद्धेरिदं नियमार्थमिति सिद्धान्तः ॥

न च एकैकमित्यादौ स्थाने द्विर्वचने 'एकं बहुव्रीहिवत्' इति बहुव्रीहिवद्भावेन सुब्लुकि पुनः सुबुत्पत्त्यर्थं पूर्वसूत्रेण प्रातिपदिकत्वे स्थानिवत्त्वेन प्रत्ययान्ततया 'अप्रत्ययः' इति निषेधे प्राप्ते तत्र विध्यर्थं समासग्रहणमिति वाच्यम्, सुब्लुगर्थमतिदिष्टप्रातिपदिकत्वस्यैव "एकदेशविकृतन्यायेन सुब्लुक्यानयनसंभवात् ॥

तस्मान्नियमार्थमेव समासग्रहणम् । तत्र नियमशरीरं फलं च विचार्यते—नियमस्य सजातीयापेक्षत्वात् "यत्र संघाते पूर्वो भागः पदं तद्घटितस्यार्थवत्समुदायस्य चेत् संज्ञा तर्हि समासस्यैवेति, "अर्थवत्पूर्वोत्तरघटितसमुदायस्य चेत्संज्ञा तर्हि समासस्यैवेति नियमद्वयस्यापि संभवात् पक्षद्वयस्यापि ग्रन्थे दर्शनात् तयोः कतरः श्रेयानिति तन्निर्णयाय विचार आरभ्यते—

तत्र आद्यपक्ष एव युक्तः; षड्विधेऽपि समासे पूर्वभागस्य पदत्वाव्यभिचारेण तद्घटितसमाससंज्ञकसमुदायस्यार्थवत्त्वाव्यभिचारेण च तेन रूपेणैव साजात्यं ग्रहीतुमुचितम्; न तु अर्थवदित्यादि, 'बहुपटव' इत्यादौ दोषापत्तेः । तस्मात्प्राचोक्तमेव युक्तम् ॥

यदुक्तम्—पदसंज्ञकपूर्वभागेत्यादि, तदयुक्तम्; जन्मवानित्यादौ प्रातिपदिकत्वानापत्तेः । यच्चोक्तम्—षड्विधेऽपि समासे पूर्व-

भागस्य पदत्वाव्यभिचारादित्यादि, तदपि चिन्त्यम्; 'वृषणश्वः, वृषण्वसुः' इत्यत्र समासे पूर्वभागस्य 'वृषण्वस्वश्वयोः' इत्यनेन भत्वेन पदत्वबाधात्तेन रूपेण साजात्यस्य विवक्षितुमशक्यत्वात्। यदुक्तम्—अर्थवत्त्वेन साजात्यग्रहणे 'बहुपटव' इत्यादौ दोष इति, तन्न; स्वातन्त्र्येण प्रयोगार्हत्वरूपार्थवत्त्वस्यैव अर्थवत्पदेन विवक्षितत्वेनादोषात्। तस्मात्प्राचोक्तमयुक्तमेव ॥

यदुक्तम्—आद्यपक्षे जन्मवानित्यादौ दोष इति, तन्न; उत्तरसूत्रे तद्धितग्रहणस्य निरवकाशत्वेन नियमं बाधित्वा प्रातिपदिकसंज्ञाप्रवृत्तेः सुवचत्वात्। यदुक्तम्—'वृषणश्व' इत्यादौ पूर्वभागस्य भत्वेन पदत्वाभावात्तेन रूपेण साजात्यासंभव इति, तन्न; पदपदेन पदत्वयोग्यस्यैव ग्रहणेन 'वृषणश्व' इत्यत्र भत्वेऽपि पदत्वयोग्यतानपायात्। अत एव गोन्चित्यादौ 'गतिकारक—' इत्यस्यानित्यत्वात्सुबन्तेन समासे 'उत्तरपदत्वे च—' इत्यस्य प्रत्याख्यानपक्षे मध्ये चसुबन्तं तदपि भं भवतीति भसंज्ञायाम् 'न पदान्त—' इति निषेधप्रवृत्तये पदे अन्तः पदान्त इति सप्तमीसमासपक्षे पदत्वयोग्य इत्यर्थाश्रयणेन भसंज्ञाविषयेऽपि निरुक्तपदत्वसत्त्वात् 'न पदान्त—' इति निषेधः सिध्यति। एतेन तद्धितग्रहणस्य औपगवादौ चारितार्थ्यात् सामर्थ्यं दुर्वचमित्यपास्तम्। यदुक्तम्—'बहुपटव' इत्यादौ अर्थवत्पदेन स्वातन्त्र्येण प्रयोगार्हत्वरूपार्थवत्त्वस्यैव ग्रहणान्न दोष इति, तदपि न; 'अस्यापत्यं पुमान् इः' इत्यत्र पूर्वोत्तरखण्डयोः स्वातन्त्र्येण प्रयोगार्हत्वरूपार्थवत्त्वस्य सत्त्वेन नियमेन प्रातिपदिकत्वानापत्तेः। मन्मते तु तद्धितग्रहणेन अनवकाशेन नियमबाधनान्न दोषः। तस्मात्प्राचोक्तं युक्तमेव ॥

यदुक्तम्—पदशब्देन पदत्वयोग्यस्यैव ग्रहणात् न वृषण्वसुरित्यादौ व्यभिचार इति, तदसत्; अरण्यस्थदण्डे यावत्कारणसमवधाने कार्योत्पत्त्या स्वरूपयोग्यत्वेऽपि कीटाद्युपभुक्तदण्डे यावत्कारणसमवधानेऽपि कार्योत्पादानुकूलशक्तेरभावेन तस्मिन् तादृशयोग्यताया अभाववत्—भसंज्ञाविषये पदत्वस्य कदाप्यप्रवृत्त्या तादृशयोग्यताया अभावात्तेन रूपेण साजात्यस्य विवक्षितुमशक्यत्वात् । किं च समासे राजपुरुष इत्यादौ पूर्वभागे पदसंज्ञाया एव सत्त्वेन तद्योग्यत्वव्यवहाराभावेन तेन रूपेण साजात्यग्रहणासंभवः । यदुक्तम्—गोचेत्यादौ भत्वाविषये पदत्वयोग्यतायाः सत्त्वात् 'न पदान्त—' इति निषेधसिद्धिरिति, तदप्यसत्; 'उत्तरपदत्वे च—' इत्येतत्प्रत्याख्यानस्य एकदेशयुक्तित्वेनादोषात्, 'गतिकारक—' इति कृदन्तेनैव समासे अवयवे भत्वस्यैवाप्राप्त्या पदत्वयोग्यतायाः सुस्थितत्वाच्च । तथा च जन्मवानित्यादौ प्रातिपदिकत्वानापत्तिः, तद्धितग्रहणस्य औपगवादौ भत्वविषये पदत्वयोग्यताविरहेण नियमाप्राप्त्या चारितार्थ्येनानवकाशत्वाभावेन तेन नियमबाधासंभवात् । यदुक्तम्—अस्यापत्यम् इः इत्यादौ दोष इति, तदपि मन्दम्; अत्र नियमप्रवृत्तौ प्रातिपदिकत्वाभावेन सुपो लुगभावे 'यस्येति च' इति लोपस्याप्यप्रवृत्त्या स्वातन्त्र्येण प्रयोगार्हत्वस्य भङ्गापत्त्या उपजीव्यविरोधापत्तेः । तस्मात्प्राचोक्तमयुक्तमेव ॥

यदुक्तम्—भसंज्ञाविषये पदत्वानङ्गीकारात् औपगवादौ नियमाप्राप्त्या जन्मवानित्यादौ प्रातिपदिकत्वानापत्तिरिति, तन्न; अत्र पदत्वयोग्यतायाः पदसंज्ञाप्रवृत्त्युद्देश्यतावच्छेदकधर्माक्रान्तत्वरूपाया एव विवक्षिततया वृषण्वसुरित्यादौ पूर्वभागे सुबन्तत्वरूपपदत्वयोग्यताया अक्षतत्वेन क्वापि व्यभिचारासंभवात् । एवं च तद्धितग्रहणस्य औपगवादौ

कृतार्थत्वासंभवादनवकाशेन तद्धितग्रहणेन नियमबाधनात् 'जन्मवान्', 'अस्यापत्यम् इः' इत्यादौ न दोषः । तस्मात्प्राचोक्तमेव युक्तम् ॥

यदुक्तम्— पदशब्देन पदत्वयोग्यं गृह्यते, तत्त्वं च पदसंज्ञाप्रवृत्तिप्रयोजकरूपाक्रान्तत्वम् । तस्य च 'वृषणश्व' इत्यादावक्षतत्वान्न क्वापि व्यभिचार इति, तदपि मन्दम्; उत्सर्गशास्त्राणामपवादशास्त्रविषयातिरिक्तपरत्वेन संकोचस्य क्लृप्ततया अपवादभूतभसंज्ञाविषये पदत्वस्य क्वाप्यप्रवृत्त्या भसंज्ञाप्रवृत्तिप्रयोजकधर्मासमानाधिकरणसुबन्तत्वस्यैव पदसंज्ञोद्देश्यतावच्छेदकत्वेन तस्य च वृषणवसुरित्यत्र वृषणशब्दे अभावेन तेन रूपेण साजात्यस्य दुर्वचत्वात् जन्मवानित्यादौ पूर्वोक्तदोषस्तदवस्थ एव । तस्मात्प्राचोक्तमयुक्तम् ॥

यदुक्तम्— अपवादविषयातिरिक्तपरत्वेनैव उत्सर्गशास्त्रस्योद्देश्यतावच्छेदकपदे संकोचस्यावश्यकतया केवलसुबन्तत्वस्यातिप्रसक्तत्वेन तस्य तदुद्देश्यतावच्छेदकत्वासंभवेन 'वृषणश्व' इत्यादौ निरुक्तयोग्यताया अभावेन व्यभिचारो दुरुद्धर इति, तदसत्; अत्र पदपदस्य सुबन्तलक्षकत्वेनादोषात् । तस्मात्प्राचोक्तं युक्तमेव ॥

यदुक्तम्— पदपदस्य सुबन्तोपलक्षकत्वान्न दोष इति, तदसत्; गवित्ययमाहेत्यादौ अनुकार्यानुकरणयोरभेदपक्षे तस्यासुबन्तत्वेन नियमाप्राप्त्या तस्य व्यावृत्त्यनापत्तेः । यदुक्तम्— तद्धितग्रहणस्याचारितार्थ्यात् जन्मवानित्यादौ न दोष इति, तदपि मन्दम्; अत्यन्तस्वार्थिकानां सुबुत्पत्तेः पूर्वमेव प्रवृत्त्या पूर्वभागस्य सुबन्तत्वाभावेन तद्धितग्रहणस्य तत्र चारितार्थ्यात् जन्मवानित्यादौ नियमेन प्रातिपदिकसंज्ञानापत्तेः । तस्मात् अर्थवत्समुदायानां समासग्रहणं नियमार्थमिति नव्योक्तमेव युक्तम्॥

यदुक्तम्— गवित्ययमाहेत्यादौ पूर्वभागस्य पदत्वाभावेन नियमविषयत्वानापत्तिरिति, तदसत्; त्वन्मतेऽपि अभेदपक्षे स्वातन्त्र्येण प्रयोगार्हत्वरूपार्थवत्त्वाभावेन नियमाप्राप्त्या दोषस्य दुर्वारत्वात्। यच्चोक्तम् जन्मवानित्यादौ दोष इति, तदसत्; उत्तरभागस्य प्रत्ययभिन्नत्वेन विशेषणेनादोषात्। तस्मात्प्राचोक्तं युक्तमेव ॥ *

---

* यावानुपलब्धस्तावान्भागः प्रकटितः।

॥ श्रीः ॥

हलन्त्यम् ॥

ननु अणादिसंज्ञार्थानि सूत्राणीत्युक्तम्। अणादिसंज्ञाश्च णकारादीनामित्संज्ञायाम् 'आदिरन्त्येन सहेता' इति सूत्रेण भवन्ति। इत्संज्ञा च 'हलन्त्यम्' इति सूत्रायत्तेति परस्पराश्रयदोषमाशङ्क्याह मूले— हलन्त्यमिति ॥

भाष्ये तु कृत्स्नसूत्रावृत्तिं विनैव प्रकारान्तरेण स दोषः परिहृतः। तथा हि— हल् च ल् चेति समाहारद्वन्द्वं कृत्वा द्वितीयस्य लस्य संयोगान्तलोपे कृते हल् इति निर्देशः। तथा चायमर्थः— उपदेशे अन्त्यं हल् अन्त्यं ल् च इत्स्यादिति। तत्र हलपदार्थावगमं विना चतुर्दश-

सूत्रस्थलस्य उपदेशे अन्त्यलकारत्वादित्त्वे 'आदिरन्त्येन—' इति सूत्रेण हलपदार्थावगमेन णकारादीनामित्संज्ञायाम् अणादिसंज्ञाः सिध्यन्ति ॥

यद्वा, हल् च हल् चेति 'नपुंसकमनपुंसकेन—' इत्येकशेषः। तत्र एको हलशब्दः हस्य ल् हल् इति तत्पुरुषः पुंलिङ्गः । द्वितीयस्तु प्रत्याहारो नपुंसकलिङ्गः, अन्त्यमित्यनेन सामानाधिकरण्यात् । तथा चायमर्थः— हकारसमीपवर्ती लकारः; उपदेशे अन्त्यं हल् च इत्संज्ञं स्यादिति । शेषषष्ठ्याः सामीप्यसंबन्धे पर्यवसानम् ॥

अत्र केचित्— तत्र आद्यपक्षे संयोगान्तलोपो दुर्लभः, यणः प्रतिषेधारम्भात्, तत्प्रत्याख्यानपक्षेऽपि 'झलो झलि' इत्यतो झल इत्यपकृष्य संयोगान्तस्य झलो लोपविधानाच्च । तदुक्तम्— "न वा झलो लोपविधानादिति"। अपि च पदार्थबोधं विना वाक्यार्थबोधासंभवेन हल्प्रत्याहारसिद्धेः प्रागेतत्सूत्रार्थाबोधे प्रसक्ते तदुद्धारार्थोऽयं यत्नः क्रियते। अस्यां चावस्थायां द्वन्द्व एव दुर्लभः, सहविवक्षाया असंभवात्। द्वितीयपक्षेऽपि हस्य ल् हल् इति समासः क्लिष्टः । न हि ब्राह्मणकम्बल इत्यादौ ब्राह्मणसमीपवर्ती अन्यदीयः कश्चन कम्बलः प्रतीयते । अत एव "अनन्तरादिषु न समासोऽनभिधानादिति" स्पष्टमाकरे— इति दूषयन्ति ॥

अत्र वज्रटङ्कीयकृतः— संयोगान्तलोपोऽत्रोपपद्यत एव, 'बहिरङ्गलक्षणत्वाद्वा' इति तृतीयपरिहाराभ्युपगमात् । तथा च मधुशब्दे उपपदे श्च्युतिधातोः क्विपि क्विलोपे ततः 'तत्करोति—' इति णिचि णाविष्ठवद्भावेन टलोपे अस्मात् क्विपि क्विलोपणिलोपयोः कृदन्तत्वेन

प्रातिपदिकत्वात् स्वाद्युत्पत्तौ 'हल्ङ्याब्भ्यः—' इति सुलोपे श्चुत्वस्यासिद्धत्वात् 'स्कोः—' इति सलोपे यस्य संयोगान्तलोपे 'चोः कुः' इति कुत्वे मधुगिति रूपमिति न्यासपदमञ्जरीमैत्रेयाद्युक्तं संगच्छते। किंच विशिष्य तदर्थानवगमेऽपि सूत्रकृदुक्तत्वेन सामान्यतोऽर्थवत्तानिश्चयसंभवेन सहविवक्षोपपत्तिः। द्वितीयपक्षेऽपि संबन्धसामान्ये षष्ठीं स्वीकृत्य समासे अभिमतसंबन्धविशेषस्य तात्पर्यवशेन प्रतीतौ बाधकाभावः, अनभिधानोक्तेः प्राचुर्याभिप्रायत्वात्। अत एव "तुलसीमृत्तिके"त्यादौ तत्प्रतीतिरित्यादिना बहुधा समर्थितवन्तः॥

परे त्वेवमाहुः— यणः प्रतिषेधपक्षे झल्ग्रहणापकर्षपक्षेऽपि हल् च ल् चेति समाहारद्वन्द्वे संयोगान्तलोपः संभवति। तथा हि— प्रतिषेधवचनस्यायमर्थः— इक्स्थानिकस्य आदेशभूतस्य यणः संयोगान्तलोपो न भवतीति; दध्यत्रेत्यादौ संयोगान्तलोपाभावाय तद्वार्तिकारम्भात्, तत्र च यण आदेशरूपत्वात्। 'न वा झलो लोपात्' इति परिहारस्य चायमर्थः— 'संयोगान्तस्य लोपः' इति सूत्रे च अन्तग्रहणस्य न प्रयोजनम्, 'पदस्य' इत्यधिकृतस्य संयोगेन विशेषणे तदन्तलाभात्। अतोऽतिरिच्यमानमन्तग्रहणं पृथक् सूत्रं संपद्यते। तस्य चायमर्थः— अन्तयति=नाशयति स्थानिनमिति अन्तशब्द आदेशवचनः। पूर्वसूत्रं कृत्स्नमनुवर्तते। 'झलो झलि' इत्यतो झल इत्यपकृष्यते। स च षष्ठ्यन्ततया विपरिणम्यते। 'अलोऽन्त्यस्य' इति परिभाषया अन्त्यस्येति लभ्यते। तथा च संयोगान्तं यत्पदं तदन्त्यस्य आदेशभूतस्य झलो लोपः स्यादिति सूत्रार्थः संपद्यते। अत्र पूर्वसूत्रेणैव सिद्धे नियमार्थमिदम्। नियमश्चैवम्— संयोगान्तपदान्त्यस्य आदेशभूतस्य यदि लोपः, तर्हि झल एवेति। तथा च दध्यत्रेत्यादौ यणादे-

शस्य अझल्त्वात् न लोपः । अत एव मनोरमायाम् 'अतो म्' इत्यत्र म् इति पदच्छेद इति, द्वितीयैकवचने द्वितीयमकारस्य संयोगान्तलोप इति चोक्तं संगच्छते, तत्रत्यमकारस्यानादेशत्वान्नियमाभावात् ॥

अथ विपरीतनियमः कस्मान्न भवति— संयोगान्तपदान्तस्य झलो यदि लोपः, तर्हि आदेशभूतस्यैवेति । तथा च भूयानित्यादौ सलोपो न स्यात् । बहुशब्दात् 'द्विवचनविभज्य–' इति ईयसुनि 'बहोर्लोपः–' इति भू इत्यादेशे ईयसुन ईकारस्य लोपे ततस्तद्धितान्तत्वेन प्रातिपदिकत्वात् सौ 'उगिदचाम्—' इति नुमि 'सान्तमहतः—' इति दीर्घे हल्ङ्यादिना सुलोपे संयोगान्तलोपे भूयानिति रूपमिष्यते । उक्तविपरीतनियमाश्रयणे तु सकारस्य आदेशत्वाभावात् सलोपाप्रसक्तेरुक्तरूपं न स्यात् ॥

न चात्र पक्षे कुत्रास्य सूत्रस्य प्रवृत्तिरिति वाच्यम्, मघवानित्यत्र आदेशभूतस्य तकारस्य संभवेन तत्रैव लोपस्य चारितार्थ्यादिति चेत्, न; 'तद्धानासाम्' इत्यादिनिर्देशेन विपरीतनियमाभावज्ञापनात् । यदि विपरीतनियमः स्यात्, तर्हि मतुपस्तकारस्य लोपो न स्यात्, तस्यानादेशत्वात् । तस्मात् विपरीतनियमो न । एतादृशार्थकल्पने च प्रकृतसूत्रे लस्य संयोगान्तलोपप्रतिपादकं भाष्यमेव मानमिति दिक् ॥

वस्तुतस्तु चतुर्दशसूत्रे तवल्कार इत्यत्रैव गुणभूतलकार एव निर्दिश्यते । 'हलन्त्यम्' इत्यत्रापि तस्यैव निर्देशः । लकारस्य 'उपदेशे—' इति सूत्रेणेत्त्वे हल्प्रत्याहारसिद्धौ णादीनामित्संज्ञा । ततोऽणादिप्रत्याहारा इति बोध्यम् ॥

न च 'ऐ औच्' इति सूत्रे चकारस्य इत्त्वं विना अच्प्रत्याहा-

रासिद्धेः हलित्यत्र लकारस्य नेत्त्वम् अच्त्वाभावादिति वाच्यम्, हल् च च् चेति समाहारद्वन्द्वे अनित्यत्वात्समासान्ताप्रवृत्तौ चस्य संयोगान्तलोपे हल् इति निर्देशेन उपदेशे अन्त्यं हल् च् च इदित्यर्थाङ्गीकारेण हल्प्रत्याहारावगमात्प्रागेव चकारस्य इत्त्वप्रवृत्त्या अच्प्रत्याहारसिद्धौ हलित्यत्र लकारस्य इत्संज्ञासत्त्वात् न परस्पराश्रयदोषप्रसक्तिः ॥

न च हल् च च् चेति द्वन्द्वाश्रयणे चकारस्य संयोगान्तलोपानुपपत्तिः, पदद्वयापेक्षत्वेन बहिरङ्गस्य गुणस्यासिद्धत्वेन संयोगसंज्ञाया एवाभावादिति वाच्यम्, संयोगान्तलोपस्याप्यत्र पदद्वयापेक्षत्वेन अन्तरङ्गत्वविरहात् बहिरङ्गपरिभाषाया अनित्यत्वेन प्रवृत्त्यभावोपपत्तेश्चेति दिक् ॥

॥ श्रीः ॥

लोटो लङ्वत् ॥

इदं सूत्रं न कर्तव्यम् । 'लोट् च' इत्यत्र 'ङ्लोट् च' इत्येव न्यासः करणीयः । एवं च लोटो ङित्त्वं लब्धम् ; तेन तामादयः सलोपश्च सिध्यन्त्येव । एवं च यान्तु वान्तु इत्यत्र 'लङः शाकटायनस्य' इति जुस्प्राप्तितत्परिहारकल्पनापि नेति लाघवम् ॥

न चैवं जुह्वतु विदन्तु इत्यत्र 'सिजभ्यस्तविदिभ्यश्च' इति जुस् प्राप्नोतीति वाच्यम्, श्नः शानचः शित्त्वविधानात् ज्ञापकात् अनुबन्धकार्येऽपि क्वचित् 'अनल्विधौ' इति निषेधाभ्युपगमेन ङित्त्वाभावात् तदप्राप्तेः ॥

ननु कथं तर्हि तामादिषु कर्तव्येषु ङित्त्वमिति चेत्, न; 'न ल्यपि' इति लिङ्गात् तस्य क्वाचित्कत्वबोधनात् लक्ष्यभेदात् तामादयो भवन्तीत्यदोषात् ॥

अथ वा सिद्धान्तवत् 'विदो लटो वा' इत्यतो वाग्रहणमनुवर्त्य व्यवस्थितविभाषाश्रयणेन जुस् वार्यत इत्यदोषः ॥

न च 'लोट' इति सूत्राभावे 'सेर्ह्यपिच्च' इत्यादौ लोट इति कस्माल्लभ्यमिति वाच्यम्, 'लोटः सेर्ह्यपिच्च' इति न्यासेनादोषात् ॥

न च 'क्रियासमभिहारे लोट्—' इत्यादौ लोड्विधानेन तदर्थं तत्सूत्रस्यावश्यकत्वमिति वाच्यम्, तत्रापि ङ्लोडिति न्यासेनादोषात् । एवं च पृथग्योगाकरणं लङ्वद्भावाकरणं चेति लाघवमिति दिक् ॥

केचित्तु ङ्लोडित्येव सिद्धे लङ्वद्भावातिदेशः 'आतिदेशिकमनित्यम्' इति बोधनद्वारा जुह्वतु यान्तु इत्यादौ जुसभावार्थ इत्याहुः ॥

॥ श्रीः ॥

तस्य लोपः ॥

अत्र सूत्रे तस्यग्रहणं मास्तु । 'उपदेशेऽजनुनासिक इत्' इति सूत्रात् इत्पदमनुवर्त्य षष्ठ्यन्ततया विपरिणामेन तदर्थलाभात्;

न च 'आदिर्ञिटुडवः' इत्यनेन अनेकालोऽपि इत्संज्ञाया विधानेन "अलोऽन्त्य"परिभाषया अन्त्यस्य स्यात् । "तस्य"ग्रहणे तु तत्सा-

मर्थ्यात् सा नेति वाच्यम्, 'नानर्थके—' इति परिभाषया सर्वलोपसंभवात् ॥

न च सा प्रत्याख्यातेति दोषो दुर्वार इति वाच्यम्, एवं सति 'आदिर्ञिटुडवः' इति न्यासेन आदीनामित्संज्ञाविधानेन अन्त्यानाम् 'उपदेशेऽच्—' इति इत्संज्ञासंभवेन 'ट्वितोऽथुच्' इत्यादौ ट्च उश्च ट्व इतौ यस्येत्यर्थकरणेनादोषादिति चेत्, न; कृञादिधातोरुदित्त्वप्रयुक्तकार्यप्रसक्त्या प्रत्येकमित्संज्ञाया अनौचित्येन सर्वलोपार्थं 'तस्य-ग्रहणस्यावश्यकत्वात् ॥

वस्तुतस्तु इत्पदस्य प्रथमान्तस्यैवानुवृत्त्या लाघवेन च लुप्यत इत्यर्थकरणेन षष्ठीनिर्देशाभावात् "अलोऽन्त्य"परिभाषाया अप्रवृत्त्या सर्वलोपसंभवात् "तस्य"ग्रहणं न कर्तव्यमेवेति दिक् ॥

॥ श्रीः ॥

धिन्विकृण्व्योर च ॥

'तनादिकृञ्भ्य उः' इत्यत उरित्यनुवर्तते । 'कर्तरि' 'सार्वधातुके' इति चानुवर्तते । तथा च अनयोरकारोऽन्तादेशः, उप्रत्ययश्च कर्त्रर्थे सार्वधातुके इति सूत्रार्थः ॥

इमौ च भ्वादी । प्राञ्चस्तु स्वादिगणे पठन्ति; तदयुक्तम्, स्वादित्वाभ्युपगमे तत्सामर्थ्यात् पक्षे श्नुप्रत्यये वस्य ऊठि अनिष्टरूपापत्तेः। बोपदेवस्तु विकरणलोभात् तनादित्वमनयोः स्वीचकार ॥

धिनोतीत्यादौ अकारादेशे अतो लोपे तस्य स्थानिवद्भावेन न गुणः । एतदर्थमेव अकारविधिः ॥

न च उपदेशे अकारान्तत्वाभावात् कथमल्लोपः प्रवर्तेतेति वाच्यम्, आर्धधातुकोपदेशकाले अकारान्तत्वस्य विवक्षितत्वात् इह च 'धिन्विकृण्व्योर च' इति श्रुतत्वात् अकारादेशे कृते चानुकृष्टस्य उप्रत्ययस्य पश्चाज्जायमानतया तदुपदेशे अकारान्तत्वाक्षतेः ॥

न च 'धिन्विकृण्व्योर्लोपः' इति लोप एव विधीयताम् । गुणस्तु 'न धातुलोपे—' इति निषेधान्न भविष्यतीति वाच्यम्, अत्र उप्रत्ययरूपार्धधातुकस्य धात्वंशलोपनिमित्तत्वाभावेन तन्निषेधाप्रसक्तेः । 'धातुलोप' इति हि बहुव्रीहिः, न तु तत्पुरुषः; तेन लूञ् लवितेत्यादौ न दोष इत्यन्यत्र स्पष्टम् ॥

न च तद्भावभावित्वमात्रेणापि निमित्तत्वं स्वीक्रियते । स्पष्टं चेदं 'द्विर्वचनेऽचि' इति सूत्रे शब्देन्दुशेखरे । तथा च प्रकृतेऽप्यार्धधातुकस्य धात्वंशलोपनिमित्तत्वानपायेन 'न धातु—' इति निषेधस्य निर्बाधतया इष्टसिद्धेर्वलोप एव विधीयताम्, किमकारविधानेनेति वाच्यम्, तस्य सूत्रस्य भाष्ये प्रत्याख्यातत्वेन तत्पक्षे गुणाभावार्थमकारविधानस्यावश्यकत्वात् । उक्तं च भाष्ये—"प्रत्याख्यायते स योगः, तथा च गुणवृद्धी स्याताम्" इति ॥

अत्र 'धिविकृव्योर च' इत्येव सुवचम् ॥

न चैवमन्तरङ्गत्वात् अनेनाकारादेशे अनन्तरं प्रवर्तमानो नुम् अकारात्परः स्यात् । सिद्धान्ते तु नुमनुषक्तयोरेव तयोः पाठात्

अदोष इति वाच्यम्, नुम्विधौ धातुपदस्य धातूपदेशकाललाक्षणिकतया तस्यापि अन्तरङ्गत्वेन उभयोरन्तरङ्गयोः परत्वान्नुमि इष्टरूपसिद्धेः। अत एव हुण्डेत्यादौ 'गुरोश्च हलः' इत्यप्रत्ययासिद्धिः। तथा च भाष्यम्— 'नुम्विधावुपदेशिवद्वचनं कर्तव्यमिष्टप्रत्ययसिद्ध्यर्थम्; धातुग्रहणसामर्थ्याद्वा तदुपदेशे नुम्विधानम्' इति ॥

न च धातुग्रहणाभावे भवितेत्यादौ तासि नुम् स्यादिति वाच्यम्, तासित्यकारान्तस्यैव पठनीयत्वात्। अधिकं त्वस्मदीय"नुम्विधिविचारे" द्रष्टव्यमिति दिक् ॥

अमि पूर्वः ॥

ननु 'शुक्लाम्बरधरम्—' इति पद्ये शुक्लशब्दस्य अम्बरशब्दे परतः सवर्णदीर्घं बाधित्वा अमि पूर्वः प्रवर्तताम्;

न च 'प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम्' इति परिभाषया अत्र प्रत्ययस्यैव अमो ग्रहणादिह तन्न प्रवर्तत इति वाच्यम्, अकः अमि योऽच् तस्मिन् परे पूर्वरूपविधानेन अनुवादत्वादनुवादे परिभाषाणामनुपस्थितेः ॥

ननु किमर्थम् अमि योऽजिति व्याख्यायते? तथा च तत्परिभाषाया उपस्थित्या न दोष इति चेत्, न; तथा सति 'एकः पूर्वपरयोः' इत्यधिकारात् अमः सर्वस्यापि पूर्वरूपप्रसङ्गात्। तस्मात् 'इको यणचि' इत्यतः अचीत्यनुवर्तमानम् अमि इत्यनेन विशेषयितव्यमिति अनुवादत्वेन परिभाषाप्रवृत्तिर्दुरुपपादा ॥

अवश्यं च 'विधौ परिभाषोपतिष्ठते, नानुवादे' इति परिभाषोररीकर्तव्या; अन्यथा 'वृद्धिर्यस्याचामादिः—' इति सूत्रेऽपि वृद्धिग्रहणमस्तीति इक्परिभाषोपतिष्ठेत। ततश्च तिकस्यापत्यं तैकायनिः, 'तिकादिभ्यः फिञ्' उत्से भवः औत्सः, 'उत्सादिभ्योऽञ्' नृकुट्यां भवः नार्कुटः, 'तत्र भवः' इत्यण्। तस्येदं तैकायनीयम्, औत्सीयम्, नार्कुटीयमित्यादावेव 'वृद्धाच्छः' इति च्छः स्यात्; न तु शालीयो मालीय इत्यादौ ॥

ननु 'प्रस्थेऽवृद्धमकर्क्यादीनाम्' इति पूर्वसूत्रेण इन्द्रप्रस्थ इत्यादौ अवृद्धस्य प्रस्थशब्दे परतः पूर्वपदाद्युदात्तविधानमिति मालाप्रस्थ इत्यादौ अवृद्धार्थम् 'मालादीनां च' स्वरविधानारम्भ एव 'वृद्धिर्यस्याचाम्—' इति सूत्रे इक्परिभाषा नोपतिष्ठत इति ज्ञापयति;

न च 'वा नामधेयस्य' इति वार्तिकेन वृद्धसंज्ञाविकल्पात् वृद्धत्वपक्षे स्वरार्थं विधिः स्यादिति वाच्यम्, सूत्रकारमते वार्तिककारस्यानभ्युपगमात् 'पौरुषेयं नाम नामधेयशब्दार्थः' इति कैयटे स्थितत्वात् 'नामधेयशब्दः सांकेतिकेषु रूढः' इति हरदत्तोक्तेश्च मालाप्रस्थ इत्यत्रातथात्वात्। एवं च — विधौ परिभाषोपतिष्ठते इति परिभाषाया अनाश्रयणे 'वृद्धिर्यस्य—' इत्यत्र इक्परिभाषोपस्थाने शालीयादिर्न सिध्यति— इति कौस्तुभकृतोक्तं चानादरणीयमिति चेत्, न; 'वृद्धिर्यस्य—' इत्यत्र 'मालादीनां च' इति लिङ्गात् इक्परिभाषोपस्थानाभावेऽपि 'उत्तरपदवृद्धौ सर्वं च' इत्यत्र तदुपस्थितौ सर्ववैदर्भक इत्यत्रैव सर्वशब्दस्यान्तोदात्तत्वं स्यात्, सर्वपाञ्चालक इत्यत्र न स्यात्। अत एव 'अचः परस्मिन्—' इत्यत्र परस्मिन्निति आदेशविशेषणात् 'तस्मिन्निति' इति परिभाषाया अनुपस्थानात् अक्षो-

पस्य स्थानिवद्भावेन प्रतिदीव्न इत्यत्र 'लोपो व्योर्वलि' इति लोपो न; अन्यथा पट्यतीत्यादाविव वृद्ध्याद्यभावाय स्थानिवद्भावः स्यात्। तथा च 'शुक्लाम्बरधरम्' इत्यत्र अमि पूर्वो दुर्वार एव;

न "चार्थवद्ग्रहणपरिभाषया अनर्थके न स्यादिति वाच्यम्, अस्या अप्यनुवादविषये अप्रवृत्तेरिति चेत्, न; 'अनुवादे परिभाषाणामनुपस्थितिः' इति परिभाषायाः 'इको गुणवृद्धी' इत्यादिसौत्रपरिभाषाविषयत्वेन 'प्रत्ययाप्रत्यययोः—' इति परिभाषायाः प्रकृते प्रवृत्त्या दोषाभावात्॥

न च नव्यमते 'प्रत्ययाप्रत्यययोः—' इति परिभाषा नास्तीति स दोषस्तन्मते तदवस्थ एवेति वाच्यम्, "अर्थवद्ग्रहण" परिभाषया तन्मतेऽपि वारणसंभवात्। 'तस्थस्थमिपां तांतंतामः' इति निर्देशेन 'अमि पूर्वः' इत्यस्यानित्यत्वाश्रयणात् प्रकृतेऽपि न दोष इति तु न सम्यक्, आदेशस्वरूपप्रतिपत्तये अनुस्वारपरसवर्णाद्यकरणवत्पूर्वरूपाकरणस्याप्युपपन्नत्वादिति दिक्॥

॥श्रीः॥

यस्मिन्विधिस्तदादावल्ग्रहणे॥

यस्मिन्निति सप्तम्यन्तपदार्थकस्य स्वतन्त्रसर्वनाम्नो निर्देशः। सति सप्तमी; न त्वधिकरणे, 'वान्तो यि—' इत्यादौ तत्संभवेऽपि 'नेड्वशि—' इत्यादौ तदसंभवात्। 'अल्ग्रहणे' इत्यत्र हि अधिकरणल्युटा अल उच्चारण इति नार्थः, प्रत्याहारग्रहणे 'तस्मा-

न्नुडचि' इत्यादौ दोषापत्तेः 'इकोऽचि व्यञ्जने मा भूत्' इत्यत्र व्यञ्जनादौ इति भाष्यविरोधापत्तेश्च। किं तु बाहुलकात्करणे ल्युट्। अल्पप्रतिपादकशब्दे सतीत्यर्थः। तदादावित्यत्र तच्छब्देन सप्तम्यन्तार्थः परामर्शनीयः। एवं च सप्तम्यन्ते विशेषणीभूते अल्पप्रतिपादकशब्दे सति यद्विधानम्, तत्तदादौ बोध्यमित्यर्थः। 'अल्ग्रहणे' इति विशेषणस्यापि ग्रहणपदस्य 'समुद्राभ्राद्घः' इति निर्देशेन पूर्वनिपातप्रकरणस्यानित्यत्वात्परनिपातः। सप्तम्यन्तं विशेषणं वर्णरूपं तदादेः संज्ञेति फलितोऽर्थः॥

अस्यां च लिङ्गम् 'द्यतिस्यति—' इति सूत्रम्; अन्यथा तान्ते कितीत्यर्थे इदं सूत्रं व्यर्थं स्यात्। किं च 'अपो भि' इति सूत्रं ज्ञापकम्; अन्यथा भान्ते परे तत्वविधाने वैयर्थ्यं स्पष्टमेव। 'न ल्यपि' इति सूत्रं ज्ञापकम्; अन्यथा 'घुमास्था—' इति सूत्रे हलन्ते कितीत्यर्थापत्त्या ल्यपीत्वप्राप्त्यभावेन तद्वैयर्थ्यं स्पष्टतरमेवेति नानापाठकेनोक्तम्॥

'वान्तो यि—' इति सूत्रं च अस्यां ज्ञापकम्। तद्धि गव्यमित्यादाववादेशाय; यदीदं न स्यात् तदा यान्तप्रत्ययासंभवात्तद्वैयर्थ्यं स्फुटमेव। 'गुणोऽपृक्ते' इत्यपृक्तग्रहणं च ज्ञापकम्। तद्धि और्णोदित्यत्र 'ऊर्णोतेर्विभाषा' इति विकल्पबाधनाय; यदीयं न स्यात् तदा 'उतो वृद्धिर्लुकि हलि' इत्यतो हलि इत्यनुवृत्त्या विहितस्य 'ऊर्णोतेर्विभाषा' इति विकल्पस्य हलन्तपित्सार्वधातुकविषयतया चरितार्थस्य गुणेन और्णोदित्यत्र बाधसंभवेन अपृक्तग्रहणं व्यर्थमेव। अस्यां तु सत्यां हलादावेव विकल्पेन भाव्यतया अजिवषये अचरितार्थत्वादुभयोरेकविषयत्वप्राप्तौ मुख्यहलादौ विकल्पः व्यपदे-

शिवत्त्वेन हलादावपृक्ते तु नित्यं गुण इत्यपृक्तग्रहणमर्थवत् ॥

यस्मिन्नित्यनुपादाने विशेषणविशेष्यभाववत्सु सर्वेषु तदन्ततदादिविध्योः पर्यायेण प्रवृत्तिः स्यात् । 'अल्ग्रहणे' इत्यनुपादाने 'ष्यङः संप्रसारणम्—' इत्यादौ पुत्राद्युत्तरपदयोः संप्रसारणं स्यात् ॥

अस्याश्च तदन्तविध्यपवादत्वात् तदन्तविधेश्च विशेषणविशेष्यभावनियतत्वेन एतत्परिभाषायां विशेषणस्य सप्तम्यन्ततया विशेष्यस्यापि सप्तम्यन्तत्व एवास्याः प्रवृत्तिः । तेन 'डः सि धुट्' इत्यादौ सादेः पदस्येति नार्थ इति लिट्त्सु इत्यादौ नाव्याप्तिः । उभयोः सप्तम्यन्तत्वावश्यकत्वस्य लिङ्गं तु 'आर्धधातुकस्य—' इति सूत्रे आदिग्रहणम् । अत एव 'ञि च पदे' इति सूत्रस्थपदग्रहणं 'ङमो ह्रस्वात्—' इत्युत्तरसूत्रेऽनुवृत्त्यर्थमिति कौमुदीकाराः । तत्र च किमर्थमिति चेत्, उच्यते— माषकुम्भवापेनेत्यादौ कुम्भपदस्य 'उत्तरदत्वे च—' इति निषेधेन अपदत्वात् 'पदव्यवायेऽपि' इति निषेधो न स्यादित्याशङ्क्य उत्तरस्य पदसंज्ञाप्रयोज्यकार्ये कर्तव्य इत्यर्थस्वीकारेण निषेधं प्रापय्य रूपे साधिते परमदण्डिनावित्यादौ उत्तरपदस्य तत्कार्यित्वाभावादत्र एव कार्यित्वात् ङमुट् दुर्वार इत्याशङ्क्य ङमुड्विधिसूत्रे पद इत्यनुवृत्त्या अजादेः पदस्येति व्याख्यानेन प्रत्ययस्य पदत्वाभावात्तन्निषेध इति तत्रोक्तम्; अन्यथा पदस्येत्यनुवृत्त्या तदर्थसिद्धेस्तद्वैयर्थ्यं दृढतरमेवेति ॥

अत्र ब्रूमः—परिभाषाया अविशेषेण प्रवृत्तिरस्तु । इड्विधिसूत्रे आदिग्रहणम् 'ञि च पदे' इत्यत्र पदेग्रहणं च न कार्यम्, लाघवात् 'तीषसह—' 'सेऽसिचि—' इत्यादौ व्यभिचाराच्च । न च वलादेः इत्यत्रोपात्तेन वल्पदेन ति से इत्यनयोः संबन्धे तकारसकाररूपत-

लादेरित्यर्थलाभ इति वाच्यम्, एकदेशान्वयापातात्। किंच नियमांशे ज्ञापकत्वमपि न संभवति; वलि परे यदार्धधातुकं तस्येडित्यर्थापत्त्या भविष्यतीत्यत्रैव स्यात्, न तु भवितेत्यादौ। किंच 'नेड्वशि कृति' इत्यादौ षष्ठ्यर्थसप्तम्यां तदादिविधिवत् 'आर्धधातुके वलि' इति न्यासेन तदादिविधिसंभवादादिग्रहणं सर्वथा व्यर्थमेव। किंच उभयोः सप्तम्यन्तत्व एव प्रवृत्तौ 'ह्रस्वात्तादौ—' 'एकहलादौ—' 'तादौ च निति—' इत्यादौ आदिग्रहणं व्यर्थं सत् क्वचिदल्पकृतिकसप्तम्यन्तस्य विशेष्यत्वं सूचयति। तेन 'डः सि धुट्' इत्यादौ न तदादितदन्तविध्योः प्रसक्तिः। तेन 'इषुगमियमां छः' इत्यत्र अचि शिति इति संबन्धे अज्रूपे शितीत्यर्थः, न त्वजादौ शितीति; अत एव इषेः श्नः शानचि इषाण इत्यत्र छत्वं न। किंच 'मादुपधायाः—' इति सूत्रे पदस्येत्यनुवृत्तौ मत्वन्तं यत्पदमित्यर्थापत्त्या वृक्षवान् इत्यत्रैव वत्वप्राप्त्या वृक्षवन्तावित्यत्राप्राप्त्या 'न लोपः—' इति सूत्रे 'अन्त-' ग्रहणेन त्रिपाद्यां पदस्य इत्यस्य अवयवषष्ठीत्वानुमानेत साधितत्वात् प्रकृतेऽपि पदावयवस्य धुडित्यर्थेन धुङ्सिद्धिः। किंच 'द्यति—' इत्यादि ज्ञापकमपि न भवति। प्रथमम् 'द्यति—' इति सूत्रे तान्ते कितीत्यर्थापत्तावपि दितवानित्यादिक्तवत्वन्ते तान्तत्वस्य संभवात्। किंच क्तप्रत्ययान्तदातशब्दस्य दातमत्तीति दातादिति समासे तमाचष्टे इत्यर्थे णिचि टिलोपेऽस्य चारितार्थ्यम्। 'अपो भि' इति ज्ञापकमपि न भवति, विशेषणविशेष्यभावव्यत्ययकल्पनेन भरूपे प्रत्यय इत्यर्थे प्रत्ययावयवे प्रत्ययत्वव्यवहारेण सूत्रसार्थक्यात्। 'वान्तो यि' इत्यापि न लिङ्गम्, यान्त इत्यर्थापत्तावपि गव्यिता इत्यादावल्लोपे कृते यान्तत्वसंभवात्। किंच गोमयमत्ति गोमयात् तमाचष्टे णिचि टिलोपे अज्झलादेशत्वेन स्थानिवत्त्वाभावात् प्रत्ययस्य यान्तत्वसंभ-

वात् । 'घुमा—' इति सूत्रे हलन्त इत्यर्थापत्तावपि तस्य क्तवतु-प्रत्ययान्ते चरितार्थतया प्रदाय च्छत्रमित्यादौ तुकि तत्र हलन्तत्वात् प्राप्तेत्ववारणार्थत्वात् 'न ल्यपि' इति सार्थकमिति तदपि न ज्ञापकं भवति ॥

यदुक्तम्— यस्मिन्नित्यस्याः उभयोः सप्तम्यन्तत्व एव प्रवृत्तिरित्यत्र फलाभाव इत्यादि, तन्न; अस्यास्तदन्तविध्यपवादत्वेन विशेषणविशेष्यवाचकयोरुभयोः सप्तम्यन्तत्व एव प्रवृत्तेर्न्याय्यत्वात्, अनायासलब्धमर्थं परित्यज्य सूत्रघटकपदानां प्रत्याख्यानस्यैवातिदुष्टत्वात् । अत एव पदेग्रहणम् 'ङमो ह्रस्वात्—' इत्येतदर्थमिति कैयटग्रन्थानुसारि मूलं संगच्छते । यच्चोक्तम्— 'तीषसह—' इत्यादौ व्यभिचार इति, तदपि न; तत्रानुवृत्तस्य वलादेरित्यस्य 'ति' इति विशेषणम् । तीति सौत्री प्रथमार्थे सप्तमी । तकाररूपवलादेरित्यर्थ इति शेखर एव प्रतिपादितत्वात् । यदपि—नियमांशे आदिग्रहणस्य लिङ्गत्वमपि दुर्घटमिति, तन्मन्दम्; 'जुष्टार्पिते च' इति सूत्रे अर्पित इति प्रयोगासांगत्यापातात् । 'परोक्षे लिट्' इति सूत्रे साधनेषु परोक्षेषु इत्यर्थकल्पने 'यदा रथ्यायां तण्डुलोदकं दृष्टं कथं तत्र भवितव्यम्' इति भाष्यप्रयोगोऽप्यनुपपन्नः स्यात् । वलादावार्धधातुके परतः अङ्गस्य भवतीति च न, तथा सति 'दीधीवेवीटाम्' इति इड्ग्रहणवैयर्थ्यापत्तेः । यदुक्तम्—ज्ञापकत्वं न संभवतीति, तन्मन्दम्; द्यतीत्यादीनां ज्ञापकत्वाभावेऽपि 'अपो भि' 'गुणोऽपृक्ते' इत्यनयोर्ज्ञापकत्वस्य स्फुटत्वात् । न च विशेषणविशेष्यत्वविपर्ययेण भरूपे प्रत्यये इत्यर्थकरणेन सार्थक्यमिति वाच्यम्, प्रत्ययावयवे प्रत्ययत्वानङ्गीकारस्याप्यनेन ज्ञापनात् । अत एव 'इदुदुपध-

स्य—' इति सूत्रे प्रत्ययस्य यो विसर्जनीयस्तस्य न भवतीत्यर्थ एवाकरारूढः।'अप्रत्ययो यो विसर्ग' इति सामानाधिकरण्येनान्वये तु सर्पिष्करोतीत्यत्र 'इसुसोः—' इति वैकल्पिकषत्वप्रवृत्तावपि तिष्ठतु सर्पिः पिब त्वमुदकमित्यत्र 'इदुदुपधस्य—' इति षत्वप्रसङ्ग इति भाष्याभिप्रेतमिति तत्त्वबोधिनीकारादिभिरुक्तम्, प्रत्ययावयवे प्रत्ययत्वस्वीकारे तु सकारेऽपि तत्त्वान्निषेधः सुलभ इति तदसंगतं स्यात्। 'आदेशप्रत्ययोः' इत्यत्र प्रत्ययपदं प्रत्ययावयवपरमिति मत्वा हरिष्वित्यादौ षत्वं साधितम्। अन्यथा आदेशपद इव प्रत्ययपदेऽपि प्रत्ययात्मक इत्यर्थाङ्गीकारे चिकीर्षावित्यत्रैव स्यात् न तु हरिष्वित्यादाविति 'हलि सर्वेषाम्' इत्यादिनिर्देशेन प्रत्ययमात्रे अवयवषष्ठीत्वमाश्रित्य साधितम्। एतत्सत्त्वे तु उक्तस्थले षत्वं निर्बाधमिति महान्प्रयासो निरर्थकः स्यात्। यदप्युक्तम्— 'न ल्यपि' इति न ज्ञापकमिति, तन्न; प्रदाय च्छत्रमित्यत्र तुको बहिरङ्गतया असिद्धत्वेन ईत्वाप्राप्तेः। 'नाजानन्तर्ये—' इति तु न, तस्या असत्त्वात्॥

यदुक्तम्— अस्याः सप्तम्यन्तविशेषणविशेष्यविषयत्वनियमः स्वीकार्यः; पदेग्रहणमपि कर्तव्यम् इति, तत् गौरवात्फलाभावाच्चोपेक्ष्यम्; 'ङः सि' इति परित्यज्य 'ङः सो धुट्' इति न्यासेनादोषात्। अथवा 'ह्रस्वात्तादौ—' इत्यादिग्रहणात् तदनित्यत्वेन वा क्वचिदल्प्रकृतिकसुबन्तस्य विशेष्यत्वेन वा न तत्प्रसर इति सिद्धत्वात्। किं च 'ङमो ह्रस्वादचि—' इत्यत्र पदेग्रहणानुवृत्त्या परमदण्डिनावित्यादौ दोषपरिहारग्रन्थः 'तस्मान्नुडचि' इति सूत्रस्थशेखरविरुद्धः। तत्र हि 'तस्य नुगचि' इति नोक्तम्, अनश्व इत्यादौ ङमुट्प्रसङ्गात्। अश्वस्य प्रत्ययलक्षणेन पदत्वादित्युक्तम्। तत्र प्रत्ययलक्षणं दुरुपपादम्,

उत्तरस्य कार्यित्वे 'उत्तरपदत्वे च—' इति निषेधात् । तथा च पदत्वाभावात् ङमुटः प्राप्तिरेव नास्तीति विरोधः । किंच माषकुम्भवापेनेत्यर्थं कार्यित्वनिवेशोऽपि न करणीयः पूर्वदण्डिप्रिय इति त्रिपदबहुव्रीहौ 'तद्धितार्थ—' इति समासे दण्डिन्नित्यस्य नलोपात्मककार्याधिकरणतया प्रत्ययलक्षणाभावेन नलोपानापत्तौ तदर्थं दीयमानेन मध्यमपदत्वानाक्रान्तेति विशेषणेनैव माषकुम्भवापेनेत्यत्र कुम्भपदस्य मध्यमपदत्वाक्रान्ततया निषेधाविषयत्वेन 'पदव्यवायेऽपि' इति निषेधसिद्धौ तदर्थं कार्यित्वानिवेशस्यानावश्यकतया परमदण्डिनावित्यादौ न दोषप्रसर इति तदर्थम् 'ङमो ह्रस्वादचि—' इत्यत्र पदेग्रहणं नानुवर्तनीयमेव ॥

यदुक्तम्— 'ङः सो धुट्' इति न्यासः क्रियते । नियमो नाश्रयणीयः । पदेग्रहणं च व्यर्थमिति, तन्न; वैचित्र्यार्थं तथा योगारम्भात् । 'ङः सो धुट्' इति न्यासे तु गौरवम् । 'ङमो ह्रस्वादचि—' इति सूत्रे अजादेः पदस्येत्यर्थे शेखरविरोधोऽपि न, अनश्वप्रिय इत्यदौ त्रिपदबहुव्रीहौ कृते पूर्वयोः नञ्तत्पुरुषे मध्यमपदत्वानाक्रान्तोत्तरपदस्याभावेन तत्र 'उत्तरपदत्वे च' इति निषेधाभावेन तत्र ङमुट् दुर्वार इति तदाशयात् । यदुक्तम्— मध्यमपदत्वानाक्रान्तविशेषणेनैव सिद्धेः कार्यित्वनिवेशो नाश्रयणीय इति, तन्न; दधिसेचिवासः दधिसेचिशयः इत्यादौ 'शयवासवासिषु—' इति सप्तम्या अलुकि सेकशब्दस्य पदत्वनिमित्तककुत्वाभावार्थं प्रत्यासत्तिलभ्यस्य तत्समासीयत्वनिवेशनस्यावश्यकत्वात् तत्समासीयमध्यमत्वानाक्रान्तस्यैव उत्तरस्य ग्रहणेन 'माषस्य कुम्भः माषकुम्भः, तस्य वाप' इति षष्ठीतत्पुरुषपूर्वपदकतत्पुरुषे कुम्भपदस्य तत्समासीयमध्यमपदत्वानाक्रान्ततया तस्य प्रत्ययलक्षणेन पदत्वासिद्ध्यर्थं कार्यित्वनिवेशस्यावश्यकत्वात् ॥

यदुक्तम्— वैचित्र्यार्थमित्यादिना आवश्यकत्वादित्यन्तेन, तन्न; पूर्वदण्डिप्रियः इत्यादित्रिपदबहुव्रीहौ अवान्तरतत्पुरुषीयोत्तरपदत्वं दण्डिन्नित्यस्यास्तीति तत्समासीयमध्यमपदत्वानाक्रान्ततया निषेधापत्तेरतिव्याप्तिर्दृढतरा भवति ॥

यदुक्तम्— पूर्वदण्डिप्रिय इत्यादिना भवतीत्यन्तेन, तदापाततः; तत्समासप्रयोजकैकार्थीभावप्रयोज्यसमासीयमध्यमपदत्वानाक्रान्तेति स्वीकारेण प्रकृते उभयसमासप्रयोजकैकार्थीभावस्यैकत्वेन दण्डिन्नित्यस्य विवक्षितमध्यमपदत्वसत्त्वात् । अतः पदेग्रहणमावश्यकमेव ॥

यू स्त्र्याख्यौ नदी ॥

हे गौरि हे वधु इत्याद्युदाहरणम् ।

ननु अत्र इश्च उश्च इति ह्रस्वयोर्द्वन्द्वं कृत्वा सवर्णग्रहणेन ईकारान्तस्य ऊकारान्तस्य च संज्ञा विधीयते, उत ईश्च ऊश्चेति दीर्घयोर्द्वन्द्वं कृत्वा तदन्तयोः संज्ञा विधीयते? नाद्यः, मते धेनो इत्यादेरसिद्धिप्रसङ्गात् । न च संबुद्धिह्रस्वे कृते पुनर्ह्रस्वस्य गुणप्रवृत्त्या इष्टसिद्धिरिति वाच्यम्, ह्रस्वविधिसामर्थ्याद्गुणाप्रवृत्तेरवश्याभ्युपेयत्वात्; अन्यथा 'हे गौरि' इत्यादावनिष्टापत्तेः । नापि द्वितीयः, यू इत्यस्मादौप्रत्यये 'दीर्घाज्जसि च' इति पूर्वसवर्णदीर्घनिषेधेन इको यणि य्वौ इति स्यात् । तस्मादुभयमपि न संघटत इति ॥

यदुक्तम्— ह्रस्वपक्षे मतिधेन्वादीनामपि नदीत्वप्रसङ्ग इति, तन्न; 'शेषो घि—' इति घित्वेन नदीत्वबाधात् । न च ह्रस्वपक्षे

मत्यादीनामपि नदीत्वात् तदविषयस्य पुंनपुंसकलिङ्गेकारोकारान्तस्यैव शेषशब्देन ग्राह्यतया मत्यादौ घिसंज्ञाया एवासंभवेन कथं तया नदीसंज्ञाबाध इति वाच्यम्, 'शेषो घि—' इत्यत्र शेषग्रहणस्याकर्तव्यत्वात्। न च तदभावे मतिधेन्वादौ 'ङिति ह्रस्वश्च' इति नदीत्वपक्षेऽपि घित्वे गुणापत्तिरिति वाच्यम्, आकडारीयत्वेन निरवकाशया 'ङिति ह्रस्वश्च' इति नदीसंज्ञया स्त्रीपुंसयोः सावकाशाया विसंज्ञाया बाधात्। तथा च ह्रस्वनिर्देशपक्षे न कश्चिद्दोषः। यदपि— दीर्घनिर्देशे य्वाविति निर्देष्टव्यमिति, तदपि न; 'सुपां सुलुक्—' इति लुकि, पूर्वसवर्णे ऊकारे कृते सवर्णदीर्घे वा यू इति सिद्धेः। तस्मात्पक्षद्वयेऽपि निर्वाहः सुकर इति ॥

नन्वेवमपि यदि दीर्घनिर्देशस्तदा 'ङिति ह्रस्वः' इत्यत्र अनुवृत्ताभ्यां यूभ्यां ह्रस्वस्य विशेषयितुमशक्यतया ह्रस्वमात्रस्य विकल्पे मात्रे इत्यादौ 'आण्नद्याः' इत्यादिकं प्राप्नोति। ह्रस्वनिर्देशे तु यूपदह्रस्वपदयोः सामानाधिकरण्येन मात्र इत्यादौ न दोषः। न च ह्रस्वनिर्देशपक्षे 'ङिति ह्रस्वश्च' इत्यत्र ह्रस्वग्रहणं व्यर्थम्, मतिशब्दादाविव गौर्यादावपि ङिद्विषये विकल्पापत्त्या गौर्ये इत्यप्यनिष्टं स्यादिति तद्व्यावृत्त्यर्थं तत्सार्थक्यात्। तस्मात् दीर्घनिर्देशपक्षे मात्रे इत्यादौ दोषो दुर्वार इति ॥

अत्र ब्रूमः— दीर्घनिर्देशे स्वरितत्वबलात् 'ङिति ह्रस्वश्च' इत्यत्र तयोरनुवृत्तावीकारोकारौ यौ ह्रस्वौ इति विशेषणसामर्थ्यात् इकारोकारसंबन्धिनोर्ह्रस्वयोर्ग्रहणमिति मात्रे इत्यादौ विकल्पो न भविष्यति। यथा 'राधो हिंसायाम्' इत्यत्र 'अत एकहल्—' इत्य-

तः 'अत' इत्यनुवृत्तिसामर्थ्यात् राधेर्मात्रिकाकारासंभवेऽपि अकारमात्रपरत्वं स्वीकृतम्, तथेहापि ईकारोकाररूपौ ह्रस्वावित्याकारकाविशेषणविशेष्यभावान्यथानुपपत्त्या ईकारोकारसजातीयौ ह्रस्वावित्यर्थः फलिष्यति। तेन मात्र इत्यादौ न कश्चिद्दोषः। तत्र राधेरन्त्यस्य एत्वव्यावृत्त्यर्थमत इत्यनुवर्तितम्। यत्तु— 'अत' इति नानुवर्तते। न च अन्त्यस्य धस्यैत्वं स्यादिति शङ्क्यम्, 'एकहल्मध्ये' इत्यनुवर्तनात्। यत्तच्छब्दाध्याहारेण राध एकहल्मध्यवर्ती यः तस्य एत्वमित्यर्थादिष्टसिद्धिरिति वदन्ति; तत्तुच्छम्, फणादिसप्तान्तर्गतयोः भ्राजिभ्लाश्योराकारस्य एकहल्मध्यवृत्तित्वाभावेन एत्वस्य अन्त्यादेशत्वप्रसङ्गात्। तस्मात्कालविशेषमविवक्ष्य 'अत' इत्यनुवृत्तिरावश्यिक्येव। तस्माद्दीर्घयोर्निर्देशे न कश्चिद्दोषः॥

नन्वेवमपि यूग्रहणं व्यर्थम्। न च मात्रे, स्वस्त्रे इत्यादौ दोषः, 'मातुरुत्संख्या—' इति निर्देशेन ऋकारान्तस्त्रीलिङ्गस्य नदीत्वाभावज्ञापनात्। न च खट्वादावतिव्याप्तिः; तथा सति 'ह्रस्वनद्यापः—' 'ङेराम्—' इत्यत्र नदीत्वादेव नुडामोः सिद्धौ पुनराब्ग्रहणादाबन्तानां नदीत्वाभावज्ञापनात्। न च स्त्रीलिङ्गे विश्वपादौ दोषः, आख्याग्रहणस्य नित्यस्त्रीलिङ्गपरिग्रहार्थतया विशेष्यनिघ्नानां विश्वपादिशब्दानामतथात्वेनादोषात्। तस्माद्यूग्रहणं व्यर्थमिति॥

अत्र ब्रूमः— स्वसृद्योनावादिष्वतिव्याप्तिवारणाय यूग्रहणम्। न च 'स्वसुश्छण्' 'नावो द्विगोः' 'गोग्रहणे द्योरुपसंख्यानम्' इत्यादिनिर्देशादेषु न दोषः; अन्यथा 'आण्नद्याः' इत्याडागमवैशिष्ट्येन निर्देष्टव्यमिति वाच्यम्, तेषां स्वरूपपरत्वेन स्त्रीलिङ्गत्वे मानाभावात्। न चैषामनुकरणत्वेनानुकार्यनिष्ठनदीत्वस्याप्यानयनसंभवात्तत्कार्यं कथं न

स्यादिति वाच्यम्, 'प्रकृतिवत्—' इत्यस्यानित्यतया अनुकार्ये नदीकार्यसत्त्वेऽपि अनुकरणे तदभावनिर्वाहात् । अत एव 'क्षिय' इत्यत्रानुकार्यधातुत्वमादायेयङ्, अनित्यत्वेन प्रातिपदिकत्वनिबन्धनविभक्तिश्च सिद्धेति तत्र तत्र स्पष्टम् । अपि च हलन्तस्त्रीलिङ्गेऽतिव्याप्तिर्यूग्रहणं विना दुरुद्धरेत्यावश्यकं यूग्रहणमिति ॥

प्रकारान्तरेण यूग्रहणप्रयोजनविचारः ॥

अत्र यूग्रहणं व्यर्थम् । न च खट्वामालादौ दोषः, 'हे खट्वे, हे माले' इत्यादौ नदीमात्रमुद्दिश्य विहितं संबुद्धिह्रस्वं बाधित्वा आबन्तरूपविशेषोद्देशेन विहितमेत्वं भवति । तथा 'आण्नद्याः' इति ङिति आडागमं बाधित्वा 'याडापः' इति भवतीति न कश्चिद्दोष इति यूग्रहणं व्यर्थमिति चेत्, न; खट्वाबन्धुर्मालाबन्धुरित्यत्र 'नदी बन्धुनि' इति पूर्वपदान्तोदात्तत्वं प्रसज्येत । इष्यते तु पूर्वपदप्रकृतिस्वरेण आद्युदात्तत्वम्, 'अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्' इति क्वनो नित्त्वेनाद्युदात्तत्वात् । बहुखट्व इत्यादौ 'नद्यृतः' इति नित्यं कप्स्यात् । इष्यते तु 'शेषाद्विभाषा' इति वैकल्पिकः । तस्मादाबन्तवारणार्थं यूग्रहणमिति ॥

ननु नायं दोषः, 'नद्यापो नुट्' 'नद्याम्नीभ्यः' इत्यादौ पृथगाब्ग्रहणात् आबन्तस्य नदीत्वाभावसिद्धेरिति यूग्रहणं व्यर्थमिति चेत्, न; आबन्तनिरासेऽपि मात्रे मातुः इत्यादौ नदीत्वे 'आण्नद्याः' इति स्यात् । न च मातृशब्दस्य प्रसूवाचित्वे नित्यस्त्रीत्वेऽपि परिच्छेत्तृवाचित्वे सर्वलिङ्गत्वान्न नदीत्वप्रसक्तिरिति वाच्यम्, यद्येक एवासौ प्रसूपरिच्छेत्त्रोर्वर्तते तदा प्रागुक्तं संगच्छेत; न ह्येकः । प्रसूवाची ह्यव्युत्पन्नो रूढः, परिच्छेत्तृवाची हि कर्तरि व्युत्पन्नः क्रियावाचीति

तयोर्भेदस्य स्पष्टतया प्रसूवाचिमातृशब्देऽतिव्याप्तेः । किंच स्वसृशब्दे अतिव्याप्तिरिति यूग्रहणमिति ॥

अत्रोच्यते– यदि ऋदन्तस्य नदीत्वं स्यात् 'नद्यृतश्च' इत्यत्र तत एव सिद्धे ऋद्ग्रहणं न कुर्यात् । अतस्तान्निवृत्त्यर्थं यूग्रहणं न कार्यमिति चेत्, न; नदीत्वाविषये पुंलिङ्गपित्रादिशब्दे ऋकारचारितार्थ्यात् । ततश्चास्य ज्ञापकत्वं नेति तद्व्यावृत्त्यर्थं यूग्रहणमिति ॥

ननु अविशेषेण विधावपि 'मातुरुत्—' 'स्वसुश्च' 'वाचो व्याहृतार्थायाम्' इति व्यतिरेकनिर्देशान्नदीत्वमृदन्तादिषु न भवति । 'कुमार्यां वयसि' 'जम्ब्वा वा' इत्यन्वयनिर्देशान्नित्यस्त्रीलिङ्गेकारान्तोकारान्तयोरेव भविष्यतीति कल्पयामः । अवश्यं चैवं विज्ञेयम् । क्रियमाणेऽपि हि यूग्रहणे किं दीर्घयोर्द्वन्द्वः उत ह्रस्वयोः? नाद्यः; 'दीर्घाज्जसि च' इति निषेधेन यू इति निर्देशानुपपत्तेः, 'ङिति ह्रस्वश्च' इत्यत्र ह्रस्वपदयूपदयोर्विशेषणविशेष्यभावानुपपत्तेश्च, तत्र यूपदाननुवृत्तौ 'मात्रे' इत्यादौ दोषापत्तेश्च । नान्त्यः; ह्रस्वयोर्ग्रहणे 'कुमार्यै' इत्यादावव्याप्तेः । न च 'अणुदित्सवर्णस्य—' इति निर्वाहः, तत्र 'अशब्दसंज्ञा' इत्यनुवृत्त्या शब्दसंज्ञायां सवर्णग्रहणाभावात् । तथा च 'ऊकालः—' इति सूत्रे मात्रिकेण द्विमात्रकत्रिमात्रकयोरग्रहणेन न तयोर्ह्रस्वसंज्ञेति भाष्ये प्रतिपादितम् । तथा मतिशब्दादावपि नदीत्वात् 'अम्बार्थ—' इति ह्रस्वः स्यात् । हे शकटे इत्यत्रापि प्रसज्येत । तस्माद्यूग्रहणं न कार्यमिति चेत्, न; ऋदन्तनित्यस्त्रीलिङ्गदुहित्रादिषु हलन्तोपानदादिषु च सौत्रनिर्देशाभावादतिव्याप्तिः गौर्यादीनामनिर्देशादव्याप्तिश्चेति विषयनिर्धारणार्थं यूग्रहणम् । तत्र च ह्रस्वयोरेव द्वन्द्व इति न निर्देशानुपपत्तिः; न वा विशेषणविशेष्यभावानुपपत्तिः । न चाव्याप्तिः पूर्वो-

क्तरीत्या, 'नेयङुवङ्—' इति निषेधेन शब्दसंज्ञायामपि सवर्णग्रहणज्ञापनात् ईकारोकारान्ते नदीत्वसिद्धेः । तथा हि— ह्रस्वेकारोकारान्तधातोर्विचि गुणः, क्विपि तुक्च नियत इति तयोरियङुवङ्स्थानत्वाभावात् तत्र निषेधोऽनर्थकः; किंतु दीर्घान्त इति वक्तव्यम् । उक्तरीत्या सवर्णाग्रहणे दीर्घान्ते नदीत्वस्यैवाप्राप्त्या व्यर्थ एव निषेधो भवेदिति । तथा अस्त्रीति निषेधोऽप्युक्तार्थे ज्ञापकः । नाप्यतिव्याप्तिः; 'हे शकटे, हे शकटि' इति रूपद्वयसिद्ध्यर्थं वैकल्पिकी नदीसंज्ञा एपितव्या; सा च दीर्घग्रहणपक्षे अप्राप्ता विधेया ह्रस्वपक्षे नित्यबाधनार्थेति न विशेषः । अतो यूग्रहणे न कश्चिद्दोष इति दुहित्रादावतिप्रसक्तिवारणाय यूग्रहणमावश्यकमेवेति ॥

अत्र ब्रूमः— यदि यूग्रहणं क्रियते तदा अव्याप्तिनिरासेऽप्यतिव्याप्तितादवस्थ्यम् । शकटिपदस्य संबुद्धौ रूपद्वयसिद्ध्यर्थं नदीसंज्ञाविकल्पो नारभ्यते । किंतु शकटिर्बह्वादिषु पठ्यते । तत्र दीर्घनिर्देशपक्षे ङीष्पक्षे नदीह्रस्वत्वे हे शकटीति, ङीषभावे तु गुणे 'हे शकटे' इति उभयमपि सिध्यति । ह्रस्वनिर्देशपक्षे तु ङीषि सत्यसति च नदीत्वात् हे शकटीत्येव प्राप्नोति । तथा ह्रस्वान्तस्य नदीत्वे सति शकटिबन्धुरित्यत्र 'नदी बन्धुनि' इति प्रसज्येत । इष्यते तु पूर्वपदप्रकृतिस्वरेण त्रयाणामचाम् 'शकटिशकट्योरक्षरमक्षरं पर्यायेण' इति वचनात् पर्यायेणोदात्तत्वम् । इह बहुशकटिरिति नित्यकप्प्रसज्येत । इष्यते च विभाषा । अतो यूग्रहणं शक्यमकर्तुमिति । नदीसंज्ञाव्यवस्थायां च सौत्रनिर्देशा एव शरणम् । तत्र निर्देशाः सामान्यतस्तत्तद्वर्णानां नदीत्वाभावगमका इति सर्वमनवद्यम् ॥

नन्वेवम् 'यू नदी' इत्येवालम्;

न च पुंनपुंसकलिङ्गानां ह्रस्वदीर्घान्तानां संज्ञा स्यादिति वाच्यम्, 'ह्रस्वनद्यापः—' इति सूत्रे नद्याः पृथक् ह्रस्वग्रहणात् 'ङेराम्—' इति सूत्रे नद्याः पृथक् नीग्रहणाच्च लिङ्गात्तेष्वनतिव्याप्तेः ॥

न च लिङ्गत्रयेऽपि ऋदन्तानामनदीत्वात् तेभ्यः परस्यामो नुडर्थं ह्रस्वग्रहणमिति वाच्यम्, 'न तिसृ—' इति निषेधात् सामान्यत ऋदन्तानामामो नुडनुमानेन तदर्थं ह्रस्वग्रहणस्याकर्तव्यत्वात् ॥

न च वृक्षाणामित्याद्यर्थमिति वाच्यम्, तथात्वे 'अन्नद्यापः' इति वक्तव्यत्वात्। तस्मात् स्त्र्याख्यग्रहणं व्यर्थमिति चेत्, न; स्त्र्याख्यग्रहणाभावेऽपि हर्यादिपदानां नदीत्वमेव न प्रसज्यते शेषग्रहणाकरणेन आकडारीयत्वेन नदीत्वबाधादिति तत्र नुडर्थं ह्रस्वग्रहणमित्येवावगन्तव्यम्। किंच वातप्रमीवर्षाभूप्रभृतीनां प्राप्नोति; तच्च 'ङेराम् ' इत्यत्र नीग्रहणात् दीर्घान्तपुंलिङ्गानां नदीत्वं न भवतीति वक्तव्यम्; तत्र च स्त्रीपुंलिङ्गसाधारणनीरूपस्यैव ग्रहणेन स्त्रीलिङ्गस्य ग्रहणे अस्त्रीलिङ्गानां नदीत्वं नास्तीति ज्ञापयितुमशक्यम्। वस्तुतस्तु नियां ब्राह्मणे नियां ब्राह्मण्याम् इत्युभयत्र 'नेयङ्—' इति निषेधात् तत्र आमर्थं नीग्रहणमप्यावश्यकमेव। यदि च 'अस्त्री' इति पर्युदासात् स्त्रीलिङ्गस्यैव निषेध इत्युच्यते तदा तदर्थमेव नीग्रहणमिति ज्ञापकत्वसंभव एव न। एवं च दीर्घान्तपुंलिङ्गानां नदीत्वव्यावृत्त्यर्थमिदमावश्यकमेवेति ॥

नन्वेवम् 'स्त्र्याख्यौ' इति कथम्? स्त्रियमाचक्षाते इति विग्रहे कर्मण्यणि 'आर्धधातुके' इत्यधिकृत्य विहिते चक्षिङः ख्याञि

आतो युकि स्त्यास्त्यायाविति हि भवितव्यम् ।

न च 'आतश्चोपसर्गे' इति के, आचक्षाते इति आख्यौ स्त्रियाः आख्याविति षष्ठीतत्पुरुषेण रूपसिद्धिरिति वाच्यम्, अनाकारान्तत्वात् चक्षिङः कप्रत्ययायोगात् ॥

न च ख्याञनन्तरम् आदन्तत्वात्स्यादिति वाच्यम्, आर्धधातुके परे ख्याविधानात् के परे ख्याञा भाव्यम्, ख्याञनन्तरं केन भाव्यम् इत्यन्योन्याश्रयात् ॥

यदि 'आर्धधातुके' इति विषयसप्तमीत्वमङ्गीकृत्य उक्तदोषं परिजिहीर्षसि, एवमपि कस्य अकर्मकधातुषु चारितार्थ्यात् अणः अनादन्तेषु चारितार्थ्यात् इह परः अणेव प्राप्नुयात् ॥

न च चक्षिङो विचि ख्याञि आख्या इति रूपम्, स्त्रिया आख्या स्त्याख्येत्यस्मात् द्विवचने सिद्धमिष्टमिति वाच्यम्, 'अवे यजः' 'विजुपे च्छन्दसि' इति यजो विज्विधानात् तस्येहाप्रसङ्गात् ॥

न च 'अन्येभ्योऽपि—' इति विजिति वाच्यम्, तत्र च्छन्दसीत्यनुवृत्तेः ॥

न च 'छन्दोवत्सूत्राणि—' इति भाष्यात् विच्सिद्धिरिति वाच्यम्, 'अयस्मयादीनि—' इति सूत्रस्थच्छन्दोग्रहणेन आतिदेशिकच्छन्दस्त्वविशिष्टानां ग्रहणस्य भाष्येष्टत्वेऽपि इह तथात्वे मानाभावात् । तस्मात् स्त्याख्याविति दुःसाधमिति चेत्, न; 'आतश्चोपसर्गे' इति कर्तरि कः प्रवर्तयितुं शक्यत एव, आर्धधातुके इत्यस्य विषयसप्तमीत्वाश्रयणेन प्रत्ययोत्पत्तेः प्रागेव ख्याञादेशाभ्युपगमात्

पदसंस्कारपक्षे कर्मविवक्षायाः प्रागेव कप्रत्ययोत्पत्तौ कर्मण्यणः प्रसक्त्य-भावात् । अथवा च्छान्दसत्वात् विचा रूपसिद्धिः; न ह्यातिदेशिक-च्छन्दस्त्वमयस्मयादिमात्रविषयकमिति राजाज्ञास्ति । अत एव 'आ-दैच्' इत्यत्र इतरेतरयोगपक्षे द्विवचनस्य 'सुपाम्—' इति सोः लुको वा उपपादनम्, अस्मिंश्च सूत्रे दीर्घद्वन्द्वपक्षे पूर्वसवर्णस्य लुको वा उपपादनं च संगच्छते । अथवा मूलविभुजादित्वात् के रूपं निर्बा-धम् । तेन 'यस्मिन्शतसहस्राणि पुत्रे जाते गवां ददुः । ब्राह्मणेभ्यः प्रियाख्येभ्यः सोऽयमुञ्छेन जीवति' इति श्लोके प्रियाख्यशब्दोऽपि साधित इति सर्वं सुस्थम् ॥

नन्वेवमपि 'यू स्त्र्यौ' इति वा अलम्; आख्याग्रहणं मास्तु; गौर्यादीनां स्त्रियां विद्यमानत्वात् तत्र ङीषः स्त्रियां विहितत्वात् लक्ष्मी-तन्त्र्यादीनां स्वभावतः स्त्रियां विद्यमानत्वात् । स्त्रियाविति पक्षेऽपि अ-वयवेकारोकारयोः समुदायगतस्त्रीत्वारोपादन्वयः सुवचः । 'वातप्रम्य' इत्यादौ स्त्रीलिङ्गत्वाभावादेव न नदीत्वम् । किंच यत्र स्त्रीलिङ्गानां कार्यम्, तत्र स्त्रीग्रहणमेव क्रियते न त्वाख्याग्रहणमिति सूत्रशैली । यथा— 'गोत्रस्त्रियोः—' 'पुमान्स्त्रिया' 'स्त्रीपुंवच्च' इत्यादिषु । तस्मात् आख्याग्रहणं व्यर्थमिति चेत्, न; नित्यस्त्रीलिङ्गपरिग्रहार्थ-माख्याग्रहणात् । तच्च स्त्रियमाचक्षाते इति विग्रहाल्लभ्यते । अन्यथा ब्राह्मणी ग्रामणीः, ब्राह्मणी खलपूरित्यादौ दोषः स्यात् ॥

अथ किं नाम नित्यस्त्रीत्वम्, लिङ्गान्तरानभिधायकत्वम्, उत पदान्तरं विना स्त्रियां वर्तमानत्वम्? नाद्यः, 'आध्यै प्रध्यै' इति भाष्यो-क्त्यसंगत्यापातात् । आध्यानप्रध्यानकर्तृवाचिनोराधीप्रधीशब्दयोर्लिङ्ग-

ग्रयसाधारणत्वात् । न द्वितीयः, ग्रमणीर्ब्राह्मणीत्यादेरपि नदीत्वप्रसङ्गादिति चेत्, न; द्वितीयपक्ष एवाङ्गीक्रियते, ग्रामनयनादेरुत्सर्गतः पुंधर्मतया स्त्रीलिङ्गसंनिधान एव स्त्रीत्वप्रतीतेर्नित्यस्त्रीत्वाभावादिति सर्वं समञ्जसम् ॥

॥ श्रीः ॥

श्रीस्तनस्तबकन्यस्तकस्तूर्यध्यस्तकौस्तुभम् ।
निस्तुलोरःस्थलं बिभ्रद्वस्तु स्वस्तिकृदस्तु नः ॥१॥

णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने ॥

इह खल्वनेन सूत्रेण अण्यन्तकर्मातिरिक्तकर्मरहिताण्यन्तकर्मकर्तृकानाध्यानार्थकण्यन्ताव्यवहितोत्तरवृत्ति लत्वमुद्देश्यतावच्छेदकीकृत्य आत्मनेपदं विधीयत इति सैद्धान्तिकी पद्धतिः ॥

तथा हि—“प्रत्ययग्रहण”परिभाषया णेरित्यनेन ण्यन्तादिति लब्धम् आत्मनेपदाक्षिप्तलकारेण संबध्यते । ‘तस्मात्—’ इत्यनुशासनाच्च अव्यवहितोच्चारणविषयत्वं पञ्चमीबलाल्लभ्यते । ततश्च ण्यन्ताव्यवहितोत्तरवृत्ति लकारत्वमुद्देश्यतावच्छेदकं पर्यवसितम्; तन्मात्रस्य तथात्वे अतिप्रसङ्ग इति तद्भङ्गाय ‘अणौ यत्कर्म णौ चेत्’ इति ‘स कर्ता’ इति भागाभ्याम् अण्यन्तकर्मातिरिक्तकर्मराहित्यम्, अण्यन्तकर्मकर्तृकत्वं च उद्देश्यतावच्छेदककोटौ निवेश्यते । तथा च अणौ यत्कर्म, णौ चेत्तदेव कर्मेति योजनात् अण्यन्तकर्मातिरिक्तकर्मराहित्यलाभः । द्वितीयवाक्ये च ‘स’ इत्यनेन अण्यन्तकर्म परामृश्य,

णां तस्य कर्तृत्वं विधीयते । न चैवं पुंलिङ्गनिर्देशानुपपत्तिः, नपुंसककर्मपदोपात्तस्य परामर्शनीयतया तल्लिङ्गावश्यंभावादिति वाच्यम्; कर्तेति विधेयबोधकपदस्य पुंलिङ्गतया तदनुरोधेन पुंलिङ्गतोपपत्तेः, सर्वनाम्नामुद्देश्यलिङ्गग्राहिताया इव विधेयलिङ्गग्राहिताया अपि 'शैत्यं हि यत्सा प्रकृतिर्जलस्य' 'तप्ते पयसि दध्यानयति, सा वैश्वदेव्यामिक्षा' इत्यादौ लोकवेदयोर्बहुशो दर्शनात्, पस्पशायाम् 'किं यत्तत्सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं स शब्दः' इति भाष्येऽपि दर्शनात् । उक्तं हि कैयटेन— 'उद्दिश्यमानप्रतिनिर्दिश्यमानयोरैक्यमापादयन्ति सर्वनामानि पर्यायेण तत्तल्लिङ्गमुपाददते' इति ॥

उदाहरणं तु—आरोहन्ति हस्तिनं हस्तिपकाः; आरोहयते हस्ती स्वयमेव । पश्यन्ति हरिं भक्ताः; दर्शयते हरिः स्वयमेव । अत्र आरोहन्ति हस्तिनं हस्तिपकाः, पश्यन्ति हरिं भक्ता इत्यण्यन्तावस्थायां कर्मणोर्हरिहस्तिनोर्ण्यन्तावस्थायां कर्तृत्वात् तदतिरिक्तकर्मरहितत्वाच्च सूत्रप्रवृत्तिः ॥

अत्र च अण्यन्तकर्मातिरिक्तकर्मरहितत्वदलानुपादाने, आरोहन्ति हस्तिनं मनुष्याः, आरोहयति हस्ती स्थलं मनुष्यानित्यत्रातिप्रसङ्गः स्यात्; अतस्तदुपादानम् । अत्र च अण्यन्तकर्मीभूतहस्त्यतिरिक्तस्थलरूपकर्मसद्भावादतिप्रसङ्गभङ्गः । अण्यन्तकर्मकर्तृकत्वदलाच्च निवृत्तप्रेषणपक्षतृतीयकक्ष्यायां नातिप्रसङ्गः; तथा हि— तत्र आरोहन्ति हस्तिनं हस्तिपका इति प्रथमा कक्ष्या; न्यग्भावयन्तीत्यर्थः; बहुहस्तिपककर्तृका हस्तिनिष्ठन्यग्भवनानुकूला न्यग्भावनक्रियेति बोधः । एवमग्रेऽपि यथायथं बोध्यम् । ततः सौकर्यातिशयेन न्यग्भावनरूपप्रेषणांशाविवक्षायाम् आरोहति हस्तीति द्वितीया कक्ष्या; न्यग्भवतीत्य-

र्थः । ततः पुनः प्रेरणांशविवक्षायां प्रयोजकव्यापारे णिचि कृते आरोहयन्ति हस्तिनं हस्तिपका इति तृतीयकक्ष्यायाः प्रथमकक्ष्यावदर्थः, 'निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजुच्यते' इत्युक्तेः । तत्र च अण्यन्तकर्मातिरिक्तकर्मरहितत्वसत्त्वात्सूत्रप्राप्तौ सत्याम् अण्यन्तकर्मणो हस्तिनः कर्तृत्वाभावात् व्यावृत्तिः । 'अनाध्याने' इत्युक्तेः स्मरति वनगुल्मं कोकिलः, स्मरयति वनगुल्मः स्वयमेवेत्यत्र नैतत्सूत्रेणात्मनेपदमिति ॥

नन्वत्र सूत्रे 'अणौ यत्कर्म णौ चेत्स कर्ता' इत्यत्र एकवाक्यतामुररीकृत्य अण्यन्तकर्मकर्तृकत्वमात्रमुद्देश्यतावच्छेदककोटौ निविशत इत्येव युक्तम्, न तु अण्यन्तकर्मातिरिक्तकर्मरहितत्वमपि तत्र निविशत इति; तथा सत्युक्तोदाहरणस्थल एव आरोहयते हस्ती हस्तिपकान्, दर्शयते हरिर्भक्तानित्यत्र कर्मप्रयोगे हस्तिपकादिकर्मसत्त्वेन तद्बलाभावेन आत्मनेपदानुपपत्तिप्रसङ्गात्;

न चात्र कर्मपदप्रयोगे आत्मनेपदमनेन सूत्रेण नेष्यत एव; अन्यथा तत्सिद्ध्यर्थमेतद्बलानुपादाने हस्ती स्थलमारोहयति मनुष्यानित्यत्र अतिप्रसङ्गभङ्गस्य अशक्यत्वात्, 'यद्धितुपरं छन्दसि' इति सूत्रे भाष्यकृतैवोक्तस्थले परस्मैपदस्वीकारेण तत्रात्मनेपदादेरिष्टापत्त्या परिहारासंभवात् । अत एव 'करेणुरारोहयते निषादिनम्' 'स संततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बन्धुताम्' इत्यादिमहाकविप्रयोगा अपि कर्मघटिततया एतत्सूत्राविषया इत्यभिप्रेत्य 'णिचश्च' इति कर्त्रभिप्रायतायामात्मनेपदमिति भट्टोजिदीक्षितप्रभृतिभिरन्यथैव साधिता इति वाच्यम्, इह सूत्रे पश्यन्ति भृत्या राजानं, दर्शयते भृत्यान् राजेति सकर्मकोदाहरणस्य भाष्ये प्रदर्शनात् 'हृक्रोरन्य-

तरस्याम्' इति सूत्रे 'अभिवादि—' इति वार्तिकव्याख्यानावसरे दर्शयते भृत्यान् राजेत्यत्र 'णेरणौ—' इत्यात्मनेपदमिति कण्ठतोऽभिधानाच्च सकर्मकाणामेतत्सूत्रविषयताया निर्विवादत्वादिति चेत्, न; यथा हि देवदत्तस्य गुरुराहित्यदशायां यः पुत्रः स एव गुरुप्राप्तावित्युक्ते गुरुप्राप्तिप्राक्कालिकदेवदत्तपुत्रातिरिक्तस्य पुत्रस्य निषेधः प्रतीयमानो देवदत्तसंबन्धिन एव प्रतीयते; न गुरुपुत्रस्य, देवदत्तस्योपदेशानन्तरं गुरोः पुत्रजननसद्भावेऽपि तथा व्यवहारात्; एवमण्यन्तावस्थायां यत्कर्म ण्यन्तावस्थायां तदेव कर्म चेदित्युक्तेऽपि अण्यन्तकर्मातिरिक्तस्य कर्मणो णिच्प्रकृतिसंबन्धिन एव ण्यन्तावस्थायां निषेधः प्रतीयत इति अण्यन्तकर्मातिरिक्तकर्मरहितप्रकृतिकत्वं तद्दलार्थः पर्यवस्यति। तथा च आरोहयते हस्ती हस्तिपकानित्यत्र, दर्शयते हरिर्भक्तानित्यत्र च हस्तिपकानां भक्तानां च कर्मत्वं न णिच्प्रकृतिनिरूपितम्, किंतु णिजन्तार्थनिरूपितमेवेति अण्यन्तकर्मातिरिक्तकर्मरहितप्रकृतिकत्वं तत्रास्त्येवेति नोक्तोदाहरणानुपपत्तिप्रसङ्गः। हस्ती स्थलमारोहयति मनुष्यानित्यत्र च अण्यन्तावस्थाकर्मीभूतहस्त्यतिरिक्तस्य प्रकृत्यर्थनिरूपितकर्मणः स्थलस्य सद्भावादुक्तविशेषणेन तन्निरासः॥

ननु आरोहन्ति हस्तिनं मनुष्या इत्यण्यन्तावस्थायामनन्वितस्य स्थलस्य कथं कर्मतया ण्यन्तावस्थायां प्रयोगः संभवति? कर्मसंज्ञाविधायकसूत्राप्रसरात्। तथा हि— न तावत्तस्य 'कर्तुरीप्सिततमं कर्म' इति कर्मसंज्ञा, प्रयोज्यस्य कर्तुरीप्सिततमत्वेन तदुपपादने तस्याण्यन्तकर्तृतापत्तेः, तादृशेप्सिततमस्य हस्तिनः पूर्वं विवक्षिततया अनन्तरितन्यग्भवनाश्रये तद्विवक्षानुपपत्तेश्च, अन्तरितानन्तरितयोरधिकरणयोः प्रासादे खट्वायां शेत इत्यादिरीत्या युगपद्विवक्षायाः साधुत्वेऽपि अन्त-

णेरणौ यत् कर्म णौ ७१ चेत् स कर्ताऽनाध्याने

रितानन्तरितकर्मणोर्विवक्षायाः जलं कुम्भं वहति हस्तिनं स्थलमारोहन्तीत्यादिप्रयोगापत्त्या असाधुत्वात्; प्रयोजकस्य कर्तुरीप्सिततमत्वेन तदुपपादने तु प्रकृतेरण्यन्तकर्मातिरिक्तकर्मराहित्यतया अतिप्रसङ्गापरिहारापत्तेः, तादृशेप्सिततमत्वस्य प्रयोज्यकर्तृमात्रवृत्तितया तद्भिन्ने स्थले तदनुपपत्तेश्च। नापि 'तथायुक्तं चानीप्सितम्' इत्यनेन, न्यग्भवनरूपक्रियाफलयुक्तत्वेन हस्तिनो विवक्षिततया स्थलस्यानन्तरितस्य तथा विवक्षायाः पूर्ववदसंभवात्, न्यग्भावनमादाय तदुपपादने प्रकृतेः कर्मत्वानुपपत्तेः पूर्ववदापत्तेः। नापि 'अकथितं च' इत्यनेन सा, 'दुहियाचिरुधिप्रच्छि——' इति परिगणनात्, रुहेरद्विकर्मकत्वात्। नापि 'गतिबुद्धि——' इत्यनेन सा, स्थलस्याण्यन्तकर्तृत्वाभावात्। अन्येषां तु कर्मत्वविधायकानां प्रसङ्ग एव नास्ति। अतः कथं स्थलस्य ण्यन्ते कर्मत्वमिति चेत्, उच्यते—— 'कर्तुरीप्सिततमं कर्म' इति प्रयोज्यकर्तारमादायैव स्थलस्य कर्मसंज्ञा। सा च यद्यप्यन्तरितानन्तरितयोर्यौगपद्येनासाधुः, तथापि अन्यतरस्य कारकान्तरयोगित्वेन विवक्षायां साधुत्वमेव; यथा—— कुम्भेन जलं वहति, हस्तिना स्थलमारोहतीति। अत एवाण्यन्तावस्थायां स्थलस्य न प्रयोगः कर्मतया। तथा च प्रकृते अण्यन्तावस्थायां हस्तिनः कर्मत्वस्य विवक्षिततया स्थलस्य कर्मत्वविवक्षाया असंभवेऽपि ततो हस्तिनः प्रयोजकत्वविवक्षायां तस्य कर्तृत्वरूपकारकान्तरयोगात् ण्यन्तावस्थायां स्थलस्य कर्मत्वं घटत इत्यण्यन्तावस्थाकर्मीभूतहस्त्यतिरिक्तकर्मणः स्थलस्य सद्भावादतिप्रसङ्ग इति॥

श्रीनिवासार्यवर्याणां गुरूणां मतमास्थितः।
सूत्रमातर्थ्यं भाष्यमेतद्रीत्या निरूपये॥ २॥

नन्विह यथाश्रुतरीत्या अण्यन्तकर्मकर्तृकण्यन्तोत्तरवृत्तिलकारस्यात्मनेपदं स्यादित्यर्थः प्रतीयते। तथा च आरोहयमाणो हस्ती स्थलमारोहयति मनुष्यानित्यत्र अतिप्रसङ्गः, तत्र 'आरोहन्ति हस्तिनं हस्तिपकाः' इत्यादिक्रमेण आरोहयमाण इत्यत्र अण्यन्तकर्मकर्तृकत्वसत्त्वात् शानच्रूपात्मनेपदस्य यथा प्रवृत्तिः, तथा 'आरोहन्ति हस्तिनं मनुष्याः' इत्यण्यन्तकक्ष्यायां कर्मणो 'हस्तिनः स्थलमारोहयति मनुष्यान्' इत्यत्र कर्तृतया अण्यन्तकर्मकर्तृकत्वादात्मनेपदप्रवृत्तेर्दुर्वारत्वात्; अतः अण्यन्ते यत्कर्म तदेव ण्यन्तेऽपि कर्म भवति तदात्मनेपदं भवतीति वक्तव्यमितिपरं वार्तिकमुपोद्धृत्य व्याख्यातं भाष्यकृता—'णेरात्मनेपदविधाने अण्यन्तस्य कर्मणस्तत्रोपलब्धिः—णेरात्मनेपदविधाने अण्यन्तस्य यत्कर्म यदा ण्यन्तेऽपि तदेव कर्म भवति तदात्मनेपदं भवतीति वक्तव्यम्। इतरथा हि सर्वप्रसङ्गः—इतरथा सर्वत्र प्रसङ्गः स्यात्। इहापि प्रसज्येत— आरोहन्ति हस्तिनं हस्तिपकाः आरोहयमाणो हस्ती स्थलमारोहयति मनुष्यान्' इति ॥

अत्र वार्तिके अप्रयुक्तमेवकारं प्रयुञ्जानस्य भाष्यकृतोऽयमाशयः—नात्र वार्तिके अण्यन्तकर्मणो णौ कर्मत्वं प्रतिपिपादयिषितम्, सूत्रेण अण्यन्तकर्मणो ण्यन्तकर्तृत्वप्रतिपादनात्। न ह्येकस्य युगपदेकक्रियानिमित्तकं कर्मत्वं कर्तृत्वं च संभवति, 'आ कडारादेका संज्ञा' इति नियमेन तयोरसमावेशात् व्यापारव्यधिकरणफलाश्रयत्वरूपव्यापाराश्रयत्वरूपयोस्तयोः स्वरूपतोऽप्यसामानाधिकरण्यात्। अतोऽन्यकर्मनिवृत्तिरेव विवक्षितेति एवकाराध्याहारेण वार्तिकं योजनीयमिति। इत्थं वार्तिकमवतीर्य तमर्थं सूत्राक्षरैरेव समर्थयमानो भाष्यकारो वार्तिकं प्रत्याचष्टे— 'तत्तर्हि वक्तव्यम्। न वक्तव्यम्। एवं

णेरणौ यत्कर्म णौ चेत् ०३ स कर्ताऽनाध्याने

वक्ष्यामि— णेरात्मनेपदं भवति, ततः अणौ यत्कर्म णौ चेत्— अणौ अण्यन्ते यत्कर्म णौ चेत् णौ यदि तदेव कर्म भवति । ततः स कर्ता— कर्ता चेत् स भवति णाविति' इति । अयमाशयः— यदि ह्येकवाक्यतयान्वयः सूत्रकृता सममंस्यत, तर्हि 'णेरणौ कर्म णौ चेत्कर्ता' इत्येवं वक्तुं शक्यतया यत्सग्रहणं न निरदेक्ष्यत । अतो वाक्यभेदेनान्वयः सूत्रकृता विवक्षित इति तथैव सूत्रार्थो वर्णनीय इति न वार्तिकमारब्धव्यमिति ॥

अण्यन्तान्वितकर्मभेदविलसत्कर्मव्यपच्छित्तये
व्याख्येयं त्विह वाक्यभेदवदणौ यत्कर्मणौ चेदिति ।
नो चेत्स्यादणिकर्मकर्तृकतया सिद्धेऽन्यकर्मान्विते
हस्त्यारोहयति स्थलं नरवरानित्यत्र सूत्रस्थितिः ॥३॥

ननु यदि वाक्यभेदमाश्रित्य अण्यन्तकर्मातिरिक्तकर्मरहिताण्यन्तकर्मकर्तृकानाध्यानार्थकण्यन्तोत्तरवृत्तिलकारस्यात्मनेपदं भवतीत्यर्थः क्रियते, तदा एतत्सूत्रोदाहरणानां 'लावयते केदार' इत्यादीनां 'कर्मवत्सूत्रेणैवात्मनेपदसिद्ध्या गतार्थत्वम्; तथा हि— द्विधाभवनानुकूलव्यापारार्थकलुनातेः 'लुनाति केदारं देवदत्त' इति प्रथमा कक्ष्या । यदा केदारस्यातिमृदुत्वात् अनायासेन द्विधासंपत्तिरूपसौकर्यातिशयात् कर्तृव्यापारस्येष्टत्वाददविवक्षायां द्विधाभवनरूपफलांशमात्रे लुनातिर्वर्तते, तदा 'लूयते केदार' इति द्वितीया कक्ष्या । ततः स्वत एव द्विधाभवने प्रवृत्तं केदारं दृष्ट्वा तत्क्षेमाय कर्तॄणां प्रवृत्तिरित्यर्थं प्रत्याययितुं कर्तृव्यापारविवक्षायां प्रथमकक्ष्यातुल्यार्थः 'लावयति केदारं देवदत्त' इति तृतीयकक्ष्या । ततः स्वतः प्रवृत्तः स्वक्षेमायापि न कर्तृव्यापारमपेक्षत इति

विवक्षायां लावयते केदार इति चतुर्थकक्ष्या। तत्र यथा द्वितीयकक्ष्या-याम् 'कर्मवत्—' इत्यनेन आत्मनेपदम्, तथा चतुर्थकक्ष्यायामपि तृतीयकक्ष्यामादाय कर्मस्थक्रियया तुल्यक्रियत्वात् आत्मनेपदं सिध्यति। एवं पचति तण्डुलं देवदत्तः; पच्यते तण्डुलः; पाचयति तण्डुलम्; पाचयते तण्डुल इत्याद्यूह्यम्। तथा च "कर्मवत्सूत्रेणैव सिद्धौ एतत्सूत्रं व्यर्थमित्याशङ्कितं वार्तिककृता; तथा भाष्यकृता 'यद्येवं, कर्मकर्तायं भवति। तत्र कर्मकर्तृत्वात्सिद्धम्' इति। इदं त्विह चिन्तनीयम्—लुनाति केदारं देवदत्तः; लूयते केदारः स्वयमेवेत्यादिरीत्या समनन्त-रोक्तचतुष्कक्ष्याकपक्षवदन्योऽपि पक्षः प्राचीनैरुपक्षिप्तः; स एवाध्यारो-पितप्रेषणपक्ष इति व्यवह्रियते। तथा हि— लुनाति केदारं देवदत्त इति प्रथमकक्ष्या प्राग्वत्। ततः स्वलवने प्रवृत्तं देवदत्तं प्रति स्वदुर्लवने केदारस्य प्रयोजकत्वविवक्षायां णिजुत्पत्तौ लावयते केदारो देवदत्तेनेति द्वितीयकक्ष्या। ततो लवितुः प्रगल्भेन व्यापारेण दुर्लवनतां विहाय स्वन एव द्विधाभवनाश्रयो भवतीति विच्छित्तिविशेषविवक्षायां दुर्लवन-त्वोपमर्दपूर्वकसल्लवनत्वापत्तिरूपसौकर्यातिशयेन लवितुर्व्यापाराविवक्षायां स्वनिष्ठतत्प्रयोजकत्वस्यापि हानात् लावयते केदार इति तृतीयकक्ष्या। तत्र चाण्यन्तकर्मीभूतकेदारकर्तृकत्वात् तदतिरिक्तकर्माभावाच्च एतत्सूत्र-प्रवृत्तिरित्यविवादम्। तत्र च न कर्मवत्सूत्रेणात्मनेपदं सिध्यति, समान-धातौ कर्मस्थया क्रियया तुल्यक्रियस्य कर्तुः कर्मवद्भावविधानात्। न चात्र तत्संभवति; लवनादिमादाय तुल्यक्रियत्वसत्त्वेऽपि ण्यन्ताण्यन्त-त्वेन धातुभेदात्, लावयतौ केदारस्य कर्तृत्वेन तन्निष्ठक्रियायाः कर्म-स्थत्वाभावात् लावयतिना सहापि तदसंभवात्। अतः कर्मवद्भावाविषये [illegible] सूत्रस्यावश्यकतया कथं 'कर्मकर्तृत्वात्सिद्धम्' इत्युक्तम्? किंच

दर्शयते भृत्यान् राजेति वक्ष्यमाणरीत्या अण्यन्तकर्मातिरिक्तकर्मराहित्य-प्रकृतिकत्वमेव प्रथमदलार्थ इति वार्त्तिकभाष्याद्यभिप्रेतमित्यावश्यकम् । तत्र तृतीयकक्ष्यापक्षघटकद्वितीयकक्ष्यायां सूत्रप्रवृत्त्यवश्यंभावेन तत्र कर्मवत्त्वशङ्काया अप्यसंभवात् तदर्थतया सूत्रस्यावश्यकत्वेन कथं वैयर्थ्यमाशङ्कितम् ? ॥

अत्रेदं तत्त्वम्— नात्र एतत्सूत्रोदाहरणत्वावच्छेदेन कर्मवद्भावविषयता भाष्यवार्त्तिकयोः संमन्यते, येनेत्थमाशङ्क्यत; किं तर्हि एतत्सूत्रोदाहरणत्वसामानाधिकरण्येन कर्मवत्सूत्रविषयतामालम्ब्य वाद्-प्रणालिकया कर्तृस्थभावक्रियार्थमेतत्सूत्रमिति प्रतिपादयितुं भाष्यवार्त्तिकयोः प्रवृत्तिरिति । उक्तं चेदं कैयटेन अध्यारोपितपक्षं प्रकृत्य— 'द्वितीया तु प्रक्रिया सूत्रे एतस्मिन्नारब्धे सति संभवतीति प्रदर्शिता; न तु तस्यां कर्मवद्भावः, लावयतौ केदारस्य कर्मत्वाभावात् कर्मणा समानधातौ तुल्यक्रियत्वाभावात्' इति । एवं वदन् अध्यारोपितप्रेषणद्वितीयतृतीयकक्ष्ययोः सिद्धान्ते उदाहरणत्वम्, 'कर्मकर्तृत्वात्सिद्धम्' इत्यस्य यत्किंचिदुदाहरणान्यथासिद्धिमात्रेण प्रवृत्तिं च स्पष्टयांचकार । यत्तु—"अध्यारोपितप्रेषणपक्षेऽपि कर्मवद्भावः संभवत्येव, निवृत्तप्रेषणतृतीयकक्ष्यायां केदारस्य कर्मत्वात् कर्मस्थक्रियया तुल्यक्रियत्वादिति" नागोजिभट्टैरुक्तम्, तच्चिन्त्यम्; समानधातौ कर्मणा तुल्यक्रियः कर्ता हि कर्मवद्भवति; न च तदत्र संभवति, निवृत्तप्रेषणतृतीयकक्ष्याया अध्यारोपितप्रेषणपक्षघटकलावयतिसमानधातुत्वाभावात् । न च निवृत्तप्रेषणचतुर्थकक्ष्याया अध्यारोपितप्रेषणपक्षतृतीयकक्ष्यायाश्च सारूप्यात्समानधातुत्वाध्यवसायात् समानधातुभूततत्पक्षघटकद्वितीयकक्ष्याया एतत्समानधातुत्वं सुलभम्, तदभिन्नाभिन्नस्य तदभिन्नत्वनियमादिति वाच्यम्,

रूपसादृश्यमात्रस्य शब्दैक्याध्यवसायहेतुत्वे श्वयतेर्लुङ्मध्यमैकवचनान्तस्य स्वन्ताश्वपदस्य च रूपैक्यादभेदाध्यवसायापत्तौ सुन्दरोऽश्वो धावतीत्यादौ 'तिङतिङः' इति निघातापत्त्या अर्थैक्यविशिष्टसारूप्यस्यैव अभेदाध्यवसायप्रयोजकत्वावश्यंभावेन प्रकृते निवृत्तप्रेषणचतुर्थकक्ष्यायां स्वक्षेमार्थमपि कर्तृव्यापारानपेक्षद्विधाभवनादिप्रतीतिः अध्यारोपिततृतीयकक्ष्यायां तदप्रतीतेरैक्याध्यवसायानुपपत्तेरिति । उक्तं च— 'निवृत्तप्रेषणाद्धातोः
१ प्राकृतेऽर्थे णिजुच्यते । फलक्षेमाय सौकर्यात्प्रेषणांशाविवक्षणात्' इत्यादिना । किंच लावयते केदारो देवदत्तेनेति द्विधाभवनानुकूलव्यापारानुकूलव्यापारार्थकस्य लावयतेर्लक्षणया केवलद्विधाभवनविवक्षायामियं कक्ष्या; द्विधाभवनानुकूलव्यापारार्थकस्य लावयतेः द्विधाभवनलक्षणायां निवृत्तप्रेषणपक्षचतुर्थकक्ष्येति लक्ष्यकभेदात् भेदे जाग्रति अभेदाध्यवसानमप्रामाणिकमिति दिक् ॥

नन्वस्तु "कर्मवत्" सूत्रेण आत्मनेपदप्राप्तिः; तथापि नास्य सूत्रस्य वैयर्थ्यम्, आत्मनेपदस्येव यक्चिणोरपि प्राप्त्या तन्निवृत्त्यै अण्यन्तकर्मातिरिक्तकर्मरहिताण्यन्तकर्मकर्तृकण्यन्तादात्मनेपदमेव, न तु यक्चिणावपीति नियमार्थतया सार्थक्यसंभवादित्याशङ्कां परिहरत् वार्तिकमवतार्य व्याख्यातं भाष्ये— 'तत्र कर्मकर्तृत्वात्सिद्धमिति चेत्-यक्चिणोर्निवृत्त्यर्थं वचनम्— कर्मकर्तृत्वात्सिद्धमिति चेत् यक्चिणोर्निवृत्त्यर्थमिदं वक्तव्यम्, कर्मापदिष्टौ यक्चिणौ मा भूतामिति । न वा यक्चिणोः प्रतिषेधात्— न वा एष दोषः । किं कारणम्? यक्चिणोः प्रतिषेधात्— प्रतिषिध्येते अत्र यक्चिणौ— यक्चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूञामुपसंख्यानमिति' इति । अयं भावः— णिच्प्रत्ययस्तावत् द्विविधः— स्वार्थः, प्रयोजकव्यापारार्थकश्चेति । तत्र

णेरणौ यत् कर्म णौ चेत्७७ स कर्ताऽनाध्याने

स्वार्थणिचि अण्यन्तप्रयोग एव नास्तीति नैतत्सूत्रेण नियमः संभवति; प्रयोजकणिचि तु यद्यप्येतत्सूत्रेण नियन्तुं शक्यते, तथापि तत्र स्वतन्त्रनिषेधसत्त्वान्नैतस्य नियमस्य सार्थक्यमिति ॥

नन्वस्तु हेतुमण्णिज्विषये स्वतन्त्रनिषेधसत्त्वेन नियमस्य फलाभावः; तथापि पुच्छशब्दात् 'पुच्छभाण्ड—' इति णिङि उत्पुच्छयते पुच्छं श्वेति प्रयोगः, पुच्छं भ्रामयतीत्यर्थः। ततो व्यापारांशत्यागे उत्पुच्छयते पुच्छं स्वयमेव। भूतार्थविवक्षायाम् उदपुपुच्छत पुच्छं स्वयमेवेति प्रयोगः। तत्र यक्चिणोर्व्यावृत्त्यर्थं नियमः सार्थकः; अन्यथा तत्र कर्मवद्भावेन यक्चिणोरापत्तेः। अथ नियमेन यक्चिणोरिव चिण्वदिटोऽपि व्यावृत्तिः स्यात्, निरुक्तविशेषणविशिष्टण्यन्तादात्मनेपदमेव नान्यदिति वर्णनात्। अतो णिसामान्ये यक्चिणमात्रस्य स्वतन्त्रनिषेध एव वक्तव्यः; किं नियमेनेष्टसाधनेन? न च चिण्वदिटि शुद्धे लाविष्यते लविष्यत इत्यादिरूपवैलक्षण्यस्य चिण्वदिट्तदभावाभ्यां संपत्त्या चिण्वदिटः प्रयोजनसद्भावेऽपि णिजन्ताण्णित्वनिमित्तकवृद्धिमत्प्रकृतिकात् चिण्वदिटि केवले इटि वा वैलक्षण्याभावेन प्रयोजनविरह इति वाच्यम्, णिजन्तादपि चिण्वदिटि तस्याभीयत्वेनासिद्धत्वात् 'णेरनिटि' इति णिलोपः, केवले इटि तु तदभाव इति वैलक्षण्यस्यावश्यकत्वादिति चेत्, सत्यम्; नात्र चिण्वदिटो व्यावृत्तिः क्रियते, नियमस्य सजातीयविषयत्वावश्यंभावेन प्रत्ययत्वेन आत्मनेपदसजातीययक्चिणोरेव व्यावर्तनसंभवात्। अतो नियमार्थता सूत्रस्यावश्यिकीत्युच्यते भाष्ये— 'यस्तर्ह्यहेतुमण्णिच्, तदर्थमिदं वक्तव्यम्। तस्य कर्मोपदिष्टौ यक्चिणौ मा भूतामिति— उत्पुच्छयते पुच्छं श्वा उदपुपुच्छत पुच्छं स्वयमेव' इति ॥

ननु उत्पुच्छयत इत्यादौ कथं नियमेन यक्चिणोर्निवृत्तिराशङ्किता? यतोऽत्राण्यन्ते पुच्छशब्दस्य द्रव्यवाचकतया अक्रियावचनत्वेन अण्यन्तकर्मकर्तृकत्वासंभवेन एतत्सूत्रस्यैवाप्रवृत्तेरिरिति चेत्; अत्र वदन्ति— 'अस्मिन्विषये पुच्छशब्दः पुच्छकर्मिकायामुदसनक्रियायां वर्तते; तस्मात्स्वार्थे णिङ्। ततो यदा भ्राम्यमाणं पुच्छं संस्कारवशात् चक्रमिव भ्रमणक्रियायां भूतायां स्वातन्त्र्येण विवक्ष्यते, तदा उदपुपुच्छतेत्यात्मनेपदमेव णिङन्तात् यथा स्यादित्येवमर्थं सूत्रं संपद्यते' इति केचित्। केचित्तु— णिङन्ताण्णिच्येतदुदाहरणम्। न चैवमपि णिच्छून्यावस्थावैघट्यमेवेति भ्रमितव्यम्, णिङो ङित्त्वेन नित्यात्मनेपदप्रयोजकतया अणौ णेरिति णिच्त्वावच्छिन्नस्यैव ग्रहणस्य सिद्धतया णिङन्तप्रयोगस्यैवाण्यन्तावस्थात्वामित्याहुः, तन्न; णिङन्तात्प्रयोजकणिच एव वक्तव्यतया 'यस्तर्ह्यहेतुमण्णिच्' इति भाष्यासंगतेरिति नागोजिपण्डिताः॥

वस्तुतस्तु णिङन्ताण्णिच्येतदुदाहरणमिति वदतामयमाशयः— 'बहुलमेतन्निदर्शनम्' इति णिङन्ताच्चौरादिके णिचि उदाहरणमिति वक्तव्यम्; अन्यथा णिङन्ते अण्यन्तकर्मकर्तृकत्वस्योपपादनासंभवात्। णिङुपसंदान एव हि पुच्छपदं क्रियापरम्, न केवलम्, क्रियापरतया केवलपुच्छपदाप्रयोगात्। न च तदप्रयोगेऽपि, शास्त्रदृष्ट्या कमेवानण्यन्तोऽस्तीत्यभिप्रायेणोदाहरणत्वसंभव इति नागोजिपण्डितसमर्थना समुचिता, गणयत्यादावपि शास्त्रदृष्ट्या कर्मवदण्यन्तप्रयोगसंभवेन 'इतरथा हि यत्र नियमस्ततोऽन्यत्र प्रतिषेधः— अक्रियमाणे ह्येतस्मिन् यत्र नियमस्ततोऽन्यत्र तेन यक्चिणोः प्रतिषेधो वक्तव्यः स्यात्' इत्युत्तरभाष्यस्यानन्वयप्रसङ्गात् शास्त्रदृष्ट्या गणयतेरपि नि-

यमविषयत्वोपपादनसंभवात् । समनन्तरमेवैतद्व्यक्तीभविष्यति । किंच 'यस्तर्ह्यहेतुमण्णिच्' इति भाष्यस्वरसेनापि णिङन्ताण्णिचि स्वार्थे इदमुदाहरणमिति प्रतीयते; 'परिव्राजकोऽन्तर्भोक्ष्यते, अपरिव्राजकः क्व भोजयितव्यः' इत्यादौ परिव्राजकभिन्नस्य तत्सजातीयस्य ब्राह्मणस्यैव प्रत्ययवत्- अहेतुमण्णिजित्युक्ते पूर्वोक्तसदृशस्य णिच एव ग्रहणं प्रतीयत इत्यस्य युक्तत्वात्; भिन्नार्थकानां पूर्वोक्तभिन्नतत्सजातीयबोधकतायाः सर्वसंमतत्वाच्च । अत एव 'समाने पूर्ववत्त्वादुत्पन्नाधिकारः स्यात्' इति साप्तमिकाधिकरणे पूर्वमीमांसायाम् इतरशब्दस्य सजातीयपरत्वं व्यवस्थापितम् । अत्र हि इषुनामके ज्योतिष्टोमविकारे क्रतौ कांश्चिदङ्गविशेषान्विधाय श्रूयते— 'समानमितरच्छ्येनेन' इति । तत्किमनुवादः, उतातिदेशविधिरिति चिन्तायाम्-इतरशब्दस्य संनिहितवाचकत्वेन लोकप्रसिद्धतया नास्यासंनिहितश्येनयागीयविशेषधर्मपरत्वम्, अपि तु ये ज्योतिष्टोमातिदेशेन संनिहितास्तत्परत्वमेव; तेषां च श्येनेऽप्यतिदेशप्राप्तत्वात् श्येनसादृश्योपपत्तेरनुवाद एवायमिति प्राप्ते— इतरशब्दस्य संनिहितवाचित्ववत् सजातीयपरत्वमपि लोकसिद्धम्; 'चैत्रमैत्रयोः कम्बलकौशेये इतरद्विष्णुमित्रस्ये'त्यादौ संनिहितपूर्वोक्तभिन्नतत्सजातीयवस्त्रादेरेव प्रतीतेः । ततश्च यत्संनिहितं प्राकृताङ्गजातं न तत्पूर्वोक्तसदृशम्, अप्राकृतानां साप्ताहसाम्नां पूर्वोक्तत्वात् । यच्च पूर्वोक्तसदृशं श्येनवैशेषिकाङ्गजातम् अप्राकृतत्वसाधर्म्यात्, न तत्संनिहितम् । अतोऽवश्यमन्यतरस्मिन् हेये वचनार्थवत्त्वाय संनिधिं त्यक्त्वा सादृश्यपरिग्रहणेन श्येनवैशेषिकाङ्गातिदेशविधित्वमवश्यमङ्गीकर्तव्यमिति सिद्धान्तितम् ।" नन्विवयुक्तन्यायश्चैवं सत्यनुरुध्यते इति णिङन्ताण्णिच्येवेदमुदाहरणमिति युक्तमिति दिक् ॥

इत्थमुत्पुच्छयत्याद्यर्थतया सार्थक्यं समर्थितं पर्यहार्षीद्भाष्यकारः— 'अत्रापि यथा भारद्वाजीयाः पठन्ति- तथा भवितव्यं प्रतिषेधेन— यक्चिणोः प्रतिषेधे णिश्रन्थिग्रन्थिब्रूञात्मनेपदाकर्मकाणामुपसंख्यानमिति' इति । वार्तिके णिसामान्यग्रहणात् उत्पुच्छयतावपि यक्चिणौ प्रतिषिद्धाविति न नियमार्थतयापि सूत्रसार्थक्यमिति तद्भावः ॥

ननु विनिगमनाविरहात् सूत्रेणैव यक्चिणोर्निवृत्तिरस्तु; किं वार्तिके णिग्रहणेनेत्याशङ्क्य परिहृतं भाष्ये— 'स चावश्यं प्रतिषेध आश्रयितव्यः । इतरथा हि यत्र नियमस्ततोऽन्यत्र प्रतिषेधः— अक्रियमाणे ह्येतस्मिन् यत्र नियमस्ततोऽन्यत्र तेन यक्चिणोः प्रतिषेधो वक्तव्यः स्यात्; गणयति गणं गोपालः, गणयति गणः स्वयमेव' इति । अयं भावः— अण्यन्तकर्मातिरिक्तकर्मरहिताण्यन्तकर्मकर्तृकण्यन्तात् आत्मनेपदमेव कर्मवद्भावेन नान्यदिति नियमः; न चासौ संभवति; गणयति गणं गोपालकः (१) गणयते गणः स्वयमेव (२) ततो हेतुमण्णिचि गणयति गणं गोपालकः (३) ततो गणयति गणः स्वयमेवेति चतुर्थी । तत्र णिच्सामान्यशून्यप्रयोगाभावात् अण्यन्तकर्मकर्तृकत्वाद्यसंभवात् न नियमविषयता । न च 'चिति स्मृत्याम्' इत्यादाविदित्करणेन चुरादिणिचोऽनित्यताज्ञापनात् तत्संभव इति वाच्यम्, ज्ञापकस्य विशेषविषयत्वात् । अतो नियमस्याव्यापारात् वार्तिके णिग्रहणविरहाच्च यक्चिणोर्व्यावृत्त्यसंभवात् तदर्थं वचनान्तरारम्भः कार्यः; ततो वरं वार्तिके णिग्रहणमिति ॥

ननु गणयतेः संख्यानार्थतया संख्यानस्य संख्यानिमित्तकपरिच्छेदलक्षणज्ञानविशेषरूपतया कर्तृस्थभावके अत्र यक्चिणोः प्रसङ्ग

एव नास्ति, कर्मस्थभावक्रियेष्वेव कर्मवद्भावनियमात् । अत्र कथं यक्चिणप्रतिषेधकता भाष्योक्ता संगम्यत इति चेत्, उच्यते— नात्र गणयतेः संख्यानानिमित्तकपरिच्छेदोऽर्थः, किंतु भागशो व्यवस्थापनम्; तत्र भागशो व्यवस्थितेः कर्मस्थतया कर्मवत्सूत्रप्राप्तिर्निर्बाधैवेति नियमवादिना निषेधो वक्तव्यः ॥

ननु नियमवादिना यक्चिणोः प्रतिषेधो वक्तव्यः; तथा णिग्रहणवादिनापि कर्मवद्भावप्राप्तात्मनेपदव्यावृत्त्यर्थं प्रतिषेधो वक्तव्य एवेति क्व गौरवमित्यापाततः प्रसक्तशङ्कापरिहारायावतारितं वार्तिकं भाष्ये— 'आत्मनेपदस्य च— आत्मनेपदस्य च प्रतिषेधो वक्तव्यः; गणयति गणः स्वयमेव' इति । अत्रायमभिसंधिः— सत्यं णिग्रहणवादिना आत्मनेपदस्य प्रतिषेधो वक्तव्य इति न तावता साम्यमुभयोः संभवति, आत्मनेपदप्रतिषेधस्य नियमवादिनापि वक्तव्यत्वात् । णिग्रहणवादिना आत्मनेपदनिषेधमात्रम्, नियमवादिना तूभयमिति गौरवम् ॥

नन्वेवमत्रैवात्मनेपदपरिसंख्यानार्थमिदं सूत्रमस्तु; यथा पूर्वमीमांसायाम् 'सप्तदश सामिधेनीरनुब्रूयात्' इत्यनारभ्याधीतवाक्यविहितसामिधेनीसाप्तदश्ये प्राकरणिकपाञ्चदश्यावरोधेन प्रकृतिषु स्वस्य निवेशमप्राप्य विकृतीर्निविविक्षमाणे सति कासुचिन्मित्रविन्दाध्वरकल्पादिविकृतिषु पुनर्विकृत्यन्तरपरिसंख्यानमभ्युपेयते, तथा ण्यन्तात्कर्मवद्भावेन आत्मनेपदं चेत् भवति तर्ह्यण्यन्तकर्मातिरिक्तकर्मरहिताण्यन्तकर्मकर्तृकादेवेति प्रकृत्यन्तरपरिसंख्यानार्थमिदं संपद्यते; तथा चास्य सूत्रस्य नानर्थक्यमित्याशङ्क्य परिहरति भाष्यकारः— 'आत्मनेपद-

प्रतिषेधार्थं तु— आत्मनेपदप्रतिषेधार्थमिदं वक्तव्यम्; गणयति गणः स्वयमेव । इष्यत एवात्रात्मनेपदम्' इति । गणयते गणः स्वयमेवेति तद्रूपस्येष्टत्वादिष्टव्यावर्तकता सूत्रस्य नोचितेति तात्पर्यम् ॥

ननु सूत्रादप्राप्त्या कथमिष्टमित्याशङ्कते— 'किमिष्यते आहोस्वित्प्राप्नोत्यपि, इष्यते च प्राप्नोति च । कथम्? अणाविति कस्येदं णेर्ग्रहणम्? यस्माण्णेः प्राक्कर्म वा कर्ता वा विद्यते । न चैतस्माण्णेः प्राक् कर्म कर्ता वा विद्यते' इति । अयमाशयः— णेरात्मनेपदं भवति अणौ कर्म णौ कर्तेत्युक्ते प्रत्यासत्त्या यं णिचमादाय आत्मनेपदं विधित्सितम्, तण्णिजभाववत्प्रयोग एव अणावित्यनेन ग्रहीतव्यः, न तु णिसामान्यशून्यप्रयोगः; तथा च प्रकृते अनेन सूत्रेण आत्मनेपदं न प्राप्नोतीति वक्तुं न शक्यते; हेतुमण्णिचमादाय आत्मनेपदे प्रतिपादनीये तण्णिजभाववत्याः स्वार्थण्यन्तावस्थाया अप्यण्यन्तावस्थात्वात् अण्यन्तकर्माभिन्नकर्मशून्यत्वाण्यन्तकर्मकर्तृकत्वयोः सत्त्वेन नियमव्यापारस्य दुर्वारत्वादिति ॥

नव्यास्तु गणयतीति स्वार्थणिजन्त एव सर्वत्र भाष्ये । एतस्मादित्यस्य एतद्घटकीभूतस्वार्थणिचः प्रागित्यर्थः । आत्मनेपदप्रतिषेधार्थद्वितीयवार्तिकस्य तु ण्यन्तानामण्यन्तकर्मतुल्यक्रिये कर्तर्येवात्मनेपदं न तु ण्यन्तकर्मतुल्यक्रिय इति नित्यण्यन्तेभ्यः कर्मकर्तरि तन्निवृत्त्यर्थमिदं सूत्रमित्यर्थ इत्याद्यसंभवादित्यन्तमाहुः, तन्न; तुल्यक्रिये इत्यस्य पूर्वोत्तरसूत्रयोरभावात् अनुवृत्त्यपकर्षाभ्यामलाभेनाध्याहारापत्तेः, अनध्याहारेणैवोपपत्तौ अध्याहारस्यान्याय्यत्वात्, अध्याहृतस्यापि तुल्यक्रिय इत्यस्य अणौ यत्कर्मेति प्रथमानिर्दिष्टकर्मणा नान्वयः, तृतीयान्तस्यैव

णेरणौ यत् कर्म णौ चेत् ८३ स कर्ताऽनाध्याने

तुल्यपदान्वयित्वात् । कर्मपदस्य कर्मतुल्यक्रियापरत्वं तु लक्षणादोषादेव न संभवति, मुख्यार्थमादायैवोपपत्तौ तथा कल्पनस्यायुक्तत्वात् । किं च ण्यन्तादण्यन्तकर्मतुल्यक्रिये कर्तर्येवात्मनेपदं न तु ण्यन्तकर्मतुल्यक्रिय इति नियमासंभव एव 'कर्मवत्—' इत्यत्र समानधातौ कर्मणा तुल्यत्वस्यैव कर्मवद्भावहेतुत्वेन सिद्धान्तिततया ण्यन्तकर्मतुल्यक्रियभिन्नाण्यन्तकर्मतुल्यक्रियाकर्तरि समानधातुनिरूपितकर्मतुल्यक्रियत्वस्यासंभवेन तथाविधण्यन्तस्य कर्मवद्भावाविषयतया उभयप्राप्त्यभावेन नियमस्वरूप एवोच्छित्तेः, तत्र चान्यत्र च प्राप्तावेव नियमस्य व्यवस्थितेः । अत एवोत्तरनियमोऽपि निरस्तः । सर्वत्र भाष्ये गणयतिः स्वार्थणिजन्त इत्ययुक्तम्, 'नित्यत्वाण्णिचः केवलानां चुरादीनां प्रयोगाभावादणौ कर्मणोऽसंभवात् णेरिति हेतुमण्णिचो ग्रहणम् । प्रतिषेधोऽप्यणाविति प्रत्यासत्त्या तस्यैव न्याय्य इत्यहेतुमण्णौ गणस्य कर्मत्वम्, हेतुमण्णौ कर्तृत्वमिति सूत्रस्यायं विषयो भवत्येव । कथमत्रात्मनेपदं वार्यते' इति कैयटग्रन्थविरोधात्; स्वव्याख्यानानुरोधेन कैयटपाठस्य उपपादकत्वकल्पनं तु साधिष्ठगोष्ठीदाविष्ठमेव, 'न ह्युष्णीषानुरोधेन शिरस्तक्ष्णोति बुद्धिमान्' इति न्यायात् । न च गणयतेर्हेतुमण्णिजन्तत्वेन "एतस्मादिति भाष्यस्य प्रत्यक्षणिच्परतां विहाय उपसर्जनणिच्परता स्वीकार्येत्यस्वरस इति वाच्यम्' 'अणावकर्मकात्—' इत्यस्य चेतयमानं प्रयोजयति चेतयतीति चुरादिणिचो ण्यन्तेऽव्याप्तिमाशङ्क्य, 'अणाविति कस्येदं णेर्ग्रहणम्? यस्माण्णेः प्राक्कर्म कर्ता वा विद्यते । न चैतस्माण्णेः प्राक् कर्म कर्ता वा विद्यते' इति भाष्यस्य प्रवृत्तत्वेन तत्रोपसर्जनणिच्परत्वस्यावश्यं वक्तव्यत्वात्तत्सारूप्यानुसारादत्रापि उपसर्जनणिच्परताया एव स्वरसत्वादिति यत्किंचिदेतत् ॥

एतदन्तस्य भाष्यस्येमे संग्रहश्लोकाः—

नन्वेवं सति कर्मकर्तृविषयत्वात्कर्मवत्कर्मणे-
त्येनेनैव गतार्थतामयमयन्योगोऽफलः स्यादिति ।
मैवं कर्मवदित्यनेन भवतोऽव्यावृत्तये यक्चिणो-
र्योगोऽयं नियमार्थतामनुभवन्सार्थक्यमालम्बताम् ॥ १ ॥

नन्वेवं नियमार्थतापि विफला प्रातिस्विको हेतुम-
ण्णिग्रन्थीति निषेध एव कथितो यद्वार्तिके यक्चिणोः ।
मा स्मैवं चकथस्तथापि हि णिचि स्यातां यतो यक्चिणौ
तद्व्यावर्तकताकृतार्थतामिदं सूत्रं नियच्छेत्ततः ॥ २ ॥

भारद्वाजीयपाठक्रमसमधिगतो यक्चिणोः स्यान्निषेधो-
ऽवश्यं चायं निषेधः सगणगणयतावीप्सितो ण्यन्तशून्ये ।
तत्रापीष्टौ तडानावपि तदपगमायापि नायं नियन्ता
तस्मात्सूत्रं निरर्थं त्विति पुनरियमापद्यतेऽवद्यशङ्का ॥ ३ ॥

नन्वेवमाध्यानार्थकात् कर्मवद्भावेन आत्मनेपदं मा भूदित्येवमर्थं सूत्रमस्तु, अण्यन्तकर्मातिरिक्तकर्मरहिताण्यन्तकर्मकर्तृकण्यन्तात्कर्मवद्भावेनात्मनेपदं चेत् अनाध्यानार्थ एवेत्यर्थवर्णनसंभवादित्याशङ्क्याह भाष्यकारः— 'इदं तर्हि प्रयोजनम् अनाध्यान इति वक्ष्यामि । इह मा भूत्— स्मरति वनगुल्मस्य कोकिलः, स्मरयत्येनं वनगुल्मः स्वयमेव' इति । यद्यपि नियमस्य सजातीयविषयत्वात् आध्यानार्थकादण्यन्तकर्मकर्तृकत्वादिविशिष्टादेवात्मनेपदप्रसक्तिव्यावृत्त्या प्रकृते अण्यन्ते वनगुल्मस्य शेषत्वेन विवक्षया षष्ठ्याः प्रयोगादण्यन्तकर्मत्वाभावात् अण्यन्तकर्मकर्तृकत्वाभावेनात्मनेपदव्यावृत्तेरसंभवः; तथापि

वनगुल्मस्येति संघातादायातम्, वनगुल्ममित्येव प्रदर्शनीयमिति स्वीकारान्न कश्चिद्दोषः ॥

नन्वेवमपि 'स्मरयत्येनं वनगुल्म' इत्यत्र अनेन कर्मवद्भावप्राप्तात्मनेपदव्यावृत्तिकथनमसंगतम्, तत्र कर्मवद्भावप्राप्तेरेवाभावात्; समानधातौ कर्मस्थया क्रियया तुल्यक्रियः कर्ता हि कर्मवद्भवति; प्रकृते च ण्यन्ताण्यन्तयोः समानधातुत्वाभावात् न तत्संभवः। किं च कर्मवद्भावश्च सकर्मकाणां प्रतिषिध्यते अन्योन्यं स्पृशति अजा ग्रामं नयतीत्यादिव्यावृत्तये। प्रकृते च एनमिति कर्मणः सद्भावान्न तत्संभव इति चेत्, अत्र कैयटः— 'एतदप्युपलक्षणम्। अत्र ह्येनमिति कर्मणः सद्भावात् कर्मवदकर्मकाणामिति वचनात्कर्मवद्भावप्राप्तिर्नास्ति। नाप्यनेनात्मनेपदस्य, कर्मान्तरसद्भावात्। तस्मात् स्मरयति वनगुल्मः स्वयमेवेति प्रदर्शनीयम्' इति। निवृत्तप्रेषणपक्षघटकचतुर्थकक्ष्या प्रदर्शनीयेत्याशयः, तृतीयकक्ष्यायां समानधातौ कर्मस्थया क्रियया तुल्यक्रियस्य कर्तुरकर्मकत्वस्य च संभवात्। एतेन प्रकृतोदाहरणे नोक्तनियमेन आत्मनेपदव्यावृत्तिर्घटते अण्यन्तकर्मातिरिक्तकर्मरहितत्वस्याभावादिति शङ्कापि परास्ता ॥

सूत्रस्य निरुक्तनियमार्थतया सार्थकतामपि खण्डयति भाष्यकारः— 'एतदपि नास्ति प्रयोजनम्। कर्मापदिष्टा विधयः कर्मस्थभावकानां कर्मस्थक्रियाकाणां च भवन्ति। कर्तृस्थभावकश्चायम्' इति ॥

ननु भावभावनाक्रियादिशब्दानां पर्यायतया कर्मस्थभावकानां कर्मस्थक्रियाकाणां चेत्यसंगतम्। न च सपरिस्पन्दनसाधनसाध्यो

धात्वर्थः क्रिया, अपरिस्पन्दनसाधनसाध्यो धात्वर्थो भाव इति प्राचीनमर्यादया पृथग्व्यपदेश इति वाच्यम्, स्मर्तुर्वनगुल्मस्य च स्पन्दनसंभवेन सांकर्यादिति चेत्, न; यद्धात्वर्थविशेषत्वव्यापकं सपरिस्पन्दनसाधनसाध्यत्वं तद्धात्वर्थविशेषः क्रिया, तदन्यधात्वर्थविशेषो भावइति विभागमाश्रित्य पृथग्वचनात्। अस्पन्दमानेन पुरुषेण अस्पन्दमानस्य वनगुल्मस्य स्मृतेरपि सत्त्वेन सपरिस्पन्दनसाधनकत्वव्याप्यतायाः स्मरणादावभावात्। पचनभेदनारोहणत्वादाविव तत्सत्त्वेन पचनभेदनारोहणादीनां क्रियात्वमिति निष्कर्षः ॥

ननु सर्वधात्वर्थानां कर्तृस्थत्वात् कर्मस्थभावक्रिया एव न सन्ति; न च सकर्मकाणां फलव्यापारोभयवाचकत्वेन तत्र फलांशस्य कर्मस्थत्वात् तत्संभव इति वाच्यम्, तथा सति स्मरत्यादीनामपि विषयीभवनरूपफलांशस्य कर्मस्थतया कर्मस्थभावकत्वापादनेन विभागासंगतिप्रसङ्गादिति चेत्, अत्राहुः— 'विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता' इति। अयं भावः — तण्डुलं पचति, वृक्षं भिनत्तीत्यादौ पक्वापक्वतण्डुलेषु भिन्नाभिन्नवृक्षेषु विक्लत्तिद्वैधीभावादिलक्षणः क्रियाकृतविशेषो लक्ष्यते, नैवमाध्यातानाध्यातवनगुल्मयोर्लक्ष्यते क्रियाकृतविशेष इति ते कर्मस्थभावक्रियाकाः, स्मरत्यादयस्तु कर्तृस्थभावक्रियाका इति विभागोऽवधार्यत इति ॥

एतावता ग्रन्थेन सूत्रस्यानर्थक्यं कर्मवद्भावोपष्टम्भेन प्रतिपाद्याधुना कर्मवद्भावाविषयेषु कर्तृस्थभावक्रियेषु सूत्रस्य विध्यर्थतया सूत्रस्य सार्थकतामवतारयति भाष्यकारः— 'एवं सति सिद्धे यदनाध्यान इति प्रतिषेधं शास्ति, तज्ज्ञापयत्याचार्यः, भवत्येवंजातीयकाना-

णेरणौ यत् कर्म णौ चेत् ८७ स कर्ताऽनाध्याने

मात्मनेपदमिति । किमेतस्य ज्ञापने प्रयोजनम्? पश्यन्ति भृत्या राजानं दर्शयते भृत्यान् राजेति ॥

ननु प्रथमप्रघट्टिकायां वाक्यभेदेन अण्यन्तकर्मातिरिक्तकर्मरहितत्वं हस्ती स्थलमारोहयति मनुष्यानित्यत्रातिप्रसङ्गभङ्गाय ण्यन्तविशेषणमाश्रितम् । तत्कथं दर्शयते राजा भृत्यानित्यस्योदाहरणत्वं घटते, अण्यन्तकर्मातिरिक्तकर्मणः सत्त्वादिति चेत्, न; प्रागुक्तरीत्या अण्यन्तकर्मातिरिक्तकर्मरहितप्रकृतिकत्वस्यैव प्रथमप्रघट्टिकातात्पर्यविषयताव्यवस्थापनेन अण्यन्तकर्मकर्त्रोः कर्मत्वसत्त्वेऽपि प्रकृतेरण्यन्तकर्मातिरिक्तकर्मशून्यत्वोपपादनसंभवात् स्थलस्य अण्यन्तकर्मकर्त्रतिरिक्तस्यैव तेन व्यवच्छेदात् । उक्तं च कैयटेन— 'अस्मादेवोदाहरणाद्भाष्यकारस्यायमभिप्राय ऊह्यते अण्यन्तावस्थायां ये कर्तृकर्मणी तद्व्यतिरिक्तकर्मान्तरसद्भावे आत्मनेपदं न भवति; यथा स्थलमारोहयति मनुष्यानिति' इति । अनन्तरोक्त एव कैयटस्याशयः । अत्र 'कर्तरि कर्म—' इत्यतः कर्तृग्रहणानुवृत्त्या अण्यन्तकर्तृकर्मातिरिक्तकर्मराहित्यमेव अणौ यत्कर्म णौ चेदित्यस्यार्थ इति प्रकृते भृत्यानामण्यन्तकर्तृत्वान्न दोष इति नागोजिपण्डितादिकृतं व्याख्यानं तु प्रथमप्रघट्टकभाष्यस्वग्रन्थादिविरोधादध्याहारादिदुष्टत्वादयुक्तम् । विशेषतश्च सत्यवर्यस्वामिमतखण्डनावसरे निरसिष्यत इति सुधीभिराकलनीयम् ॥

ननु कर्तृस्थभावक्रियार्थं सूत्रस्य विध्यर्थतया साफल्यमस्तु; तथापि क्वचिदतिव्याप्तिः प्रसजति । तथा हि— हन्त्यात्मानं देवदत्तः, घातयत्यात्मानमात्मेत्यत्र अण्यन्तकर्मभूतात्मातिरिक्तकर्मरहितप्रकृतिक-

त्वाण्यन्तकर्मकर्तृकत्वयोः सत्त्वादात्मनेपदमनेन प्राप्नोति । अत आत्मनेपदेनाभिहितस्यात्मनः कर्मत्वं तस्य प्रयोजकत्वविवक्षा च यत्र-तत्रोक्तसूत्रस्य वाचनिकनिषेधो वक्तव्य इति शङ्कया प्रवृत्तं वार्तिकमवतार्य भाष्यकारः प्रत्याचष्टे— 'आत्मनः कर्मत्वे प्रतिषेधो वक्तव्यः; हन्त्यात्मानं घातयत्यात्मेति । स तर्हि वक्तव्यः । न वा ण्यन्तेऽन्यस्य कर्तृत्वात्— अन्यदत्राण्यन्ते कर्म, अन्यो ण्यन्तस्य कर्ता । कथम्? द्वावात्मानौ— अन्तरात्मा शरीरात्मा च । अन्तरात्मा तत्कर्म करोति, येन शरीरात्मा सुखदुःखे अनुभवति । शरीरात्मा तत्कर्म करोति, येन अन्तरात्मा सुखदुःखे अनुभवति' इति । अयं भावः— घातयत्यात्मानमात्मेत्यत्र अण्यन्तकर्मकर्तृकत्वं नास्ति, हन्त्यात्मानमित्यत्र शरीरात्मनः कर्मत्वात् घातयत्यात्मानमात्मेति ण्यन्ते जीवस्य कर्तृत्वात् उभयोर्भिन्नत्वादिति । तथा च यथाश्रुतसूत्रेणैव सर्वनिर्वहणान्न वार्तिकप्रवृत्तिः ॥

श्लोकक्रमेण पूर्वोक्तश्लोके नैरर्थक्यशङ्का स्थिता; तत्परिहारपरस्य अनन्तरभाष्यस्य अर्थं संगृह्य वासुदेवसमर्पणपरोऽयं श्लोकः—

प्रभवति न चाप्येषा दोषाय कर्मवदित्यदः
  प्रसरति यतः कर्मस्थार्थेषु धातुषु नान्यतः ।
इह पुनरनाध्यानार्थोक्त्या फलिष्यति कर्तृग-
  क्रियाविषयको योगः श्रीश्रीनिवास निशम्यताम् ॥७॥

इति गजसूत्रवादार्थे स्वसिद्धान्तसमन्वयो नाम प्रथमः परिच्छेदः ।

णेरणौ यत्कर्म णौ चेत् ८९ स कर्ताऽनाध्याने

॥ श्रीः ॥

अथैतत्सिद्धान्तविरोधि मतं निरस्यते ।

इह दीक्षितादयः— अण्यन्तक्रियानधिकक्रियाकाण्यन्तकर्मकर्तृकादनाध्यानार्थकण्यन्तादात्मनेपदं भवतीति महावाक्यार्थः । "णिचश्चेति सिद्धे अकर्त्रभिप्रायार्थमिदम् । कर्त्रभिप्रायेऽपि पूर्वविप्रतिषेधार्थम् । अत्र च प्रमाणं-दर्शयते भृत्यान् राजेति भाष्योदाहरणमेव । अत्र अणावकर्मकादिति प्राप्नोति, निवृत्तप्रेषणत्वेनाणावकर्मकत्वात् । कर्तृस्थभावकाः कर्तृस्थक्रियाश्चोदाहरणम्; पश्यन्ति भवमित्यादि । एवमुदाहरणान्तरमप्यूह्यमिति ॥

" न्यग्भावना न्यग्भवनं रुहौ शुद्धे प्रतीयते । न्यग्भावना न्यग्भवनं ण्यन्तेऽपि प्रतिपद्यते ॥ अवस्थां पञ्चमीमाहुर्ण्यन्ते तां कर्मकर्तरि । निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजुच्यते ॥" इति । इह विशिष्टवाच- पृ. 76
कयोः शुद्धण्यन्तयोर्वाच्यावंशौ वाचकभेदात् द्वेधा गणयित्वा पूर्वोक्ततृतीयकक्ष्यायाम् अवस्थाचतुष्टयम्, चतुर्थकक्ष्यायाम् पञ्चमी कक्ष्येति श्लोकार्थोऽभिप्रेतः । यद्वा पश्यन्ति आरोहन्तीति प्रथमकक्ष्या । ततः सौकर्यद्योतनाय कर्मण एव प्रेरणामारोप्य णिच् क्रियते— दर्शयति भवः, आरोहयति हस्ती; पश्यत आरोहतश्च प्रेरयतीत्यर्थः । ततो णिच्प्रकृतिभ्यां णिज्भ्यां चोपात्तयोर्द्वयोरपि प्रेरणयोस्त्यागे दर्शयते आरोहयत इत्याद्युदाहरणम्; विषयीभवति न्यग्भवतीति च पूर्ववदेवार्थः । सोऽयमध्यारोपितप्रेषणपक्षः । इह द्वितीयकक्ष्यायामतिव्याप्तिं वारयितुं समानक्रियत्वपरं द्वितीयं वाक्यम्; तेन प्रेरणाधिक्यान्नातिव्याप्तिः । निवृत्तप्रेषणतृतीयकक्ष्यायामतिव्याप्तिवारणाय तृतीयं वाक्य-

म्; इह स्वणौ कर्मणोऽभिवहस्तिनोणौ कर्मत्वमेव न कर्तृतेति नातिव्याप्तिः। यद्यप्यत्र कैयटेन द्वितीयवाक्यस्य समानक्रियत्वपरत्वं नाङ्गीकृतम्; किंतु अण्यन्तकर्मातिरिक्तकर्मरहितत्वपरत्वमङ्गीकृत्य आरोह्यमाणो हस्ती स्थलमारोहयति मनुष्यानित्यत्र व्यावृत्तिरास्थिता; तथापि तदुचितमेव, भाष्यस्थानां कर्मशब्दानां क्रियापरत्वेन व्याख्यानसंभवात्। अभ्युपेत्यापि ब्रूमः— मास्तु भाष्यमते समानक्रियत्वम्; तथापि दर्शयते भृत्यान् राजेति भाष्यं व्याचक्षाणेन कैयटेन 'अणौ ये कर्तृकर्मणी-तद्भिन्नं कर्म व्यावर्त्यते' इत्युक्तम्; तथा च सति मनुष्यानित्यस्याणौ कर्तृतया गत्यर्थाद्रुहेर्णौ कर्मत्वेऽप्यात्मनेपदं दुर्वारम्, मनुष्यस्थलयोरणौ कर्तृकर्मणोरेवेह कर्मतया तदितरकर्माभावात्। अपि च स कर्तेत्यंशोऽपीह नास्ति, आरोहन्ति स्थलं मनुष्या इत्यण्यन्तकर्मणः स्थलस्य णौ कर्तृत्वाभावात् हस्तिन एव कर्तृत्वात्। न चारोहयमाण इत्येतत्स्थलीये 'आरोहन्ति हस्तिनं हस्तिपका' इत्यत्र कर्मणो हस्तिनः शानच्प्रकृत्यंश इवेह कर्तृतयाप्यतिप्रसङ्ग इति वाच्यम्, प्रत्यासत्त्या तत्प्रसङ्गभङ्गात्। तथा हि— ण्यन्तादात्मनेपदम् अणौ यत्कर्म णौ चेत्स कर्तेत्युक्ते प्रत्यासत्त्यायमर्थो गम्यते— येन णिचा ण्यन्तादात्मनेपदं विधित्सितं तेनैव णिचा अण्यन्ते तत्प्रकृतिभूते धातौ यत्कर्म स एव चेत्कर्ता तस्मिन्नेव ण्यन्ते इति। अत्र च यत्रायमुपाधिः, कृतमेव तत्रात्मनेपदम्— आरोहयमाण इति। यत्र तु न कृतम्— स्थलमारोहयतीति, न तत्रायमुपाधिः; येनातिव्याप्तिः स्यात्। निष्कर्षे तु कर्मव्यवच्छेदपरवाक्यार्थो भाष्यवार्तिकयोरनभिमत एव, उक्तरीत्या प्रयोजनाभावात्। भाष्यग्रन्थस्तु कर्मपदस्य क्रियापरतायां सुस्थ एवेति ॥

णेरणौ यत् कर्म णौ चेत् ९१ स कर्ताऽनाध्याने

अत्राहुः— कर्मपदस्य क्रियापरत्वेन व्याख्याने 'दर्शयते भृत्यान् राजेति' सिद्धान्तोदाहरणविरोधः, तत्राण्यन्तक्रियापेक्षया णिचि णिजर्थप्रेरणांशाधिक्यात् । न चाध्यारोपितप्रेषणतृतीयकक्ष्यारूपमङ्गीकृत्य तत्र प्रेषणांशाभावात् विषयीभवनमात्रप्रतीत्या समानक्रियत्वमस्तीति वाच्यम्, तस्यां कक्ष्यायां भृत्यानित्यस्यानन्वयेन अध्यारोपितप्रेषणपक्षघटकद्वितीयकक्ष्याया एव वक्तव्यत्वात् । न च द्वितीयकक्ष्यायामन्वितस्य भृत्यस्य तृतीयकक्ष्यायां णिजर्थप्रेषणत्यागेऽपि णिच इव प्रयोगः, न तु तदर्थान्वय इति वाच्यम्, अस्मदुक्तरीत्यान्वयसंभवेन ईदृशाक्लिष्टगत्याश्रयणस्यान्याय्यत्वात् ॥

किंच 'हृक्रोरन्यतरस्याम्' इत्यत्र दर्शयते भृत्यान् राजेत्यत्र अण्यन्तकर्तॄणां भृत्यानां विकल्पेन कर्मसंज्ञा आत्मनेपदसंनिपातनिमित्तिका 'णेरणौ—' इत्युक्तसूत्रकृतात्मनेपदसमाश्रयणेन उपपद्यमाना कथमुक्तरीत्या संगच्छताम्? द्वितीयकक्ष्यायां विद्यमानं भृत्यानिति कर्म "णेरणौ"सूत्रविषये तृतीयकक्ष्यायां प्रयुज्यत इत्युपपादनस्य तत्रासंभवात्, 'णेरणौ—' इति सूत्रेण आत्मनेपदं निमित्तीकृत्य कर्मसंज्ञाविकल्पस्य भाष्ये कथनात् । तथा च भाष्यम्— हृक्रोर्वावचने अभिवादिदृशोरुपसंख्यानम्— अभिवदति गुरुं देवदत्तः, अभिवादयते गुरुर्देवदत्तं देवदत्तेन वा । पश्यन्ति भृत्या राजानम्, दर्शयते राजा भृत्यान्भृत्यैर्वा । कथं चात्रात्मनेपदम्? एकत्र "णेरणाविति, अपरत्र "णिचश्चेति— इति ॥

अपि च क्रियापरत्वपक्षे 'अणौ यत्कर्म णौ चेत्तदेव कर्म भवति । ततः स कर्ता— कर्ता चेत्स भवति णाविति' इति भाष्ये तत्पदेन

पूर्वोपात्ताण्यन्तप्रतिपाद्यक्रियापरामर्शेन कर्तृत्वविध्यापत्त्या तस्य च सर्वासंमतत्वात् ॥

किंच कर्ता चेत्स भवति णाविति वाक्ये पूर्ववाक्यात् णावित्येतन्मात्रमनुवर्त्य स इति तत्पदेन अण्यन्तकर्मत्वेन रूपेण पूर्वोपस्थितं परामृश्य कर्तृत्वं विधीयत इति प्रतीयते। तव चाणौ यत्कर्म णौ चेदिति सर्ववाक्यानुवृत्तिं कथयतो भाष्यविरोधः ॥

किंच अण्यन्तक्रियासमानक्रियाकत्वपरत्वं प्रकृतभाष्यस्य त्वया कथयितुं न शक्यते; त्वन्मते आरोहयमाणो हस्ती स्थलमारोहयति मनुष्यानित्यत्र आरोहन्ति स्थलं मनुष्या इत्यण्यन्तकक्ष्येति स्वीकारेण तत्राण्यन्तकर्मकर्तृकत्वमेव नास्तीति सूत्रस्यातिप्रसङ्गाभावेन तद्व्यावृत्तये समानक्रियत्वमिति कथनायोगात् ॥

यत्तु— नात्र कर्मपदस्य क्रियापरत्वं युक्तम्, 'कर्तरि कर्मव्यतीहारे' इत्यत्र क्रियाग्रहणं कर्तव्यम् इति पर्यनुयुञ्जानस्य वार्तिककारस्य वाक्ये 'णेरात्मनेपदविधानेऽण्यन्तकर्मणस्तत्रोपलब्धिः' इति वार्तिके कर्मपदस्य क्रियापरत्वायोगेन तद्वार्तिकार्थसाधनपरभाष्यस्थकर्मपदानामपि क्रियापरत्वासंभवादिति नागोजिभट्टैरेतन्मते दूषणमुक्तम्, तन्न; अष्टमे 'प्रकारे गुणवचनस्य' इति सूत्रे 'कर्मव्यतिहारे सर्वनाम्नः समासवच्च बहुलम्, इत्यत्र वार्तिककारेण कर्मपदस्य क्रियापरत्वेन प्रयोगस्य कृतत्वात्, 'गतिबुद्धि---' इति सूत्रे कर्मपदस्य क्रियापरत्वे 'शब्दक्रियाणामिति चेत् ह्वाययत्यादीनां प्रतिषेधः' इति वार्तिककृता विचाराच्च, 'कर्तरि कर्म—' इति सूत्रे क्रियाग्रहणं कर्तव्यमिति पर्यनुयोगस्य कर्मपदप्रयोगे क्रियाकारकोभयग्रहणापत्तौ 'अन्योन्यं लुनीत'

णेरणौ यत् कर्म णौ चेत् १३ स कर्ताऽनाध्याने

इत्यत्रातिप्रसङ्गः स्यादिति तात्पर्यकतायाः 'एवमप्युभयोः कृत्रिमयोरुभयगतिः प्रसज्येत । तस्मात्क्रियाग्रहणं कर्तव्यम्' इत्येतत्सूत्रभाष्य एव स्फुटत्वात् कर्मपदप्रयोगे क्रिया न प्रतीयेतेत्येतत्तात्पर्यकताया असंभवाच्च, प्रत्युत कर्मपदप्रयोगे क्रियाकारकोभयप्रतीतिरित्यर्थलाभेन इह सूत्रे प्रथमवाक्ये क्रियाया ग्रहणं स कर्तेति वाक्ये कारकस्येति तस्यैवानुकूलत्वाच्च, 'कर्मणा यमभिप्रैति–' इतिसूत्रस्थकर्मपदस्योभयपरतायाः सिद्धान्तितत्वाच्च । तस्मादुक्तान्येव क्रियापरत्वे दूषणानीति दिक् ॥

केचित्तु— क्रियापरत्वेन द्वितीयवाक्ये व्याख्यानपक्षे स कर्तेति वाक्यमेव निरर्थकं स्यात्, अण्यन्तक्रियानधिकक्रियाकत्वस्य अण्यन्तक्रियाप्रतियोगिकाधिकत्वत्वावच्छिन्नप्रतियोगिताकाभाववत्क्रियाप्रतिपादकत्वपर्यवसानसंभवेन निवृत्तप्रेषणपक्षघटकतृतीयकक्ष्यायां द्वितीयकक्ष्यापेक्षया आधिक्यसत्त्वेन यत्किंचित्प्रतियोगिनापि साकं सामान्याभावस्य विरोधितया निरुक्तसमानक्रियत्वाभावेनैव व्यावृत्तिसंभवादित्याहुः ॥

यदपि— 'अणावकर्मकात्' इति 'विभाषोपपदेन—' इति च परत्वात्प्राप्ते पूर्वविप्रतिषेधेनेदमेवेष्यते इति, तन्न; पूर्वविप्रतिषेधस्य भाष्याद्यनुक्तत्वात् । न च दर्शयते भृत्यान् राजेति भाष्योदाहरणात् पूर्वविप्रतिषेध उन्नीयत इति तदुक्तयुक्तिर्युक्तेति वाच्यम्, भाष्योदाहरणस्यानन्तरोक्तरीत्या अध्यारोपितप्रेषणपक्षद्वितीयकक्ष्यात्वेन अणावकर्मकत्वाभावात् त्वदुक्तक्लिष्टगत्या तत्पक्षतृतीयकक्ष्यात्वेऽपि तत्सूत्रप्रवृत्त्यसंभवाच्च । एतेन- दर्शयते भवः, आरोहयते हस्तीति निवृत्तप्रेषणपक्षचतुर्थकक्ष्योदाहरणं परास्तम्, तत्र 'अणावकर्मकात्—' इति परस्मैपदावश्यंभावात् । न च कर्त्रभिप्रायत्वाविवक्षायाम् 'अणावकर्म-

कात्—' इति न प्रवर्तत इति वाच्यम्, तत्र 'कर्त्रभिप्राये' इत्यननुवृत्तेः अण्यन्ताकर्मकचित्तवत्कर्तृकमात्रविषयत्वात् 'णिचश्च' इत्येतद्विषये प्रवर्तते अन्यविषये न प्रवर्तत इत्यत्र प्रमाणाभावात् ॥

यत्तु— आरोहयतेर्निवृत्तप्रेषणपक्षचतुर्थकक्ष्यायामेतदुदाहरणत्वे 'न्यग्भाविना न्यग्भवनं रुहौ शुद्धे प्रतीयते' इत्युपन्यसनम्, तदपि न; अध्यारोपितप्रेषणद्वितीयकक्ष्याप्रदर्शनपरत्वात् । तथा हि— आरोहन्ति हस्तिनं हस्तिपकाः । न्यग्भवनरूपफलांशः, न्यग्भावनारूपव्यापारांशश्च प्रतीयते । ततो हस्तिनः प्रयोजकत्वविवक्षायां न्यग्भवनन्यग्भावने हस्तिनिष्ठप्रयोजकव्यापाररूपपञ्चमावस्था च अण्यन्तकर्मणि हस्तिनि अधुना कर्तरि प्रतीयते इति तस्य श्लोकस्यार्थः । प्रथमकक्ष्यायां न्यग्भावनम्, द्वितीयकक्ष्यायां न्यग्भवनम्, तृतीयायां न्यग्भावनम्, चतुर्थ्यां न्यग्भवनमित्यर्थस्तु न युज्यते, 'अवस्थां पञ्चमीमाहुर्ण्यन्ते ताम्—' इत्युक्तवाक्यानन्वयप्रसङ्गात् । अत एव 'निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजुच्यते' इत्यादिना निवृत्तप्रेषणपक्ष उपपादयिष्यते; तत्तु न पूर्वान्वयीति ज्ञेयम् ॥

यत्तु— इह विशिष्टवाचकयोः शुद्धण्यन्तयोर्वाच्यावंशौ वाचकभेदाद्गणयित्वा तृतीयकक्ष्यायामवस्थाचतुष्टयं ज्ञेयम्; चतुर्थकक्ष्यायां पञ्चमी अवस्थेत्यर्थवर्णनम्, तदयुक्तम्, अण्यन्ते न्यग्भावना न्यग्भवनं चेति कक्ष्याद्वयप्रतिपादनवत् ण्यन्तेऽपि कक्ष्याद्वयप्रतिपादनावश्यंभावेन तृतीयकक्ष्यायामवस्थाचतुष्टयोक्त्यसंभवात्, तृतीयकक्ष्यायां फलव्यापारांशोभयस्य पृथङ्निर्देशवत् अण्यन्तावस्थायां फलव्यापारांशोभयोपादानमित्युक्तौ द्वितीयकक्ष्यानिरूपणानापत्तेः, अण्यन्तद्वितीयकक्ष्याशून्ये

नेरणौ यत् कर्म णौ चेत् ९५ स कर्ताऽनाध्याने

अध्यारोपितप्रेषणपक्षपरताया उचितत्वात् ॥

यत्तु—लुनातेर्निवृत्तप्रेषणपक्षनिरूपणावसरे नागोजिभट्टैरुक्तम्—प्रथमं द्विधाभवनं बुद्धिरवगाहते, ततस्तदनुकूलप्रेषणमित्यवस्थाद्वयम्; तत्सौकर्यातिशयात्पुनर्द्विधाभवनं द्वितीयकक्ष्यायाम्; ततो णिजर्थतया प्रेषणमिति तृतीयायां चतुर्थी, चतुर्थ्यां पञ्चमी—इति; तत्तु न्यायसाम्यादत्रोपपादयितुं शक्यम्; तथापि तदर्थस्यैवात्र श्लोके युक्तत्वादयुक्तं न्यायोपजीवनम्। तथा हि—प्रथमकक्ष्यायां द्विधाभवनद्विधाभावने आश्रित्यावस्थाद्वयम्; द्वितीयकक्ष्यायां द्विधाभवनमादाय तृतीयावस्थेतिवत् न्यग्भवनं न्यग्भावनं न्यग्भवनं चेति क्रमेण द्वितीयकक्ष्यायां तृतीयावस्थेति हि प्रतिपादितम्; तच्च न संभवति, न्यग्भावनस्यैव प्रथमोपादानात् 'रुहौ शुद्धे' इत्यस्य प्रथमकक्ष्याघटकावस्थाद्वयमात्रान्वयप्रतीतेश्च 'न्यग्भावना न्यग्भवनं ण्यन्तेऽपि' इत्यत्र विद्यमानस्य न्यग्भवनमित्यस्यात्रापकर्षं कृत्वा न्यग्भवनं न्यग्भावनेति क्रमव्यत्ययस्य 'रुहौ शुद्धे प्रतीयते' इत्यनेन संबन्धे वक्रान्वयाच्चेत्यास्तां तावत् ॥

यदपि—दर्शयति भवः आरोहयति हस्तीति अध्यारोपितप्रेषणद्वितीयकक्ष्याप्रदर्शनम्; तदपि न युक्तम्, दर्शयते भृत्यान् राजेत्यत्रेवात्रापि आत्मनेपदावश्यंभावात्। न च यथाश्रुतभाष्यरीत्या अण्यन्तकर्मातिरिक्तकर्मरहितत्वस्योद्देश्यतावच्छेदककोटौ निवेशिततया कथमुक्तस्थले सूत्रप्रवृत्तिरिति भ्रमितव्यम्, अण्यन्तकर्मातिरिक्तकर्मरहितप्रकृतिकतायाः सिद्धान्तितत्वात् अण्यन्तकर्तॄणां भृत्यानां ण्यन्तं प्रत्येव कर्मत्वेन प्रकृतेस्तद्राहित्यात् ॥

यत्तु—अण्यन्तकर्तृकर्मातिरिक्तकर्मरहितत्वं व्याख्याय अण्यन्तकर्तृकर्मणोः कर्मत्वेऽपि न दोष इत्याश्रयणे आरोहयमाणे हस्ती स्थलमारोहयति मनुष्यानिति प्रत्युदाहरणानुपपत्तिः, मनुष्यस्थलयोरणौ कर्तृकर्मणोरेव इह कर्मतया तदतिरिक्तकर्माभावादित्युपापीपदन्, तन्न; तत्रारोहन्ति हस्तिनं मनुष्या इत्येवाण्यन्तावस्थायाः सिद्धान्तिसंमतत्वात्, अष्टमे 'यद्धि तु परं छन्दसि' इति सूत्रे रुहेर्गत्यर्थत्वादण्यन्तकर्तुर्णौ कर्मत्वमिति प्रतिपिपादयिषता भाष्यकारेण 'आरोहन्ति हस्तिनं मनुष्याः, आरोहयति हस्ती स्थलं मनुष्यान्' इति साक्षात्प्रदर्शनात्, इह स्थलमारोहन्ति मनुष्या इत्यण्यन्तावस्थेति भ्रमित्वा मनुष्यस्थलयोरण्यन्तकर्मत्वकर्तृत्वभावनस्यायुक्तत्वात्, उक्तरीत्या अण्यन्तप्रयोगसंबन्धिकर्मातिरिक्तस्थलरूपकर्मान्वितप्रकृतिकतया अतिप्रसङ्गभङ्गसंभवादिति विस्तरेण प्रथमं निरूपितम् ॥

किंच, इह अणौ यत्कर्म णौ चेदिति वाक्ये दर्शयते भृत्यान् राजेत्युदाहरणानुरोधेन अण्यन्तकर्तृकर्मातिरिक्तकर्मरहितत्वं विवक्षणीयमिति वदद्भिः स्थलमादायातिप्रसङ्गं वारयद्भिः आरोहन्ति हस्तिनं मनुष्या इत्येवाण्यन्तावस्था आश्रिता, न तु स्थलमारोहन्ति मनुष्या इति। एतेन "स कर्तृत्यंशोऽपीह नास्तीत्याद्यपि" प्रत्युक्तम्, उक्तरीत्या अण्यन्तकर्मीभूतहस्तिकर्तृकत्वसत्त्वात् ॥

यदपि— दर्शयते राजा भृत्यानित्युदाहरणानुरोधेन अण्यन्तकर्मकर्त्रतिरिक्तकर्मरहितत्वं परिष्कुर्वतां प्राचां मते मनोरमायां प्रथमप्रघट्टकद्वितीयप्रघट्टकभाष्यविरोधोद्भावनम्, तदपि युक्तिपदवीदवीयः, 'आरोहन्ति हस्तिनं मनुष्या' इत्यण्यन्तावस्थायामादौ अण्यन्तकर्तृकर्मातिरिक्तस्थलरूपकर्मघटिततया अतिप्रसङ्गभङ्गस्य प्रथमप्रघट्टक-

णेरणौ यत् कर्म णौ चेत् १७ स कर्ताऽनाध्याने

भाष्यतात्पर्यविषयतया तद्विरोधाभावात् । 'कर्मकर्तृत्वात्सिद्धम्' इत्यस्य 'लावयते केदार' इति यत्किंचिदुदाहरणान्यथासिद्धिमात्रोपष्टम्भेन प्रणालिकया विध्यर्थं सूत्रमिति प्रतिपादयितुं प्रवृत्तिरिति न तेनापि विरोधः। न हि सर्वोदाहरणान्यथासिद्धिपरता परमतेऽपि संभवति; अध्यारोपितप्रेषणपक्षघटकतृतीयकक्ष्याया अकर्मकत्वे समानधातौ कर्मस्थक्रियया तुल्यक्रियस्य कर्तुरभावेन कर्मवद्भावाभावात्, अजां ग्रामं नयति, अजा ग्रामं नयति, अजया ग्रामं नाययति, अजा ग्रामं नाययते इति निवृत्तप्रेषणचतुर्थकक्ष्यायाः सकर्मकत्वेन कर्मवद्भावाविषयत्वाच्च तत्र समानक्रियत्वाण्यन्तकर्मकर्तृकत्वसत्त्वेन परमते एतत्सूत्रसंभवात् । दर्शयते भृत्यान् राजेत्युदाहरणस्य कर्मवद्भावाविषयतया सूत्रोदाहरणतया न तृतीयप्रवट्टकविरोधोऽपि ॥

यत्तु—प्रत्युदाहरणदौर्लभ्यं स्यादिति, तदपि समनन्तरनिरूपितरीत्या अण्यन्तकर्तृकर्मातिरिक्तस्थलरूपकर्मघटितप्रत्युदाहरणसौलभ्यान्निरस्तम् ॥

इदं चिन्त्यम्—इत्थं सूत्रार्थं वर्णयतां के प्रमादा इत्याशङ्कायाम् अष्टावित्याहुः—आरोहयमाणो हस्ती स्थलमारोहयति मनुष्यानित्यत्र आरोहन्ति स्थलं मनुष्या इत्यण्यन्तावस्थेति भ्रान्त्या अण्यन्तकर्मकर्तृकत्वमेवात्र नास्तीति कथनं प्रथमः प्रमादः, आरोहन्ति हस्तिनं मनुष्या इत्यण्यन्तावस्थायाः सिद्धान्तासिद्धत्वात् । तथा "अणौ यत्कर्म णौ चे"दिति वाक्ये कर्मपदस्य क्रियापरत्वेन व्याख्यानं द्वितीयः, कारकपरतायाः सिद्धान्तसिद्धत्वात् । तथा "स कर्ते"ति वाक्ये सर्वं पूर्ववाक्यमनुवर्त्य शब्दाधिकाराश्रयणं तृतीयः, भाष्ये णावित्येवानुवृत्तेरुक्तत्वेन सर्वपूर्ववाक्यानुवृत्तेर्विरुद्धत्वात् गौरवपराहतत्वात् । दर्शयते भृत्यान्

राजेति भाष्योदाहरणप्रामाण्यात् पूर्वविप्रतिषेधाश्रयणं चतुर्थः, दर्शयते भृत्यान् राजेत्युदाहरणस्य अध्यारोपितप्रेषणपक्षाद्वितीय-कक्ष्यात्वेन अणावकर्मकत्वाभावेन तदप्राप्तेः। तथा भाष्यरीत्या एल-त्सूत्रेण तत्रात्मनेपदस्यावश्यकत्वेऽपि अध्यारोपितप्रेषणपक्षाद्वितीय-कक्ष्यायां परस्मैपदप्रयोगः पञ्चमः। दर्शयते भृत्यान् राजेत्यत्र भृत्या-नित्यस्याविवक्षाकथनं षष्ठः, सकर्मकाणामप्येतत्सूत्रविषयत्वात्। तथा आरोहयमाणो हस्ती स्थलमारोहयति मनुष्यानित्यत्र मनुष्यरूपकर्मणा अतिप्रसङ्गभङ्गो भाष्याभिमत इति स्वयमाश्रित्य कैयटदूषणं सप्तमः। स्थलमादाय व्यावृत्तेः सर्वाभिमतत्वेन सिद्धान्तपारवेदिनां कैयटादी-नां यथार्थोक्तिषु प्रमादत्वकल्पनम् अष्टमः ॥

यत्तु—"भृत्यादीनां परित्यागाच्छुद्धाभेदपरिग्रहात्। कर्म-वाक्यस्य तादर्थ्याश्रयणान्निस्तरेत्सुधीः" ॥ इति। अत्रेदं वक्तव्यम्—
दर्शने साधनं कर्म स्वीकर्तव्यं मनीषिभिः। व्यावृत्तिश्चापि वक्तव्या प्रकृतिप्राप्तकर्मणः ॥ नाशुद्धं वेदविज्ञानं प्रमाणपथमृच्छति। सिद्धा-न्तरीतिरुक्तानुस्त्रियतां तत्त्वतस्ततः ॥९॥

तथा च अण्यन्तकर्मातिरिक्तकर्मरहितप्रकृतिकाण्यन्तकर्मकर्तृ-कानाध्यानार्थकण्यन्ताव्यवहितोत्तरवृत्ति लकारत्वमुद्देश्यतावच्छेदकीकृत्य आत्मनेपदविधानमिहेति सिद्धम् ॥

भट्टोजिदीक्षितमहागजेन विनिपीडितः।
भाष्यस्वरससिंहेन कैयटोऽयं विमोचितः ॥१०॥

इति गजपूत्रवादार्थे परमतनिराकरणं नाम द्वितीयः परिच्छेदः ॥

इति श्रीशैलकुलतिलकेन श्रीनिवासाचार्यचरणारविन्दमधुव्रतेन सर्वतन्त्रस्वतन्त्रेण सुरपुरग्रामाभिजनेन श्रीवेङ्कटाचार्येण विरचितो गजसूत्रवादार्थः समाप्तिमगमत् ॥

॥ श्रीः ॥

शास्त्रपूर्वकप्रयोगस्याभ्युदयसाधनत्वमभ्यधायि— 'शास्त्रपूर्वके प्रयोगे' इति, 'एकः शब्द' इति च । न च स्वादीनामपरिज्ञायार्थविशेषं तदन्तशब्दानर्थे प्रयोक्तुमीश्महे । अर्थविशेषप्रतीत्युद्देशप्रयुक्तो हि शब्दप्रयोगः । अतस्तेषामर्थविशेषव्यवस्थां दर्शयितुं प्रकरणमारभते—

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ॥

ननु स्वार्थद्रव्यलिङ्गसंख्याकारकाणां पञ्चानामपि प्रातिपदिकार्थत्वात् लिङ्गादिग्रहणमनर्थकमत आह— नियतेति । नियमो व्याप्तिः । निरूपकत्वेन तद्वती सव्याप्तिकेत्यर्थः । प्रकरणाच्च प्रातिपदिकनियतेति लभ्यते । नित्यप्रातिपदिकव्यापकत्वं चानियतोपस्थितेर्न संभवतीति प्रातिपदिकोपस्थितिव्यापकत्वं विवक्षितम्; तच्च यदा यत्प्रातिपदिकोपस्थितिस्तत्कालघटितं ग्राह्यम् । तथा च तत्प्रातिपदिकनिरूपिततदर्थग्रहसंबद्धोद्बुद्धसंस्कारसध्रीचीनतत्प्रातिपदिकोपस्थितिनिष्ठकालिकसंबन्धावच्छिन्नव्याप्यतानिरूपितकालिकसंबन्धावच्छिन्नव्यापकताश्रयोपस्थितिविषयस्तत्प्रातिपदिकार्थ इति निष्कर्षः ॥

एतेन प्रातिपदिकार्थोपस्थितेरगृहीतसंगतिकप्रातिपदिकोपस्थित्यव्यापकत्वेऽपि न क्षतिः । न वा भगवदुपस्थितेर्द्वैपायनादिविषयक-

संगतिग्रहजनितसंस्कारसचिवकृष्णप्रातिपदिकोपस्थित्यव्यापकत्वेऽपि नारायणादिप्रातिपदिकानिरूपितभगवद्विषयकशक्तिज्ञानजनितसंस्कारोद्बोध-सहकृतकृष्णप्रातिपदिकोपस्थित्यव्यापकत्वेऽपि भगवतः कृष्णप्रातिपदिकार्थत्वक्षतिः। तत्प्रातिपदिकजन्यत्वं च व्यापकोपस्थितौ विशेषणीयम्; नातः कृष्णप्रातिपदिकोपस्थितिव्यापकभगवन्निष्ठनित्योपस्थितिविषयगगनादेः कृष्णप्रातिपदिकार्थत्वापत्तिः। अत्र च क्रमिकयोः प्रातिपदिकतदर्थोपस्थित्योरेकक्षणान्तर्भावेण यदा प्रातिपदिकोपस्थितिस्तदार्थोपस्थितिरिति सामानाधिकरण्यसंभवात् द्वित्रादिक्षणावच्छेदेन न व्याप्तिर्ग्राह्या। कालिकसंबन्धनिवेशाच्च यत्र देवदत्तादौ तटादिप्रातिपदिकोपस्थितिस्तत्र पुंस्त्वाद्युपस्थितिरिति दैशिकव्याप्तिसत्त्वेऽपि न पुंस्त्वादेर्नियतोपस्थितिकत्वापत्तिः॥

ननु कृष्णप्रातिपदिकस्यानेकार्थत्वेऽपि सर्वेषां यथा नियतोपस्थितिकत्वम्, तथा लिङ्गस्य किं न भविष्यति?

न च तत्तत्प्रत्ययसमभिव्याहारे तत्तल्लिङ्गस्य बोधकतया न किमपि लिङ्गं ततो नियतोपस्थितिकमिति वाच्यम्, पराशरसुतः कृष्ण इति पदान्तरसमभिव्याहारे द्वैपायनस्यैव प्रतीतिरिति भगवतोऽपि कृष्णप्रातिपदिकनियतोपस्थितिकत्वानापत्तेः॥

न च तत्र भगवतोऽप्युपस्थितिरस्त्येव; शाब्दबोधाविषयत्वं तु अयोग्यतानिश्चयेन प्रतिबन्धादिति वाच्यम्, प्रकृतेऽप्युपस्थितस्यैव पुंस्त्वस्य लिङ्गान्तरावरुद्धे अयोग्यतानिश्चयादेव शाब्दबोधाविषयत्वमित्यस्यापि सुवचत्वात्॥

न च तुल्यमुपस्थितयोर्लिङ्गयोरेकतरेण प्रथममवरोधः पश्चा-

दितरस्यान्वयायोग्यत्वमित्यत्र विनिगमनाविरह इति वाच्यम्, द्योतकप्रत्ययसमवधानस्यैव विनिगमकत्वात् ॥

न च द्योतकसमवधानमुपस्थितेरेव नियामकं न शाब्दबोधस्येति वाच्यम्, पदान्तरसमभिव्याहारस्यापि तादृशत्वसंभवेन भगवतोऽप्यनियतोपस्थितिकत्वापत्तेः ॥

न चान्तरेणापि पदान्तरसमभिव्याहारमर्थोपस्थितेर्दर्शनान्न तस्य तत्रोपयोग इति वाच्यम्, 'तटभुवि यमुनाया' इत्यादौ अन्तरेणापि द्योतकसमवधानं लिङ्गोपस्थितिदर्शनेन तस्य तत्राकिंचित्करत्वात् ॥

न च तटादिशब्दानामकारान्तानां न पुंस्त्वादिबोधकता अवच्छेदकतातुल्यत्वेन तटं तटीत्यादावपि शाब्दबोधापत्तेः; किंतु विसर्गादिविशिष्टानामेव । तथा च तत्र लिङ्गस्य पाक्षिकोपस्थितिकत्वमेव नास्तीति कुतो नियतोपस्थितिकत्वमिति वाच्यम्, तथा सति तटमित्यादौ लिङ्गस्य प्रातिपदिकजन्योपस्थितिविषयत्वाभावादेव लिङ्गग्रहणस्य सप्रयोजनत्वे नियतोपस्थितिकत्वपर्यन्तानुधावनस्य वैयर्थ्यापत्तेः । विसर्गमकारेकारादिवर्णान्ततटादिशब्दजनिततटगतपुंस्त्वाद्युपस्थितिषु परस्परव्यभिचारवारणाय स्वाव्यवहितोत्तरताया एव सामान्यसामग्र्याः प्रतिबन्धकत्वाभावविशिष्टायाश्च फलाधायकतया विसर्गादिसमवधानस्य पुंस्त्वादिबोधं प्रति विशेषसामग्रीत्वकल्पनेन वा अमादिसमवधानस्य प्रतिबन्धकत्वकल्पनेन वा तटमित्यादौ पुंस्त्वादिबोधानापत्तिः । अनादि तटं तटानीत्यादौ प्रातिपदिकस्याक्लीबत्वे क्लीबात्परत्वनिबन्धनयोर्लुगमादेशयोः क्लीबत्वनिबन्धनस्य च नुमोऽप्रवृत्तिप्रसङ्गात्, तटानीत्यादौ शिभावे सति तदन्तस्य क्लीबताबोधकत्वं तद्बोधकतानि-

बन्धनश्च शिभाव इत्यन्योन्याश्रयात्, शास्त्रस्य सिद्धस्वरूपान्वाख्यानपरत्वेनोत्पत्तौ तदभावे ज्ञप्तौ च तद्ध्रौव्यात् । 'प्रतीरं च तटं त्रिषु' इति प्रातिपदिकमात्रस्य त्रिलिङ्गताबोधकानुशासनविरोधात्, 'तृतीयादिषु भाषितपुंस्कम्—' इत्यादौ प्रातिपदिकस्यैव लिङ्गबोधकताया अवश्याश्रयणीयत्वात्, अन्यथा अनादये इत्यादेरेव पुंस्त्ववाचकत्वेन तस्यानिगन्तत्वादक्लीबत्वाच्चासांगत्यापत्तेः, 'अर्धर्चाः पुंसि च' इति प्रातिपदिकमात्रस्य लिङ्गद्वयबोधकत्वानुशासनात् ॥

न च 'स्वमोर्नपुंसकात्' इत्यादिषु सर्वत्र नपुंसकबोधकसमुदायघटकत्वमेव नपुंसकत्वं प्रातिपदिकस्येति न दोष इति वाच्यम्, श्रीपमित्यादिषु श्रीशब्दस्य नपुंसकह्रस्वापत्तेः ॥

न च स्वघटितसमुदायबोध्यनपुंसकत्वाश्रयत्वं नपुंसकत्वम्; श्रीपमित्यादौ च न श्रीशब्दार्थस्य नपुंसकत्वाश्रयत्वमिति वाच्यम्, श्रीप्रमेयमित्यादौ तस्यापि सुलभत्वात् ॥

न च तादृशनपुंसकत्वान्वयितावच्छेदकप्रवृत्तिनिमित्तकत्वं तत्; श्रीप्रमेयमित्यादौ च श्रीरूपप्रमेयत्वमेव तदन्वयितावच्छेदकम्, न तु श्रीत्वमिति न श्रीशब्दस्य नपुंसकह्रस्वत्वापत्तिरिति वाच्यम्, देवतापूजनोद्युक्तदैवतानीत्यादौ नपुंसकान्वयितावच्छेदकदैवतत्वाभिन्नदेवतात्वप्रवृत्तिनिमित्तकदेवताशब्दस्यापि नपुंसकह्रस्वत्वापत्तेः । न हि दैवतत्वदेवतात्वयोर्घटत्वकलशत्वयोरिव तुल्यव्यक्तिकयोर्नीलत्वोत्पलत्ववद्भेदोऽस्ति; तथा सति दैवतदेवतयोर्भिन्नप्रवृत्तिनिमित्तकत्वेन नीलोत्पलादिवत्सहप्रयोगापत्तेः । सर्वेष्वप्येतेषु पक्षेषु पूर्वोक्तज्ञप्त्यन्योन्याश्रयतादवस्थ्यात्, लोकप्रसिद्धनपुंसकत्वविलक्षणनपुंसकत्वनिर्वचनस्य

'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' इत्यादिभाष्यादिविरुद्धत्वात्, सर्वत्र लिङ्गस्य प्रातिपदिकबोध्यत्वोपपत्तौ क्वचित्समुदायबोध्यत्वेन वैरूप्यानुपपत्तेः, अनादिने तटायेत्यादौ वाचकतावच्छेदकानुपूर्व्यास्तुल्यत्वेन त्वत्पक्षेऽपि पुंस्त्वादिबोधापत्तेर्दुर्वारत्वात्, समभिव्याहारविशेषादनुपस्थितिः शाब्दबोधाविषयत्वं वेति कल्पस्य परस्यापि समानत्वात्। तस्माल्लाघवादवैरूप्यान्निर्दुष्टत्वाच्चानियतलिङ्गस्थलेऽपि लिङ्गस्य प्रातिपदिकबोध्यत्वात् विशेषसामग्रीप्रतिबन्धकाभावादिघटिततत्तत्प्रातिपदिकोपस्थितिव्यापकोपस्थितिकत्वाच्च कथं तस्य प्रातिपदिकार्थत्वाभाव इति चेत्, अत्राभिधीयते— तत्प्रातिपदिकजन्योपस्थितिनिष्ठतत्प्रवृत्तिनिमित्तविषयिताव्यापकविषयिताकत्वं तत्प्रवृत्तिनिमित्तकतत्प्रातिपदिकनियतोपस्थितिकत्वम्। भवति चेदं नियतोपस्थितिकत्वं कृष्ण इत्यादौ पुंस्त्वस्य, कृष्णप्रातिपदिकजन्योपस्थितिनिष्ठाया नारायणत्वैकार्थसमवेतकृष्णत्वविषयितायाः पुंस्त्वविषयिताव्याप्यत्वात्। तटमित्यादौ तटप्रातिपदिकजन्योपस्थितिनिष्ठतटत्वविषयितासमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकस्वविषयितात्वकत्वात् पुंस्त्वादेर्न नियतोपस्थितिकत्वप्रसक्तिः। दैवतप्रातिपदिकजन्योपस्थितिनिष्ठदैवतत्वविषयिताया देवतात्वविषयिताभिन्नतया तदव्यापकत्वात्स्त्रीत्वविषयितायाः स्त्रीत्वस्यानियतोपस्थितिकत्ववारणाय तत्प्रातिपदिकजन्योपस्थितिनिष्ठेति तत्प्रवृत्तिनिमित्तविषयिताया विशेषणम्। निरूपकाभेदेऽपि आश्रयभेदेन विषयिताभेदात् देवताप्रातिपदिकजन्योपस्थितिनिष्ठदेवतात्वविषयिताव्यापकत्वमेव स्त्रीत्वविषयितायाः। यदि चाश्रयभेदेऽपि निरूपकाभेदमात्रेण विषयितैक्यम्, तदा तत्प्रातिपदिकजन्योपस्थितिवृत्तित्वविशिष्टतत्प्रवृत्तिनिमित्तविषयिताव्यापकत्वं बोध्यम्। कृष्ण-

प्रातिपदिकजन्योपस्थितिनिष्ठपाञ्चालीत्वसमानाधिकरणप्रवृत्तिनिमित्तविषयित्वाव्यापकत्वात् पुंस्त्वादिविषयितायास्तत्राव्याप्तिरिति तद्वारणाय— तत्प्रवृत्तिनिमित्तविषयितेति । तत्प्रातिपदिकजन्योपस्थितिनिष्ठतटत्वविषयितासमानाधिकरणपुंस्त्वादिवारणाय— व्यापकेति । अभेदेऽपि व्याप्यव्यापकभावात्प्रवृत्तिनिमित्ते नाव्याप्तिः ॥

तत्प्रातिपदिकजन्योपस्थितिनिष्ठस्वविषयित्वानतिरिक्तवृत्तितत्प्रवृत्तिनिमित्तविषयिताकत्वं वा तत्प्रवृत्तिनिमित्तकतत्प्रातिपदिकनियतोपस्थितिकत्वम् । व्यावृत्तिश्च पूर्ववत् ॥

अथवा स्वसामानाधिकरण्यस्वाभावसामानाधिकरण्योभयसंबन्धेन स्वविशिष्टतत्प्रातिपदिकजन्योपस्थितिनिष्ठतत्प्रवृत्तिनिमित्तविषयिताकान्यत्वं तत्प्रवृत्तिनिमित्तकतत्प्रातिपदिकजन्यनियतोपस्थितिकत्वम् । स्वं तटादिप्रातिपदिकबोध्यपुंस्त्वादिविषयिता निरुक्तोभयसंबन्धेन तद्विशिष्टा या तटत्वरूपप्रवृत्तिनिमित्तविषयिता तादृशविषयिताकं तटोपस्थाप्यं पुंस्त्वादि तदन्यत्वं च कृष्णशब्दोपस्थाप्यपुंस्त्व इति तस्य नियतोपस्थितिकत्वम् । स्वरूपतः पुंस्त्वादेरभिन्नत्वेऽपि तत्तत्प्रातिपदिकोपस्थाप्यत्वेन भिन्नत्वान्न क्षतिरिति दिक् ॥

इति प्रातिपदिकार्थसूत्रवादार्थः समाप्तः ॥

॥ श्रीः ॥

फणिग्रामणिवाग्गुम्भप्राणनाडयदुक्तये ।
कवये शब्दकौमुद्याः कर्त्रे गुरवे नमः ॥

ननु 'आदिरन्त्येन सहेता' इति सूत्रेण प्रत्याहारग्रहणे मध्यमत्वाविशेषात् इकारादिवत् 'ऋलृक्' इति ककारस्याप्यच्संज्ञा स्यात् । तथा च दधि करोतीत्यादौ यणादिकं स्यादिति चेत्, अत्र वार्तिकम्—'आचारादप्रधानत्वाल्लोपश्च बलवत्तरः ॥' इति । तथा चाचार्यस्य पाणिनेः आचारात् व्यवहारात् अनुबन्धानां ग्रहणं नास्तीति प्रथमा युक्तिः । अत्र पाणिनेर्व्यवहारः कैयटेन प्रदर्शितः; यथा—"तृषिमृषिकृषेः काश्यपस्येति निर्देशः । अत्र ककारे परे इकारस्य यणादेशाकरणेन ककारस्यानुबन्धस्य अच्प्रत्याहारेऽन्तर्भावो नास्तीति प्रथमा युक्तिरिति ॥

यत्त्वत्र सिद्धान्तकौमुद्यामुक्तम्—'अनुनासिक इत्यादिनिर्देशात् । न ह्यत्र ककारे परेऽच्कार्यं दृश्यते' इति, तदयुक्तम्; तथा हि—किं णासृधातोः 'ण्वुल्तृचौ' इति ण्वुलि 'क्वुन् शिल्पिसंज्ञयोः' इति क्वुनि वा अकादेशे टापि 'प्रत्ययस्थात्—' इति इत्वे नासिकाशब्दव्युत्पत्तिराश्रीयते; 'णासृ शब्दे' इत्यस्मात् 'गुरोश्च हलः' इत्यप्रत्यये टापि ततः संज्ञायां कनि टापि 'प्रत्ययस्थात्—' इति इत्वे नासिकाशब्दव्युत्पत्तिराश्रीयते? न तावत्प्रथमव्युत्पत्त्याश्रयणे अच्कार्यप्रसक्तिः, 'प्रत्ययस्थात्—' इति इत्वविधानसामर्थ्यादेव यणादेशाप्रसङ्गात् । यदीदानीं ककारे परे इकारस्य यणादेशः स्यात्, तदा लाघवात् 'प्रत्ययस्थात्कात्पूर्वस्य यत आप्यसुपः', इति यकारमेव विदध्यात् । नापि द्वितीयव्युत्पत्त्याश्रयणे अच्कार्यप्रसक्तिः; किमत्र अच्कार्यमभिमतम्—यणादेशः, उत 'यस्येति च' इति लोपः? न तावदाद्यः; दत्तोत्तरत्वात्, 'वार्णादाङ्गं बलीयः' इति 'यस्येति च' इति लोपविषये यणादेशाप्रसङ्गाच्च । नापि द्वितीयः, अन्तरङ्गे 'यस्येति च' इति लोपे कर्तव्ये बहिर्भूतटाबपेक्षत्वेन बहिरङ्गस्य 'प्रत्ययस्थात्—' इति

इत्वस्यासिद्धत्वात् ॥

नन्वेवमपि 'यस्येति च' इति लोपे अजानन्तर्याश्रयणात् 'नाजानन्तर्ये—' इति निषेधात्कथमिह"असिद्ध"परिभाषायाः प्रवृत्तिः ?

न च 'यचि भम्' इत्यत्र अजानन्तर्यम्, न तु 'यस्येति च' इत्यत्रेति वाच्यम्, संज्ञापरिभाषयोः कार्यकालतया अजानन्तर्याश्रयणस्य सुवचत्वादिति चेत्, न; "यथोद्देशपक्षमाश्रित्य 'यस्येति' इत्यत्र अजानन्तर्यं नास्तीति स्वीकारेण तस्मिन् कर्तव्ये 'प्रत्ययस्थात्—' इति इत्वस्यासिद्धत्वादिकारस्य नाच्कार्यप्रसक्तिरिति 'अनुनासिक' इति निर्देशस्योपपत्तिसंभवेन ककारस्य अच्प्रत्याहारेऽनुबन्धानां ग्रहणाभावज्ञापकताया वक्तुमशक्यत्वात्, एवमपि 'यस्येति च' इति लोपे 'नाजानन्तर्ये—' इति निषेधस्याप्रसक्तेः; न हि 'यस्येति च' इति लोपे अचोरानन्तर्यमाश्रीयते; कयोः पुनस्तर्हि? इवर्णावर्णान्ताङ्गस्य अजाद्यसर्वनामस्थानस्वादिप्रत्ययस्य चानन्तर्यमाश्रीयते। 'नाजानन्तर्ये—' इत्यत्र 'प्रधानाप्रधानयोः प्रधाने कार्यसंप्रत्ययः' इति यत्र प्राधान्येन अचोरानन्तर्याश्रयणम्, तत्रैव निषेधो न्याय्यः ॥

अपि च 'षत्वतुकोरसिद्धः' इत्यत्र तावत् किंचिन्निरूप्यते— तत्र अधीत्येत्युदाहरणे संहिताधिकारीयस्य सवर्णदीर्घस्य दर्शनात् संहिताधिकारीये कार्ये कर्तव्ये 'नाजानन्तर्ये—' इति निषेधः, नान्यत्रेति परिभाषावृत्तौ स्थितम्। ततश्च 'यस्येति च' इति लोपे कर्तव्ये 'नाजानन्तर्ये—' इति निषेधाभाव एव। एतेन कोऽसिचदित्यत्र 'इण्कोः' इति षत्वविधौ इणा एकेन अजानन्तर्याश्रयणमपि अजानन्तर्याश्रयणमिति 'बहिरङ्ग' परिभाषाया अप्रसङ्गात्कृतं षत्वग्रहणं कैयटमते 'नाजानन्तर्ये—'

इति परिभाषां ज्ञापयतीति कौस्तुभकृतोक्तं प्रत्युक्तम्, षत्वस्य संहिताधिकारीयत्वविरहात् । अपि च "यथोद्देशपक्षे" "बहिरङ्गपरिभाषायां षत्वस्यासिद्धत्वात् षत्वे कर्तव्ये असिद्धत्ववचनम् 'नाजानन्तर्ये—' इति कथं ज्ञापयेत् । कैयटहरदत्तमतयोस्तारतम्यविचारोऽपि कौस्तुभोक्तः; विस्तरभयादेकदेश एवात्र लुलित इति ध्येयम् ॥

न च नासाशब्दात्संज्ञायां कनि इदानीम् 'यस्येति च' इति लोप एवाच्कार्यमिति वक्तुं युक्तम्; परत्वात् 'केऽणः' इति ह्रस्वेन बाधितत्वात्, दाक्षिस्त्यादौ 'यस्येति च' इत्यस्य सावकाशत्वात् ब्रह्मबन्धुकेत्यादौ ह्रस्वस्य सावकाशत्वात् । वस्तुतस्तु क्वचित् 'यस्येति च' इति लोपे क्वचित् 'ओर्गुणः' इति गुणे च प्राप्ते आरभ्यमाणः 'केऽणः' इति ह्रस्वविधिस्तयोरपवाद इति सुवचम् ॥

अथ ह्रस्वानन्तरं नासिकाशब्दे 'आद्गुण' एवाच्कार्यमिति तु दुर्वचम्, 'वार्णादाङ्गम्—' इति 'प्रत्ययस्थात्—' इति इत्वस्य प्रसङ्गात् ॥

न चैतस्यैवेत्वस्य लोप एवाच्कार्यमिति वाच्यम्, तस्यासिद्धत्वाल्लोपस्याप्रसङ्ग इत्युक्तत्वात् ॥

स्यादेतत्— 'वाह ऊठ्' इत्यत्र ज्ञापिताया "असिद्धपरिभाषाया आभीयत्वात्तस्यां कर्तव्यायाम् 'यस्येति च' इति लोपस्यासिद्धत्वादन्तरङ्गाभावात् "असिद्धपरिभाषाया अप्रवृत्त्या 'यस्येति च' इति लोप एवाच्कार्यमिति चेत्, अत्रोच्यते— 'असिद्धवदत्राभात्' इत्यत्र समानाश्रयत्वप्रतिपत्त्यर्थत्वाद् "अत्र" ग्रहणस्य परिभाषाया यस्येति समानाश्रयत्वविरहादसिद्धत्वाप्रसङ्गात् । अत एव 'पशुषो नवाजान्' इत्यत्र पशून्

सन्वन्तीति विग्रहे पशुशब्दे उपपदे सनोतेः 'जनसन—' इति विटि 'विड्वनोः—' इत्यात्वे 'सनोतेरनः' इति षत्वे ततः शसि भत्वे 'आतो धातोः' इति आल्लोपे भसंज्ञानिमित्तप्रत्ययनिमित्तके कर्तव्ये विण्निमित्तकस्य आत्वस्य नासिद्धत्वम् ॥

कथं तर्हि "असिद्धवत्सूत्रे पपुषः पश्येत्यत्र 'आतो लोप इटि च' इत्याल्लोपे कर्तव्ये भसंज्ञानिमित्तस्य बहिरङ्गस्य वसोः संप्रसारणस्य नासिद्धत्वम्," "बहिरङ्गपरिभाषायामाभीयायां कर्तव्यायाम् आभीयस्य संप्रसारणस्यासिद्धत्वात् बहिरङ्गाभावात्परिभाषाया अप्रवृत्तेरिति वृत्तावुक्तमिति चेत्, न; बहिरङ्गस्य संप्रसारणस्य निमित्तस्य शसादेः परिभाषां प्रत्यपि निमित्तत्वमस्तीति समानाश्रयत्वस्य पदमञ्जर्यां व्याख्यातत्वात् ॥

स्यादेतत्— "असिद्धवत्सूत्रे पपुषः पश्येत्यत्र अन्तरङ्गे 'आतो लोपः—' इत्याल्लोपे कर्तव्ये बहिरङ्गस्य संप्रसारणस्यासिद्धत्वं नास्ति, 'नाजानन्तर्ये—' इति निषेधादिति कैयटः; हरदत्तोऽपि तथा; तथा चाप्राधान्येन अजानन्तर्याश्रयणेऽपि संहिताधिकारीयत्वविरहेऽपि 'नाजानन्तर्ये—' इति निषेधप्रवृत्तिरिति 'यस्येति च' इति लोपेऽपि तत्प्रवृत्तेः 'यस्येति च' इति लोपेऽन्तरङ्गे कर्तव्ये बहिरङ्गस्य 'प्रत्ययस्थात्—' इति इत्वस्य नासिद्धत्वमिति चेत्, अत्रोच्यते— 'प्रधानाप्रधानयोः—' इति न्यायविरोधात्, संहिताधिकारीये 'नाजानन्तर्ये' इति निषेध इति परिभाषावृत्तिकाशिकाकारादिविरोधाच्च कैयटहरदत्तवचनमनुपादेयमेवेत्यन्यत्र विस्तरः ॥

अपि च तद्वचनानुरोधेन लोपे कर्तव्ये इत्वस्यासिद्धत्वाभावेऽपि 'केऽणः' इति ह्रस्वेन 'यस्येति च' इति लोपस्य बाधितत्वात् तस्या-

प्रसङ्गात् ककारे परे अच्कार्यविरहात् 'अनुनासिक' इति निर्देशो न ज्ञापक इति सिद्धम् ॥

ननु प्रागेव 'यस्येति च' इति लोपं बाधित्वा 'केऽणः' इत्यस्य प्रवृत्त्या पुनरित्वे प्रवृत्तिर्न भविष्यतीति चेत्, न; 'यस्येति च' इति लोपस्यापि प्रागेव बाधितत्वात्पुनरप्रवृत्तेः ॥

अथ लोपस्य यदि पुनः प्रवृत्तिरङ्गीक्रियते, तर्हि ह्रस्वस्यापि व्यक्तिभेदात्पुनः प्रवृत्तिः स्यात् ॥

न च ह्रस्वस्य ह्रस्वविधाने प्रयोजनाभावः, लोपाभावस्यैव प्रयोजनत्वात्। अत एव 'इकोऽसवर्णे—' इत्यत्र कुमारी अत्र दधि अत्र इत्यादौ दीर्घाणां ह्रस्वानां च ह्रस्वविधानसामर्थ्यादेव प्रकृतिभावे सिद्धे तदनुकर्षणार्थश्चकारो न कर्तव्य इति भाष्ये प्रतिपादितमिति दिक् ॥

इति श्रीरामभद्रदीक्षितकृतः अनुनासिकनिर्देशविचारः समाप्तः ॥

॥ श्रीः ॥

स्थानिवदादेशोऽनल्विधौ ॥

स्थानं=प्रसङ्गः, तदस्यास्तीति स्थानी; स्थानिना तुल्यं स्थानिवत्; उपमेयस्य क्रियात्वे उपमानवाचिनस्तृतीयान्तात् तुल्यमित्यर्थे वतिरित्यर्थकेन 'तेन तुल्यम्—' इति शास्त्रेण वतिः। क्रिययोरुपमानोपमेयभावलाभाय स्थानिपदस्य स्थानिकर्तृकसमभिव्याहृतधातूपात्तसत्ताक्रियायां लक्षणा। वतिः सादृश्यविशिष्टवाची। एवं च स्थानिकर्तृकसत्तासदृशी आदेशकर्तृकसत्तेति बोधः। स्थानिवदित्यनेन आदेशनि-

ष्ठसत्तायां स्थानिनिष्ठसत्तासादृश्यं विधीयते । सादृश्यं च तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम् । एवं च यद्धर्मावच्छिन्ना स्थानिनिष्ठा सत्ता तद्धर्मावच्छिन्ना आदेशनिष्ठा सत्तेति बोधः ॥

न चात्र क्रिययोरुपमानोपमेयभावप्रतीत्या 'ब्राह्मणवदधीते क्षत्रियः' इत्यादौ ब्राह्मणकर्तृकाध्ययननिष्ठसौष्ठवादिधर्मस्य क्षत्रियकर्तृकाध्ययन-क्रियायामतिदेशप्रतीतावपि अध्येतृब्राह्मणनिष्ठकौण्डिन्यत्वादेः क्षत्रिये अतिदेशाभाववत् स्थानिनिष्ठसत्तासदृशी आदेशनिष्ठा सत्तेति बोधेन आदेशसत्तायां स्थानिसत्तासाजात्यप्रतीतावपि आदेशे स्थानिनिष्ठसुप्त्वादे-रतिदेशो दुर्लभ इति वाच्यम्, तत्र सामानाधिकरण्येन स्वाश्रयगतकौ-ण्डिन्यत्वादिरूपधर्मातिदेशमन्तरापि अध्ययननिष्ठसौष्ठवादिरूपधर्माति-देशेनैव वचनस्य चारितार्थ्यसंभवेऽपि प्रकृते सत्तासमानाधिकरणधर्मा-तिदेशमन्तरा सत्तासाजात्यातिदेशे फलाभावेन स्थानिसत्ता सामानाधि-करण्येन यद्धर्मावच्छिन्ना आदेशसत्तापि तेन संबन्धेन तद्धर्मावच्छिन्नेति बोधेन सामानाधिकरण्येन सत्ताश्रयस्थानिगतधर्मस्य आदेशसत्तायाम-प्यारोपेणादोषात् । एवं च स्थानिनिष्ठा अलनल्साधारणा ये ये धर्मा-स्तत्तत्कार्यप्रयोजकीभूताः, तेषां धर्माणामादेशेऽतिदेश इति फलितम् ॥

विधीयत इति विधिः, अलो विधिरिति षष्ठीतत्पुरुषः; अल्सं-बन्धिकार्ये स्थानिवन्नेत्यर्थः । यद्यपि सूत्रे 'अनल्विधौ' इति सामा-न्यतः श्रवणात् अल्सामान्यप्रयोज्यकार्यमात्रे निषेधः प्रतीयते; तथा-पि यथा 'गुरुवद्गुरुपुत्रे वर्तितव्यमन्यत्रोच्छिष्टभोजनात्' इति विधौ संनिधानादतिदेशप्रापितगुरुत्वप्रयोज्योच्छिष्टभोजनस्यैव निषेधः, न तु गुरुपुत्रस्यापि स्वतो गुरुत्वेन प्राप्तस्योच्छिष्टभोजनस्यापि, तथा इहापि संनिधानादतिदेशप्रापितालवृत्तिधर्मप्रयोज्यकार्यस्यैव निषेधः, न तु स्वाश्र-

याल्वृत्तिधर्मप्रयोज्यकार्यस्यापि; तेन रामायेत्यादौ दीर्घस्य स्वाश्रयाल्वृत्तिधर्मप्रयोज्यत्वेऽपि स्थान्यल्वृत्तिधर्मप्रयोज्यत्वाभावान्न निषेधः ॥

ननु 'गुरुवद्गुरुपुत्रे वर्तितव्यम्' इत्यत्र 'तत्र तस्येव' इति वतेः प्रवृत्त्या गुरूद्देश्यकं देवदत्तसमवेतं यत् वर्तनम्, तत्सदृशं गुरुपुत्रोद्देश्यकं देवदत्तसमवेतं वर्तनमिति बोधेन गुरूद्देश्यकवर्तनसाजात्यस्य गुरुपुत्रोद्देश्यकवर्तने लाभेऽपि गुरुवृत्तिगुरुत्वादिधर्मस्यैव तत्रानतिदेशवत् अत्रापि स्थानिधर्मस्यैवादेशेऽतिदेशानापत्त्या प्रकृतार्थासिद्धिरिति चेत्, न; समवायोद्देश्यत्वोभयघटितसामानाधिकरण्येन गुरुत्ववैशिष्ट्यस्यैव गुरुपुत्रोद्देश्यकव्यापारे अतिदेशेन दृष्टान्तस्य सूपपादत्वात् ॥

न च दृष्टान्ते उपमेयभूतगुरुपुत्रसंबन्ध्युच्छिष्टभोजनस्य निवृत्तिवत् दार्ष्टान्तिकेऽपि उपमेयभूतादेशसंबन्ध्यल्प्रयोज्यकार्यस्यैव निषेधः स्यादिति रामायेत्यादौ दोष इति वाच्यम्, दृष्टान्ते उपमानभूतदेवदत्तादिनिष्ठगुरुत्वातिदेशप्रयोज्यस्यैव उच्छिष्टभोजनस्य निषेधवत् अत्राप्युपमानभूतस्थानिनिष्ठाल्वृत्तिधर्मातिदेशप्रयोज्यकार्यस्यैव निषेधात् दृष्टान्ते गुरुपुत्रनिष्ठानतिदिष्टगुरुत्वप्रयोज्योच्छिष्टभोजनस्येवोपमेयभूतादेशगतानतिदिष्टाल्वृत्तिधर्मस्याप्यनिवृत्त्या अदोषात् ॥

ननु 'अनल्विधौ' इत्यत्र सप्तम्याः प्रयोजकत्वार्थकतया अल्सामान्यप्रयोज्यकार्यप्रयोजकस्य स्थानिनिष्ठधर्मस्यादेशे अतिदेशो नेति निषिध्यते; न तु स्थानिभूतो योऽल् स्थानिसंबन्धी वा योऽल् तत्प्रयोज्यकार्ये इति, अलः स्थानिसंबन्धित्वस्य शब्दतोऽलाभात्;

न च संनिधानादतिदिष्टगुरुत्वप्रयोज्यस्यैवोच्छिष्टभोजनस्य निषेधवत् अत्राप्यतिदिष्टाल्वृत्तिधर्मप्रयोज्यस्यैव कार्यस्य निषेधः, न तु

स्वाश्रयाल्वृत्तिधर्मप्रयोज्यकार्यस्यापीति वाच्यम्, यथा उच्छिष्टभोजनस्य उपमानभूतदेवदत्तादिनिष्ठगुरुत्वातिदेशप्रयोज्यता, तथेहाप्यादेशे अलसंबन्धिकार्यस्योपमानभूतस्थानिनिष्ठसुप्त्वादिरूपधर्मातिदेशप्रयोज्यतेति तयोर्वैषम्याभावात्। तथा च रामायेत्यादौ अतिदिदिक्षितसुप्त्वस्य आदेशसंबन्ध्यल्प्रयोज्यकार्यप्रयोजकत्वेन अतिदेशनिषेधेन दीर्घानापत्तिरिति चेत्, न; अतिदेशस्य स्वभावतः कार्यार्थत्वेन स्थानिनिष्ठधर्मसामान्यप्रयोज्ये कार्ये कर्तव्ये तत्प्रयोजकस्य स्थानिधर्मसामान्यस्यातिदेशे प्राप्ते अल्वृत्तिधर्मप्रयोज्यकार्यप्रयोजकस्थानिधर्मस्यातिदेशो नेत्युक्तिभङ्ग्या प्रयोजकत्वेन स्ववाक्योपात्ताल्वृत्तिधर्मस्यैव निषेधप्रतीत्या निषिध्यमानस्थानिधर्मस्यापि अल्वृत्तित्वस्यार्थतः सिद्धेः। किंच स्थानिनिष्ठधर्मप्रयोज्यकार्ये कर्तव्ये स्थानिधर्मस्यातिदेशे प्राप्ते अल्वृत्तिधर्मप्रयोज्ये कार्ये स्थानिधर्मस्यातिदेशो नेति निषेधेन पूर्ववाक्येन कार्यप्रयोजकत्वेनोपस्थितस्थानिधर्म एव कार्यप्रयोजकीभूताल्वृत्तिधर्मत्वेन गृह्यते, प्रत्यासन्नत्वात्। एवं च स्थानिनिष्ठालनल्साधारणधर्मप्रयोज्यकार्ये कर्तव्ये पूर्ववाक्येन तत्प्रयोजकस्थानिनिष्ठधर्मसामान्यस्यातिदेशे प्राप्ते स्थानिनिष्ठाल्वृत्तिधर्मप्रयोज्ये कार्ये कर्तव्ये तत्प्रयोजकस्याल्वृत्तिधर्मस्यातिदेशो नेति फलितम्॥

नन्वेवमपि प्रदीव्येत्यत्र वलादित्वरूपधर्मातिदेशो दुर्वारः, वलादित्वस्य स्थान्यल्वृत्तित्वाभावात् स्थान्यवयवीभूततकारवृत्तिवलत्वस्य स्थानिवृत्तित्वाभावात्;

न चावयवावृत्तिनः समुदायवृत्तित्वासंभवात् समुदायवृत्तिवलादित्वस्य अल्वृत्तित्वमपि सुलभमिति वाच्यम्, तथा सति हन्तित्वादेरपि अल्धर्मत्वापत्त्या सूत्रस्यैव वैयर्थ्यापत्त्या अल्वृत्तिपदेन अलत्वव्या-

प्यधर्मस्यैव ग्रहीतव्यतया वलादित्वस्यातथात्वेन निषेधाप्रवृत्तेरिति चेत्, न; सूत्रे 'अनल्विधौ' इत्युक्तेऽपि षष्ठ्यन्तार्थस्य संबन्ध्यन्तरसाकाङ्क्षत्वेन विधावित्यस्याध्याहारेण अल्संबन्धिविधावित्यर्थे लब्धे पुनर्विधिग्रहणसामर्थ्येन प्रधानाप्रधानन्यायं बाधित्वा यथाकथंचिदलाश्रयेऽपि कार्ये निषेधप्रवृत्तिज्ञापनेन वलादित्वस्याल्त्वव्याप्यत्वाभावेऽपि तद्घटकाल्त्वव्याप्यवल्त्वस्य इडागमप्रयोजकत्वेन तत्रापि निषेधप्रवृत्तेः सूपपादत्वात् ॥

न च वल्त्वस्य स्थानिधर्मत्वाभावेन आदेशे वल्त्वातिदेशस्याप्रसक्ततया कथंचिदतिदेशेऽपि तस्य कार्यप्रवृत्त्यप्रयोजकतया च कथं तन्निषेध इति वाच्यम्, विधिग्रहणसामर्थ्येन स्थानिनिष्ठाल्त्वव्याप्यधर्मस्यैव स्थानिनिष्ठः अल्त्वव्याप्यधर्मघटितो यो धर्मस्तत्प्रयोज्यकार्ये कर्तव्ये तत्प्रयोजकीभूततादृशस्थानिधर्मस्याप्यतिदेशनिषेधेनादोषात् ॥

न च अल्पदस्य अल्त्वव्याप्यधर्मावच्छिन्नपरतया साक्षात् परंपरया वा तत्प्रयोज्यकार्ये कर्तव्ये साक्षात्तत्प्रयोजकस्य अल्वृत्तिधर्मस्यैव परंपरया प्रयोजकस्य स्थानिनिष्ठाल्वृत्तिधर्मस्याप्यतिदेशनिषेधेऽपि अल्वृत्तिधर्मघटितधर्मावच्छिन्नस्य सौत्राल्पदेन शब्दमर्यादया अलाभेन तस्य स्थानिगतत्वेऽपि तन्निषेधो दुर्लभ इति वाच्यम्, विधिग्रहणसामर्थ्येन परंपरया कार्यप्रयोजकीभूतस्याल्वृत्तिधर्मस्य क्वचिदपि स्थानिवृत्तित्वासंभवेन अल्पदेन लक्षणया अल्त्वव्याप्यधर्मघटितधर्मावच्छिन्नस्यापि बोधाङ्गीकारेण तत्प्रयोज्यकार्ये कर्तव्ये तत्प्रयोजकतादृशस्थानिनिष्ठधर्मस्यापि निषेधाङ्गीकारेणादोषात् ॥

न च अतृणेडित्यादौ परंपरया कार्यप्रयोजकीभूतस्य हल्त्वस्य स्थानिगतस्यैव संभवेन तस्यादेशे अतिदेशनिषेधेन तत्र विधिग्रहणस्य

चारितार्थ्येन अलपदस्य लक्षणया उक्तार्थपरत्वेऽपि प्रदीव्येत्यादौ दोष इति वाच्यम्, अतृणेडित्यत्र इमागमस्येष्टत्वेन सिद्धान्ते तत्र निषेध-प्रवृत्तिरूपफलासंभवेन विधिग्रहणस्य ज्ञापकत्वसंभवात् ॥

न च सेदुष इत्यादौ संप्रसारणोत्तरं तस्य स्थानिवत्त्वेन वल्त्वात् प्राप्तेडागमव्यावृत्त्या विधिग्रहणस्य चारितार्थ्यसंभवेन तस्य त्वदुक्त-लक्षणाश्रयणे न ज्ञापकतेति वाच्यम्, आनुमानिकस्थानिवद्भावेन तत्रेट्-प्रवृत्तेर्दुर्वारतया विधिग्रहणवैयर्थ्यस्य दुर्वारत्वात् ॥

किं च 'अदो जग्धिर्ल्यप्ति किति' इत्यत्र ल्यब्ग्रहणेन अल्वृ-त्तिधर्मघटितधर्माश्रयकार्ये कर्तव्ये तत्प्रयोजकस्य तादृशधर्मस्यातिदेशो नेत्यर्थेनादोषात् । एतेन बभूविव अरुदितामित्यादाविडागमस्य स्थान्य-ल्वृत्तिधर्मघटितधर्मप्रयोज्यकार्यत्वेन तस्मिन् कर्तव्ये स्थानिवत्त्वानापत्ति-रिति परास्तम्, अतिदेशप्रवृत्तिप्रयोजकस्य स्थानिनिष्ठधर्मस्य स्थान्य-लसाधारणत्वे अलसाधारणधर्मघटितधर्मत्वे वा स्थानिवत्त्वनिषेधेऽपि वलादित्वस्य स्वनिष्ठत्वेन तस्यातिदेशप्रवृत्तिप्रयोजकत्वाभावेन आर्धधा-तुकत्वस्य तादृशत्वेऽपि तस्याल्वृत्तिधर्मघटितधर्मत्वाभावेन तत्र निषेधाप्रवृत्तेरदोषादिति प्राञ्चः ॥

अत्र नव्याः— 'अनल्विधौ' इत्यत्र अनलिति लुप्तषष्ठीकं पदम् । अलः स्थाने यः आदेशः, स न स्थानिवदिति समन्वयः । स्थानं च प्रसङ्गः; प्रसङ्गश्च आपत्तिरूपं ज्ञानम्; आपत्तिश्च यद्यत्र यण्न स्यात् तर्हि इक् स्यादित्याकारकमाहार्यज्ञानम् । परिभाषोपस्थित-स्थानपदोत्तरसप्तम्या ज्ञाप्यत्वमर्थः । तथा च अल्त्वावच्छिन्नविषयका-पत्तिरूपज्ञानज्ञाप्यो य आदेशः, स न स्थानिवदित्यर्थः । स्थानित्वं

च विषयतया उक्तापत्तिमत्त्वम् । तादृशविषयतावच्छेदकमेव च स्थानितावच्छेदकम् । 'अनल्विधौ' इति संग्राहकवाक्ये अल्पदमपि तत्तत्सूत्रीयादेशस्थानिपदवत् यस्यादेशस्य स्थानिवद्भावश्चिकीर्षितः तादृशादेशविधायकतत्तच्छास्त्रोपात्तषष्ठ्यन्तपदजन्यबोधविषयतावच्छेदकाल्त्वव्याप्यधर्मावच्छिन्नपरम् । तथा च अल्त्वव्याप्यधर्मावच्छिन्नविषयतानिरूपकोक्ताहार्यज्ञानज्ञाप्यत्वविशिष्टो य आदेशः स न स्थानिवदिति पर्यवसितार्थः । एवं च रामायेत्यादौ सुप्त्वस्योक्तापत्तिज्ञानविषयतावच्छेदकीभूतङेत्वावच्छिन्नस्थानितासामानाधिकरण्येऽपि अल्त्वव्याप्यधर्मावच्छिन्नस्थानितासामानाधिकरण्याभावेन निषेधाप्राप्त्या सुप्त्वस्यातिदेशे बाधकाभावात् न दीर्घानुपपत्तिः । 'विधौ' इति द्वितीयवाक्ये अनल इत्यस्यावृत्त्या संबन्धः । प्राचीनोक्तरीत्यैव अल्वृत्तिधर्मघटितधर्माश्रये कार्ये न स्थानिवदिति द्वितीयवाक्यार्थः । न चात्र पक्षे आरित्यत्र उरदत्वे हलादिशेषानापत्तिः अभ्यासत्वस्यालमात्रवृत्तिधर्मावच्छिन्नस्थानितासमानाधिकरणत्वादिति वाच्यम्, ऋकारस्य द्वित्वे उरदत्वे आदेशानां स्थानिदेशेनैव देशवत्त्वनियमात् उत्तरखण्डोच्चारणकालावधिकपूर्वकालोच्चारणविषयत्वरूपपूर्वत्वज्ञानस्य अर् इत्यत्र सुलभतया 'हलादिः शेषः' इत्येतदेकवाक्यतापन्नाभ्याससंज्ञायाः पुनः प्रवृत्तौ बाधकाभावेन हलादिशेषणादोषात् । तथा च अल्मात्रवृत्तिधर्मावच्छिन्नस्थानितासमानाधिकरणधर्मप्रयोज्ये स्थानिनिष्ठाल्मात्रवृत्तिधर्मघटितधर्मप्रयोज्ये वा कार्ये आदेशो न स्थानिवदिति निषेधवाक्यार्थः ॥

अत्रोच्यते—स्थानिभूतो योऽल् स्थानिसंबन्धी वा योऽल् तन्मात्रवृत्तिर्यो धर्मस्तदाश्रये कार्ये कर्तव्ये स्थानिवन्नेति निषेधवाक्यार्थः । अत एव राम इत्यादौ स्थानिवत्त्वेन सुप्त्वात् 'सुप्तिङन्तं पदम्' इति

पदत्वाद्विसर्गः सिध्यति । अतिदिश्यमानाल्वृत्तिधर्मे मात्रपदनिवेशं विहाय स्थानितावच्छेदकधर्मे मात्रपदनिवेशमङ्गीकृत्य अल्मात्रवृत्तिधर्मावच्छिन्नस्थानितासमानाधिकरणस्थान्यल्वृत्तिधर्माश्रये कार्ये कर्तव्ये निषेधाभ्युपगन्तॄणां नव्यानां मते रेफस्थानितावच्छेदकस्याल्मात्रवृत्तित्वेन स्थानिवद्भावेन सुप्त्वासंभवेन पदत्वाभावाद्विसर्गासिद्धिः । स्थानितावच्छेदकस्याल्मात्रवृत्तित्वस्य शब्दतोऽलाभश्चेति प्रथमा ॥

अत्र नव्याः— यदुक्तम्— अतिदिदिक्षितधर्मे अल्मात्रवृत्तित्वं विहाय स्थानितावच्छेदके अल्मात्रवृत्तित्वनिवेशे राम इत्यादौ विसर्गासिद्धिरिति, तन्न; सुप्संबन्धिसकारस्य रुत्वे रेफान्तस्यैकदेशविकृतन्यायेन सुबन्ततया पदत्वाद्विसर्गे राम इत्यस्य सिद्धेः । अत एव 'भोभगो–' इति सूत्रस्थं भाष्यं संगच्छते । तत्र हि 'अश्ग्रहणमनर्थकम्, किं कारणम्? अन्यत्राभावात्— न ह्यन्यत्र रुरस्ति अन्यदतोऽशः । ननु चायमस्ति— छन्दःसु पयःसु इति । किं पुनः कारणं सुकारपरक एवोदाह्रियते? न पुनरयं वृक्षस्तत्र प्लक्षस्तत्रेति । अस्त्यत्र विशेषः । विसर्जनीये कृते न भविष्यति । इहापि तर्हि विसर्जनीये कृते न भविष्यति–छन्दःसु पयःसु इति । स्थानिवद्भावात्प्राप्नोति । ननु चेहापि स्थानिवद्भावात्प्राप्नोति वृक्षस्तत्र प्लक्षस्तत्रेति । अनल्विधौ स्थानिवद्भावः । अथायमल्विधिः स्यात् शक्यमश्ग्रहणमवक्तुम् । बाढं शक्यम् । अल्विधिस्तर्हि भविष्यति । कथम्? इदमस्ति रो रीति । ततो वक्ष्यामि 'खरवसानयोर्विसर्जनीयः' रः । ततः रोः सुपि विसर्जनीयः र इत्येव । उत्तरार्थं तर्ह्यश्ग्रहणं कर्तव्यम्— हलि सर्वेषाम् हलि अशि यथा स्यात् । इह मा भूत्–वृक्षवयतेरप्रत्ययः । वृक्षव् करोति' इत्युक्तम् । त्वद्रीत्या रुत्वस्याल्मात्रवृत्तित्वाभावेन भाष्यासंगतिः स्पष्टैव । तस्मात्

अतिदिदिक्षितधर्मे अल्मात्रवृत्तित्वं विहाय स्थानितावच्छेदके अल्मात्रवृत्तित्वनिवेश एवोचितः। न च रामायेत्यादौ सुप्त्वस्य स्थानीभूतैकाररूपाल्वृत्तित्वेन अनल्विधाविति निषेधापत्तिरिति वाच्यम्, आदेशविधायकशास्त्रोपात्तषष्ठ्यन्तपदजन्यबोधविषयतावच्छेदकधर्मस्यैव स्थानितावच्छेदकतया अत्र ङेत्वस्यैव स्थानितावच्छेदकतया तस्य चाल्मात्रवृत्तित्वाभावेन सुप्त्वस्य अल्मात्रवृत्तिधर्मावच्छिन्नस्थानितासामाधिकरण्याभावाददोषादिति द्वितीया ॥

अत्र प्राञ्चः— यदुक्तम्— अतिदिदिक्षितधर्मे अल्मात्रवृत्तित्वं विहाय स्थानितावच्छेदके अल्मात्रवृत्तित्वनिवेश एवोचितः। राम इत्यत्र "एकदेशविकृतन्यायेन सुबन्तत्वात्पदत्वसिद्धिरिति, तदसत्; छिन्नपुच्छे शुनि श्वत्वव्यहारेऽपि पुच्छवत्त्वव्यवहाराभावेन विकृतावयवनिबन्धनकार्ये "एकदेशविकृतन्यायाप्रवृत्त्या तेन सुबन्तत्वातिदेशासंभवेन पदत्वाभावाद्विसर्गस्य दुर्वचत्वात्। यदपि— 'भोभगो—' इति सूत्रस्थभाष्यविरोधोद्भावनम्, तदपि मन्दम्; अनेकभाष्याविरोधेन उक्तभाष्यस्यैकदेश्युक्तित्वात्। तथा हि— सन्वत्सूत्रे 'णेर्णिच्युपसंख्यानं कर्तव्यम्। अवीवदत्। अत्र णिचा व्यवधानात् सन्वद्भावो न प्राप्नोति। णिलोपे नास्ति व्यवधानम्। एवमप्यनग्लोप इति निषेधः प्राप्नोति' इत्युक्त्वा परत्वाद्वृद्धौ सत्यां णिलोपे नाग्लोपि अङ्गं भवति। तस्मात् "णेर्णिच्युपसंख्यानमिति वार्तिकं नारम्भणीयमित्युक्तम्। एवम् 'अतो लोपः' इति सूत्रे 'ण्यल्लोपौ—' इति पूर्वविप्रतिषेधमुक्त्वा पूर्वविप्रतिषेधो न कर्तव्यः। इयङादिषु कृतेषु स्थानिवद्भावाण्णिलोपो भविष्यतीत्युक्तम्। त्वद्रीत्या वृद्धौ कृतायां स्थानितावच्छेदकीभूताच्त्वस्य अल्मात्रवृत्तितया स्थानिवत्त्वेन णित्वातिदेशासंभवेन आदेशोत्तरमतिदेशेन णित्वमादाय लोपोपपादनेन

वार्तिकप्रत्याख्यानासंगतिः। एवमेव इयङ्विषयेऽपि। तस्मादुक्तानेकभाष्य-विरोधेन 'भोभगो—' इति सूत्रभाष्यस्य एकदेश्युक्तित्वावगमात् तद्भाष्यबलेन स्थानितावच्छेदके अल्मात्रवृत्तित्वनिवेशासंभव इति तृतीया।

अत्र नव्याः— यदुक्तम्— राम इत्यादौ विसर्गासिद्धिरिति, तन्मन्दम्; अग्नी इत्यत्र प्लुते कृते त्रिमात्र एव द्विमात्रत्वबुद्ध्या प्रगृह्यसंज्ञाप्रवृत्तिवत् प्रकृतेऽपि विसर्गं प्रति रुत्वस्यासिद्धतया रेफान्त एव सान्तबुद्ध्या पदसंज्ञायाः सूपपादत्वात् विसर्गसिद्धेः। यदपि— 'भोभगो—' इति सूत्रभाष्यस्यैकदेश्युक्तित्वाय "सन्वत्सूत्रादिभाष्यविरोधोद्भावनम्, तदपि मन्दम्; 'णौ चङि' इति सूत्रे 'नाग्लोपि—' इति सूत्रे अगिति प्रत्याहारग्रहणसामर्थ्येन 'वृद्धेर्लोपो बलीयान्' इति ज्ञापनेन 'ण्यल्लोपौ—' इति वचनेन च वृद्धेः पूर्वं णिलोपस्यैव प्रवृत्त्या परत्वाद्वृद्धिमभ्युपेत्य स्थानिवद्भावेन णित्वमाश्रित्य णिलोपेन तत्साधनपरस्य "सन्वत्सूत्रभाष्यस्यैव एकदेश्युक्तित्वात्। एवम् 'अतो लोपः' इति सूत्रभाष्यमप्येकदेशिन एव। तत्र हि इयङादिषु कृतेषु स्थानिवद्भावेन णित्वात् णिलोपो भविष्यति। नैवं शक्यम्। इयङादेशे अन्त्यलोपः प्रसज्येत' इत्युक्तम्। 'एकाचो द्वे—' इति सूत्रे "स्थाने द्विर्वचनमिति पक्षे 'आटिटत्' इत्यत्र ण्यन्ताङ्गस्य योऽन्त्याल् निर्दिश्यमानस्तस्य लोप इत्यर्थेन णिलोपो न स्यादित्यापादितम्। तद्रीत्या प्रकृतेऽपि इयङि अन्त्यस्यालो निर्दिश्यमानधर्मावच्छिन्नत्वाभावात् तादृशसमुदायस्य अन्त्याल्त्वाभावात् तत्र लोपस्यैवाप्राप्त्या स्थानिवद्भावेन लोपापादनस्यायुक्तत्वात्। तस्मात् एकदेशिभाष्यद्वयानुरोधेन 'भोभगो—' इति सूत्रस्थसिद्धान्तभाष्यस्यैकदेश्युक्तित्ववर्णनमसंगतमेवेति चतुर्थी॥

अत्र प्राञ्चः— यदुक्तम्— एकदेशिभाष्यद्वयानुरोधेन सिद्धा-

न्तिभाष्यस्यैकदेश्युक्तित्ववर्णनमयुक्तमिति, तदसत्; उक्तभाष्यद्वयस्य एकदेश्युक्तित्वे मानाभावात्। न च 'नाग्लोपि—' इति सूत्रे अगिति प्रत्याहाराश्रयणसामर्थ्येन 'ण्यल्लोपौ—' इति पूर्वविप्रतिषेधेन च वृद्धेर्लोपस्य बलवत्त्वबोधनेन पूर्वं वृद्धेरेवाप्राप्त्या वृद्ध्युत्तरं स्थानिवद्भावेन णिलोपापादनपरं भाष्यमेकदेशिन एवेति वाच्यम्, 'मुण्ड-मिश्र—' इति सूत्रे भाष्ये हलिकल्योरदन्तत्वनिपातनेन लोपापेक्षया परस्या वृद्धेरेव बलवत्त्वबोधनेन पूर्वं वृद्धेः सूपपादत्वात्। न च 'नाग्लोपि—' इति सूत्रे अगिति प्रत्याहाराश्रयणं व्यर्थमिति वाच्यम्, 'गोमिनमाख्यत् अजुगोमत्, स्वामिनमाख्यत् असस्वामत्, गोदुहमाख्यत् अजुगोदुहत्' इत्यादौ पूर्वं वृद्धेरप्राप्तौ प्रत्याहारग्रहणस्य चारितार्थ्यसंभवेन तस्य ज्ञापकत्वपरभाष्यस्यैकदेश्युक्तित्वात्। यदपि— 'एकाचो द्वे—' इति सूत्रभाष्यप्रामाण्यात् ण्यन्तं यदङ्गं तदन्तस्य निर्दिश्यमानस्य लोप इत्यर्थावश्यकतया इयङादेशोत्तरमन्त्यस्यालो निर्दिश्यमानत्वाभावात् निर्दिश्यमानस्य इय् इत्यस्यान्त्यालत्वाभावात् तेन लोपापादनपरम् 'अतो लोपः' इति सूत्रस्थं भाष्यमेकदेशिन एवेति, तदसत्; ण्यन्ताङ्गान्त्यस्य निर्दिश्यमानावयवस्य लोप इत्यर्थेन अन्त्यस्य लोपापादनसंभवेन भाष्यस्यैकदेश्युक्तित्वासंभवात्। तस्मादुक्तभाष्यद्वयप्रामाण्येन 'भोभगो—' इति सूत्रभाष्यस्य एकदेश्युक्तित्वकल्पनं युक्तमेवेति पञ्चमी ॥ *

---

* यावदुपलम्भं मुद्रापितम्।

$\frac{2}{3}$ २२ अ ३

वज्रटङ्कीयकृत्	पृ. 42
सत्यवर्यस्वामी	87
नानापाठकः	52
शब्दकौमुदी	104
परिभाषावृत्तिः	106, 108